संस्कृतवाङ्मयम्

A Reference Book of Antique Sanskrit Literature and Bibliography in Sanskrit Language Along with the Bibliography of Antique Sanskrit Literature by Non Indian Authors in Non-Indian Languages.

पण्डितप्रवरः

डॉ० हरिकृष्णशास्त्रिदातारः

विद्यारत्नः

संस्कृतवाङ्मयम्

A Reference Book of Antique Sanskrit Literature and Bibliography in Sanskrit Language Along with the Bibliography of Antique Sanskrit Literature by Non Indian Authors in Non-Indian Languages.

पण्डितप्रवरः

डॉ० हरिकृष्णशास्त्रिदातारः

विद्यारत्नः

संस्कृतवाङ्मयम्

वेद-वेदाङ्ग-उपवेद-इतिहास-पुराणैःसंवलितः

परिचयात्मकः सन्दर्भग्रन्थः

पण्डितप्रवरः

डॉ० हरिकृष्णशास्त्रिदातारः

विद्यारत्नः

कीर्तिसौरभप्रकाशनम्

वाराणसी

प्रकाशकः

कीर्तिसौरभप्रकाशनम्
करेन्ट बुक एजेन्सी, लंका, वाराणसी-५ (उ० प्र०)

© ग्रन्थप्रणेत्रधीनः

प्रथमं संस्करणम् : ५ अक्टूबर सन् १९८९ ई०

मूल्यम् : रु० १६५/-

मुद्रकः
शिवम् प्रिन्टर्स
सी० २७/२७३, इन्डियन प्रेस कॉलोनी,
मलदहिया, वाराणसी-२ (उ० प्र०)

संस्कृतवाङ्मयम्

मङ्गलम्—

प्रणम्य शारदामाद्यां साङ्गवेदादिसंस्तवम् ।
तनोति हरिकृष्णोऽयं संस्कृतं वाङ्मयस्तवम् ॥

प्रार्थना—

ॐ विश्वानि देव सवितर्दुरितानि परासुव ।
यद् भद्रं तन्न आसुव ॥
यजुः संहिता ३०।३

शुभाशंसनम्—

पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता ।
पवर्गरचितामूर्तिः अपवर्गं प्रयच्छतु ॥

ग्रन्थप्रणेतुरन्वयस्य संक्षिप्तः परिचयः,

ग्रन्थ-समर्पणं च

प्रभोः परशुरामस्य क्षेत्रे दक्षिणकोंकणे[1] ॥
रत्नागिरिपुरं रम्यं रत्नाकरतटे स्थितम् ॥ १ ॥

तन्मण्डलाभ्यन्तरं हि राजापुरसुपत्तनम् ॥
पत्तनस्यास्य सविधे संस्थितः सुमनोहरः ॥ २ ॥

'पोंभुर्ले' नामकग्रामः नितरां परिशोभनः ॥
मूलस्थानं ह्यभिजनः सम्प्रत्यपि विराजते ॥ ३ ॥

चित्तपावनजातीयो 'भामे' मूलोपनामकः ॥
वासिष्ठगोत्रोत्पन्नो हि दातारान्वयभूषणः ॥ ४ ॥

तत्राभूत् श्रीवैद्यनाथभट्टः परमधार्मिकः ॥
विद्वान् तपस्वी तत्त्वज्ञः श्रीदुर्गोपासकः सुधीः ॥ ५ ॥

स्वकीयकुलदेवस्य दुर्गावाडेश्वरस्य च ॥
अनुग्रहं सुसम्पाद्य स्वतपश्चरणेन तु ॥ ६ ॥

पुण्यश्लोकः सविप्रेन्द्रो धन्यं चक्रे स्वजीवनम् ॥
पेशवाशासने सोऽभून्निवासी पुण्यपत्तने ॥ ७ ॥

गोपालपन्तस्तनयः तस्यासीत् सुविचक्षणः ॥
नारायणाख्यस्तत्पुत्रो मनीषी धार्मिकः पुरा ॥ ८ ॥

---

१. अपरान्तक इति पुराणप्रसिद्धे प्रदेशे ।

राम-विट्ठलपुत्राभ्यां समं वाराणसीं ययौ ॥
रामशास्त्री ततश्चाभूत्पण्डितोऽपीशभक्तिमान् ॥ ९ ॥

तस्यास्ताम् कृष्ण-गोविन्दनामकावात्मजौबुधौ ॥
तयोः कृष्ण-बालशास्त्री पण्डितोऽभूद्विशेषतः ॥ १० ॥

शास्त्रदर्शननिष्णातो भक्तो धर्मपरायणः ॥
अष्टादशपुराणानां वक्ता प्रतिबृहस्पतिः ॥ ११ ॥

तस्यात्मजेषु विख्यातो धीमान् श्रीमाधवः सुधीः ॥
पुराण-शास्त्रमर्मज्ञो व्यासेषु च शिरोमणिः ॥ १२ ॥

श्रीमद्भागवतस्यासीत्पारायणपरायणः ॥
कथा-प्रवचनैस्तस्य सरलैस्सारगर्भितैः ॥ १३ ॥

सो हि भागवताचार्य इति ख्यातो बुधेषु च ॥
एवं विधस्तातपादः पूजनीयः सुकीर्तिमान् ॥ १४ ॥

तस्यायं तनयो धीमान् हरिकृष्णोविचक्षणः ॥
दर्शनागमशास्त्रेषु विज्ञः प्राज्ञश्च पण्डितः ॥ १५ ॥

प्रह्वीभावेन नितरामिमं संस्कृत-संस्तवम् ॥
दुर्गाम्बिकास्वङ्घ्रियुग्मे समर्पयति सत्स्तवम् ॥ १६ ॥

●

निभृतमभिहितं प्राभृतम्

१. अथैतर्हि मत्सुहृद्वराणां प्रेक्षावतां कृते चिरप्रतीक्षितोऽयं मत्प्रणीत-सङ्कलित-संस्कृतवाङ्मयनामकग्रन्थः, संस्कृतवाङ्मयस्यांशिकतया ज्ञान-कोषरूपः स्वतःप्रमाणवेद-वेदाङ्ग-उपवेद-इतिहास-पुराणैः संवलितः, गीर्वाणवाणीप्रणयिनां प्रतनसंस्कृतवाङ्मयविषयकजिज्ञासावतां, विपश्चिद-विपश्चितां करकमलसम्पुटेषु समर्पयतो मे स्वान्तं समुदितपरितोषं भृशं मोमुदीति। भारतीयाभारतीयानां नैकविधानामिदानीन्तनानां सज्जनानां पुरातनसंस्कृतवाङ्मयविषयक-गभीराज्ञानावलोकनप्रतिफलितोऽसौ प्रयत्न-स्तावत् सम्प्रति प्रबन्ध-ग्रन्थरूपेण प्रविकसितः सन् न्यूनाधिकतया तेषां वैदिकसंस्कृतवाङ्मयविषयकाप्रतिपत्तिविप्रतिपत्त्यादिनिवारणक्षमो भवितु-मर्हतीत्याशास्महे।

२. प्राक्तनाप्राक्तनैः पाश्चात्यापाश्चात्यैश्च विपश्चिद्भिः प्राचीनेतिहास-ज्ञैर्विशेषतया संस्कृतवाङ्मयविषयं समधिकृत्य प्रवर्हतया चैतिह्यविवरण-प्रवणाः संस्कृतासंस्कृतभाषासु परिसम्पादिताः ग्रन्थप्रणयनव्यापारास्ता-वन्मत्प्रयत्नस्यैतस्याभूतपूर्वतामनितरकृतित्वञ्च नोररीकुर्वन्तोऽपि सविशेषां प्रत्यग्रतामस्य मनागपि न परिखण्डयितुं प्रभवन्तीति ग्रन्थस्यास्यावलोक-नानन्तरं सुलभतया प्रतिपदं सम्प्रतिपत्तुं शक्यत इति निगदनं साम्प्रतं साम्प्रतं प्रतिभाति।

३. विश्वभाषाजननी प्रतनतमेयं गैर्वाणी वाणी भाषाशास्त्रदृशाऽपि सर्वाङ्गीणत्वं सुपरिष्कृतत्वञ्च समावहतीत्यत अस्याः संस्कृतत्वं, सार्व-भौमिकत्वं सार्वकालिकत्वञ्च विवादातीतमभ्युपगम्यते। एवं विधायां श्रेष्ठतमायां संस्कृतसुरभारत्यां, प्रेक्षावतां जनुष्मतां कृते नातिदुरूहायां चैतत्प्रबन्धानुबन्धनं न तावद् ग्रन्थप्रणेतुर्गीर्वाणवाणीप्रवीणत्वं चान्तर्वाणि-त्वमपितु तद्विषयकप्रणयप्रवणत्वं परिद्योतयतीति नः समाशंसनं सम्प्रति वास्तविकीं स्थितिमेव व्यनक्ति।

४. पुरातनभारतीयसंस्कृतेराकरस्य प्रतनतमस्य संस्कृतवाङ्मयस्य सर्वाङ्गीणवरेण्यत्वपरिचायकं विचयनात्मकं समाख्यानं दीपेन द्युमणिप्रद-र्शनप्रयत्नसदृशं मोघं प्रतिभाति। जनुष्मतां मनुजानां प्रेयः श्रेयसोः प्राप्ति-

साधनविषयकसिद्धान्तानां विवरकं वैदिकावैदिकसंस्कृतवाङ्मयं विसृततयाऽधिभौतिकाधिदैविकाध्यात्मिकसकलविधप्रमेयनिरूपणप्रवणं, धीमज्जनूष्मतां चरमपरमोद्देश्यरूपाऽत्यन्तिकीदुःखनिवृत्तिमूलकशाश्वतशान्तिसाधनविषयकाभिमतानां समीक्षणक्षमं क्षमातले ह्यनन्यसाधारणं शैर्षण्यं सञ्जुषते स्म। अधुनाऽपि विविधभौतिकप्रोन्नतिप्रभवविभवपूर्णेऽस्मिन् प्रकृतिजमनुजजीवने वास्तविकसुखनिधानस्वान्तशान्तिनिदानं संस्कृतवाङ्मयं वैश्विकसमस्तवाङ्मयेषु भृशं विशिष्यते।

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥

इत्यादीशावास्योपनिषद्वाक्येषु विद्याऽविद्योभयविषयकं प्रमात्मकं ज्ञानं तत्त्वजिज्ञासूनां मुमुक्षूणाञ्च कृते नान्तरीकतया नितरां समुपादेयत्वेनान्वाख्यातं वरीवर्ति। संस्कृतवाङ्मयमिदं विद्याविद्योभयं वैशद्येन विवृणोतीतिमहानियानस्य मूर्धन्योविशेष अभ्युपेतुं योग्यः प्रतिभाति। अविद्या हि कर्मविद्याऽन्तःकरणस्य मालिन्यं, जन्मान्तरीयसंस्कारजन्यमपि विशेषतयाऽपाकरोति। विद्या चात्मविद्या, तत्त्वज्ञानविवारिकाऽत्यन्तिकदुःखनिवृत्तिरूपां मुक्तिं भूम्ना सम्प्रापयति।

५. शिलाप्रस्तरपट्ट-तालपत्रोत्कीर्णलेख-हस्तलिखित-शिलामुद्रित-टङ्कमुद्रितपुस्तकादिरूपैः सम्प्रति सम्प्राप्तं संस्कृतवाङ्मयं साक्षात्परम्परया वा लौकिकालौकिकाखिलविषयाणां राद्धान्तिकं निरूपणं तावदाध्यात्मिकदृशा विदधातीत्यतस्तावत् संस्कृतवाङ्मयप्रसूतसत्तमभारतीयसंस्कृतेः गौरवेण गौरवालयं भारतं वर्षं पुरातनसमयत इदानींयावत् समस्त जगत आध्यात्मिकं गुरुत्वमङ्गीकरोतीति नितरां गरिमाऽस्पदं समेषां संस्कृतवाङ्मयप्रणयिनां प्राणिनाम्।

६. इदमैतिह्यमनतिरञ्जितं वास्तविकञ्च विवरणं नाविदितं भारतीयेतिहासज्ञानां यद् विगतसार्धद्विसहस्रवर्षेषु वर्षेऽस्मिन् भारते वैदेशिकानां परिपन्थिनाञ्च, समये-समये बहून्याक्रमणानि, शासनानि चाभूवन्। तेषु प्रभूततया प्रभूतैः पारसीक-यवन-पह्लव-शक-यूची-कुषाण-श्वेतहूण-मोहम्मदीय-गजनवी-घोरी-गुलाम-खिल्जी-तुघलक-सैय्यद-लोदी-तैमूर-चंगेज-बहमन-शर्की-मुगल-प्रभृतीनां निरन्तरं दुरन्ताक्रमणैः शासनैश्च भारतीयश्रद्धाकेन्द्राणि, देवमन्दिराणि, पुनीततीर्थस्थानानि, विद्यापीठानि, पुस्तकालयानि चासङ्-

ख्यातानि ध्वस्तानि, विनष्टानि, भस्मसात्कृतानि चातिमात्रमुल्लुण्ठितानि समभूवन्। दिष्ट्या दैवेन च ततोह्यवशिष्टाणि प्रतनानि जीर्णशीर्णावस्थां गतानि तालभूर्जादिपत्रात्मकानि संस्कृतहस्तलिखितपुस्तकानि सम्प्रति भारते विदेशेषु च बहुषु हस्तलिखितपुस्तकालयेषु सुरक्षितानि वरीवृतति। सकलसंस्कृतवाङ्मयनिधानानि चेमानि हस्तलिखितपुस्तकान्यपि प्रायशः समस्तपुस्तकालयानां सूचीपत्रादिषु, आफ्रेख्टादिमहोदयप्रणीत-सम्पादित-बृहत्तमसूचीपत्रादिषु च विशालसङ्ख्यया परिगणितानि तावदुपलभ्यन्ते। अमून्येव पुरातनानि हस्तलिखितानि सम्प्रत्यप्यमुद्रितानि साम्प्रतं परिज्ञातस्य संस्कृतवाङ्मयस्याकररूपाणि वर्तन्त इतिकृत्वाऽतितरां महत्त्वं समावहन्ति।

७. प्रस्तुतेऽस्मिन् ग्रन्थप्रबन्धे वेद-वेदाङ्ग-उपवेद-इतिहास-पुराणानि समधिकृत्य यथामति संक्षेपात्मकः संस्तवो[1] विहितोऽस्ति। संक्षिप्ततमपरिचयात्मकः संस्तवोऽयं संस्कृतभारतीरूपायाः शारदाम्बायाः स्तवरूपअपूर्वपुण्यजनकोऽस्तीतिकृत्वाऽस्मत्कृते कर्तव्यत्वेनानुष्ठीयमान एवासीत्। ग्रन्थेऽस्मिन् यथाविषयं विभक्तेषु प्रकरणेषु समासविधया विषयपरिचयपुरस्सरं तत्सम्बद्धानां कतिपयानां विदितवेदितव्यानां संस्कृतग्रन्थानां, तत्प्रणेतॄणाञ्च नाम्नां शतकात्मकवैक्रमसमयानुसारिपरिगणनं विहितमस्ति।

८. वस्तुतस्तु, मयाऽस्मिन् सन्दर्भे किमपि गवेषणाप्रवणमभिनवमभिमतं नोद्भावितम्, अपितु संस्कृतवाङ्मयसम्बद्धज्ञानविषयाणां यथाप्रज्ञानं, संक्षिप्तं सान्दर्भिकं सङ्कलनमात्रं गर्भीकृतमस्ति। सङ्कलनस्यास्यावच्छेदकावच्छेदेन पूर्णत्वं सम्पूर्णस्यामुष्य संस्कृतवाङ्मयस्य विशङ्कटतमत्वाद् बह्वंशेन च लोपङ्गतत्वात् कथमपि कदाऽपि न कोऽपि साधयितुं शक्नोतीत्यत्र न तावदणीयान् विसंवादावकाशः प्रतिभाति।

९. कलि-युधिष्ठिर-आनन्द-बुद्ध-मौर्य - विक्रम - शक - कनिष्क-गुप्त-चेदि-आदिभिः प्रवर्तितेषु प्रतनसंवत्सरेषु तावदन्यतमस्य विक्रमसंवत्सरस्यैव, तस्य भारतीयैरार्यैस्तेषां धार्मिक-सामाजिकव्यवहारेषु सातत्येन नितरां समादृतत्वाद् ग्रन्थेऽस्मिन्मया स्थूलतया कालगणनामापकत्वेन सर्वत्रोल्लेखः कृतोऽस्ति।

---

१. संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणम्॥ (अमरकोशः, सङ्कीर्णवर्गः, श्लोकः २३)

१०. संवत्प्रवर्तकोऽयमुज्जयिनीप्रशासकः शकारिविक्रमादित्य ऐतिहासिक आसीदत्र विषये सम्प्रति विप्रतिपत्तिर्न वरीवर्ति। परमविक्रमशाल्ययं पुरुषः वैक्रमपञ्चमशतकप्रभवप्रभावशालिचन्द्रगुप्तद्वितीयविक्रमादित्येतर आसीत्। न जाने भारतस्येतिहासकृद्भिरर्वाक्तनैश्चैतिह्यपण्डितैः परमपराक्रमिण एतस्य महाराजस्य विषये किमर्थं मौनमवलम्बितम्। विविध-प्राचीनाभिलेख-मुद्रादिसाक्ष्यप्रमाणैः, हालराजसातवाहनकृतगाथासप्तशती-गुणाढ्यप्रणीतबृहत्कथा - क्षेमेन्द्रकृतबृहत्कथामञ्जरी - सोमदेवविरचितकथा-सरित्सागर-जिनसेनप्रणीतजैन हरिवंश-प्रभचन्द्रविरचितप्रभावकचरिताद्यनेकानुश्रुत्यनुसारेण चास्य महाराजस्य विक्रमादित्यस्यैतिहासिकत्वं, संवत्प्रवर्तकत्वञ्च सुतरां स्फुटीभवति।[1]

११. प्राचीनतमानां विक्रमपूर्वसमयसमुद्भूतानां मन्त्रद्रष्टॄणां वैदिकऋषिप्रवराणां, शास्त्रप्रणेतृमहर्षिणां, दर्शनोद्भावकाचार्याणां तथाऽन्येषां वृत्ति-वार्तिक-विवरण-भाष्यादिकृतां मुनिसत्तमानां, विद्वद्वरेण्यानां स्थूलसमयनिर्देशोहि विशुद्धभारतीयदृष्टिकोणमूरीकृत्यैवास्मिन् ग्रन्थे संविहितोऽस्ति। एतदर्थं, पाश्चात्यविपश्चितामभ्रान्तधारणाऽननुप्राणितानां, संस्कृतसाहित्येतिहासप्रणेतॄणां, मॅक्समूलर-विन्तरनित्झ-कीथ-मॅक्डानेल-ग्लासेनापगोवेन-प्रभृतीनां प्रतिक्रियामूलिका दुस्तर्काश्रयिणो विचारसरणिस्तावद्विवेककोटिं सर्वथा न संस्पृशतीतिकृत्वाऽत्रास्माभिर्न समादृता। अर्वाक्तनानां विक्रमोत्तरकालिकानां संस्कृतग्रन्थविरचयितॄणां वैक्रमशतकात्मकस्थूलसमयनिरूपणेषु सामान्यतया समन्वयात्मिकैव दृष्टिरुररीकृता वरीवर्ति। एतावताऽप्यस्य ग्रन्थस्येतिहासत्वं तावदङ्गीकर्तुं योग्यं न प्रतिभाति।

१२. ऐतिह्यतत्त्वतः पर्यालोच्यमाने सम्प्रतीदं सम्प्रतिपत्तुं नितरां युक्तं प्रतिभाति यदतीतसमये संस्कृतसमस्तविद्यानां, कलानाञ्च चरमप्रकर्षो हि विक्रमपूर्वसमयत वैक्रमैकादशशतकान्तपर्यन्तं विशेषतया समभूत्। ततऊर्ध्वं वैक्रमपञ्चदशशतकान्तं यावत् स अवरुद्धो बभूव। तदनु वैक्रमैकोनविंशशतकान्तावधि संस्कृतविद्यानान्तावदपकर्षोन्मुखत्वं समवगम्यते। तदनन्तरं

---

१. एतद्विषयकं सविस्तरं विवरणं डॉ० राजबलिपाण्डेयप्रणीते 'विक्रमादित्य' नामकग्रन्थे समुपन्यस्तं समुपलभ्यते।

वैक्रमविंशशतकान्तपर्यन्तं तासामपकर्षः समजनि । ततोहि वैक्रमैकविंशशतकसमारम्भानन्तरं, भारतीयस्वर्णिमस्वातन्त्र्यसमये स्वतन्त्रभारतस्य महामहिमशिक्षामन्त्रिभिः, शिक्षामहानिदेशकैश्च संस्कृतविद्यानां, कलानां, तत्प्रसूतायाश्च भारतीयसंस्कृतेः सार्वकालिकं, सार्वदेशिकञ्च महत्त्वं समवगम्य संस्कृतविद्यानां पुनःसमुन्नयनार्थं महीयान् श्लाघनीयश्च प्रयत्नो विधीयत इति महानियान् परितोषावसरः प्रतिभाति समेषां संस्कृतविद्याप्रणयिनाम् ।

१३. पुरातनसमये वेदवेदाङ्गादिपारङ्गतैर्महर्षिवरैः शास्त्रप्रणेतृऋषिप्रवरैर्दर्शनाचार्यैर्मुनिसत्तमैश्च भौतिकाचिरन्तनस्थूलपदार्थविषयकविद्यानां न तथा, यथाऽध्यात्मतत्त्वविवरकाणां दर्शनानां, तदनुकूलशास्त्रादीनाञ्च वैशद्येन समुपबृंहणं संव्यधायि । योगशक्त्या समस्तभौतिकजगतः स्थूलसूक्ष्मरहस्यादीन् करतलामलकानिव प्रत्यक्षीकुर्वतां प्राचीनाचार्याणां जडजगत एतस्य नश्वरत्वं संविविच्यैव तद्विषयकशास्त्रप्रणयनजन्यपरिबृंहणप्रवणप्रवृत्तिराहित्यं युक्तमेवाऽसीत् । तदनन्तरमनन्तकालावयवकलिप्रभावेण, अभारतीयशासनप्रभवेण दुरितेन वा परवर्तिनां वैदिकवरेण्यानां अष्टादशविद्याचार्याणाञ्च तथाविधाया योगशक्तेरपकर्षः समभूत् । तेन च तेषां नैसर्गिकभौतिकसूक्ष्मतमविविधरहस्यविषयकविज्ञानानालोकितस्वान्तानामपाश्चात्यविपश्चितां केवलचिद्विलासात्मकसमस्तदर्शनशास्त्रादिप्रपञ्च एवेदानीं तावदवशिष्टः चकास्ति । भारतीय समस्तसंस्कृतवाङ्मयान्तर्भूतानां निखिलविद्यानां सर्वतन्त्रस्वातन्त्र्यानुबन्धित्वेन प्रवर्हतया समपेक्षितं, विशेषतया प्रत्यक्षगणित-अनुमानादिप्रमाणपर्यधिष्ठितानां नानाविधभौतिकविज्ञानानां प्रागल्भ्यं प्रौढत्वञ्चोपेक्षितं कथमपि भवितुं नार्हतीतिकृत्वा सकलविधस्वातन्त्र्यजन्ययथार्थतत्त्वज्ञानस्य नैकविधेषु साधनेषु समस्तभौतिकविद्यानां प्राथम्यं, लौकिकशास्त्रादीनामानन्तर्यं तथाऽध्यात्मिकदर्शनानां चारम्यं पारम्यञ्च सम्प्रतिपत्तुं सम्प्रत्यनुचितं न प्रतिभाति ।

१४. प्रस्तुतेऽस्मिन् सन्दर्भे समस्तसंस्कृतवाङ्मयस्य नामनिर्देशात्मकः परिचय अप्रस्तुतो न प्रतिभाति । मन्त्रसंहिताब्राह्मणोपनिषद्भिः संवलिता ऋग्यजुःसामाथर्वात्मकाश्चत्वारो वेदा अपौरुषेयाः स्वतःप्रमाणभूता आस्तिकैः परमप्रमाणत्वेनातितरां समादृताः सन्ति । तदुपजीवका वेदसम्बद्धनिबन्धाः सूत्र-परिशिष्ट-अनुक्रमणिका-प्रातिशाख्यादयो वरीवृतति । वेदाङ्गेषु शिक्षा-

व्याकरण-ज्योतिष-निरुक्त-कल्प-च्छन्दसां षण्णां परिगणनं भवति। उपवेदेषु, आयुर्वेदात्मकं चिकित्साशास्त्रं, धनुर्वेदात्मकं शस्त्रास्त्रप्रयोगशास्त्रं, गान्धर्ववेदरूपं सङ्गीतशास्त्रं, अर्थवेदात्मकं अर्थशास्त्रराजनीतिशास्त्रञ्चान्तर्भूतान्यभ्युपगम्यन्ते। संस्कृतेतिहासत्वेन वाल्मीकिरामायणं, व्यासमहाभारतञ्चोपगृह्येते। पुराणेषु तावदष्टादशमहापुराणानि, पुराणानि चोपपुराणान्यन्तर्भवन्ति। तेषु श्रीमद्भागवत प्रस्थानचतुष्टयान्यतमं, वैष्णवसम्प्रदायसमुपजीव्यं प्रधानं पदं सञ्जुषते। श्रीमद्भगवद्गीता विष्णुसहस्रनामानुगीताभीष्मस्तवराजगजेन्द्रमोक्षात्मकानि पञ्चरत्नानि महाभारताद्यर्णवान्तर्गतानि समुपलभ्यन्ते।

१५ तत्र तावदात्यन्तिकीदुःखनिवृत्तिजनकमुक्तिकारणब्रह्मतत्त्वज्ञानस्य साधनविधाः दृश्यन्ते-परिज्ञायन्ते यैस्तेषां दर्शनानां द्वैविध्यमभ्युपगम्यते। वेदेषु प्रामाण्यबुद्धिरस्ति येषां तान्यास्तिकदर्शनानि तथा तेष्वप्रामाण्यबुद्धिवशान्नास्तिकानि दर्शनानि विभज्य परिगण्यन्ते। आस्तिकदर्शनेषु महर्षिकणादेन प्रतिपादितं वैशेषिकदर्शनं (Categoristic System of Philosophy) आत्मतत्त्वज्ञानं प्रति आत्मेतरयावत्पदार्थानां, सविशेषाणां प्रमात्मकं ज्ञानं नितरामावश्यकं, तेन च दुःखानुत्पादो मोक्ष इति प्रतिपादयति। अक्षपादगौतममुनिना प्रस्थापितं गङ्गेशोपाध्यायेन च परिष्कृतं प्रतनं नूतनञ्च न्यायदर्शनं (Categoristic and Epistemological Systems of Philosophy) प्रमाणैरर्थपरीक्षणं न्यायइत्युक्तदिशा, अर्थ-आत्मतत्त्वपरीक्षणार्थं–यथार्थज्ञानार्थं–प्रमाणप्रमेयादिषोडशपदार्थान्समधिकृत्य विसृततया, सूक्ष्मतया चावच्छेदकावच्छिन्नपरिष्कारप्रणाल्या प्रत्यक्षानुमानादिप्रमाणानां विवेचनं, तेनात्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति निरूपयति। महामुनिकपिलेनान्वाख्यातं साङ्ख्यदर्शनं (Numerological System of Philosophy) जगद्विषयकभ्रमनाशजन्य-मूलप्रकृतिविषयकप्रमाजन्य-आत्यन्तिकदुःखत्रयविगमो मोक्ष इति विवृणोति। महर्षिपतञ्जलिप्रणीतं योगदर्शनं (Meditatalogical System of Philosophy) असम्प्रज्ञातसमाधिद्वारा निर्लेपस्य, क्लेशकर्मविपाकाशयैरपरामृष्टस्य पुरुषविशेषस्येश्वरस्य कैवल्येन प्रतिभानं तथाऽवस्थानं मोक्ष इति विवेचयति। जैमिनिमुनिविरचितं मीमांसादर्शनं (Exigetic System of Philosophy) आत्मनः शरीरेन्द्रियविषयविच्छित्तिद्वारा स्वर्गे नित्यसुखानुभूतिर्मोक्ष इति प्रतिपादयति। महर्षिवेदव्यासेन

प्रणीतं वेदान्तदर्शनं (Metophysical Svstem of Philosophy) ब्रह्मांशस्य जीवस्य अविद्याप्रसूतमिथ्याज्ञाननिवृत्तौ तत्त्वज्ञानेन ब्रह्मरूपत्वं मोक्ष इति प्रख्यापयति । अथच वेदान्तदर्शनान्तर्गतानि अद्वैत-भेदाभेद-विशिष्टा द्वैत-द्वैत द्वैताद्वैत-शैवविशिष्टाद्वैत- वीरशैवविशिष्टाद्वैत - अविभागा-द्वैत-शुद्धाद्वैत-अचिन्त्यभेदाभेद-शक्तिविशिष्टाद्वैतादिविविधवैदान्तिकदर्शनानि स्वीयसिद्धान्त-विवरणप्रवणानि शाश्वतसुखशान्तिनिधानस्य सालोक्य-साङ्गत्य-सामीप्य-सारूप्य-सायुज्यान्यतमस्य मोक्षस्यैव महत्त्वमाख्या-पयन्ति ।

१६. नास्तिकदर्शनेषु लौकायतिकं चार्वाकदर्शनं जीवितावस्थायां जनुष्मतां सर्वतन्त्रस्वातन्त्र्यं, प्रेत्य मृत्युर्वेति मोक्षस्वरूपं प्रतिपादयति । आर्हतदर्शनं सांसारिकेभ्यः सकलविधाऽवरणेभ्यः सम्पूर्णतया मुक्तिर्मोक्ष इति निरूपयति । सौगतदर्शनान्तर्गतानि वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकानि दर्शनानि तावदात्मोच्छेदः, आवागमननिरासः, धर्मनिवृत्तौ निर्मलज्ञानोदयः महोदयश्च मोक्षः निर्वाणश्चेति प्रमाणीकुर्वन्ति ।

१७ निगमादागत इत्यागम इति शब्दानुशासनानुसारेण समेषामाग-मानां-शास्त्राणां निगममूलकत्वं नूनमभ्युपेयं भवति । आगच्छन्ति-बुद्धिपदवीं कार्त्स्न्येनारोहन्ति प्रेयःश्रेयसोः साधनानि यस्मात् स आगमस्तन्त्र-शास्त्रात्मकः प्रेक्षावतां जनुष्मतां कृते समभीप्सितानामर्थानां तनन-प्रापण-साधनत्वेन, सकलविधानां तापत्रयजनकीभूतानां दुरितानां निवारण-कारणत्वेन च संस्कृतवाङ्मये प्रधानं पदं सञ्जुषते । अदस्तन्त्रं आगम-यामल-मुख्यभेदेन त्रिविधं, शैव-वैष्णव-शाक्तमतावलम्बिनं, श्रीविद्ययाच परिमण्डितं भृशं विशिष्यते ।

१८. शास्तीति शास्त्रमिति व्युत्पत्त्यनुसारेण संस्कृतवाङ्मये विहिता-विहितानां कर्मणां विधिनिषेधविधायकस्यैहिकामुष्मिकेष्टसाधनीभूतधर्म-प्रतिपादकस्य, स्मृतिनिबन्धादिभिः संवलितस्य धर्मशास्त्रस्य स्थानं नूनं महनीयं प्रतिभाति । सिद्धान्त-संहिता-होरात्मकस्कन्धत्रयाधिष्ठितं ज्योतिषं मुहूर्त-शकुन-फलित-ताजिक–जैमिनिसूत्र–भृगुसंहिता–नाडीग्रन्थ–केरलमत-प्रश्नशास्त्र-पाशकविद्या-सामुद्रिकशास्त्राणां राद्धान्तैः परिबृंहितं भृशं चकास्ति । संस्कार-प्रक्रिया व्युत्पत्ति-विधाभिः शब्दानां-पदानां परिशुद्धि-साधुत्वादिनिर्देशकस्य, स्वराक्षरवर्णमात्राऽनुस्वारविसर्गादीनां नियामकस्य च व्याकरणस्य शब्दानुशासकस्य संस्कृतवाङ्मये महत्त्वमनितरसाधारणं

प्रतिपद्यते। नामलिङ्गानुशासकस्य, शब्दसङ्केतपर्यायादिप्रतिपादकस्य, शब्दरत्नैः प्रपूरितस्य च कोशस्य संस्कृतवाङ्मये, सप्ताङ्गराज्ये स्वर्णरत्नकोषस्येव प्रधानमास्पदं वरीवर्ति। श्रुतिसुखानुभूतिजनकत्वेन, नादमाधुर्येण च वैदिकलौकिकच्छन्दसां महत्तमत्वं छन्दःशास्त्रं समाख्यापयति। शब्दार्थयोः संहतिभावस्य साहित्यस्य, श्रव्यदृश्यानुविद्धस्य काव्यस्य वा रस-अलङ्कार-गुण-रीति-ध्वनि वक्रोक्ति-औचित्यादिसिद्धान्तान्, काव्यदोषांश्च प्रतिपादयदिदं साहित्यशास्त्रं काव्यशास्त्रनाट्यरूपकशास्त्राभ्यां संवलितं भृशं विशिष्यते। आयुर्वेदश्चिकित्साशास्त्रं स्वास्थ्यसंरक्षक-व्याधिविनाशक-आयुर्वर्धक-औषधानामाहारविहाराणाञ्च सिद्धान्तान् शल्य-शालाक्य-काय-भूतविद्या-कौमारभृत्य-अगद-रसायन-वाजीकरणतन्त्रेषु वैशद्येन निपुणं निरूपयति। चिकित्साशास्त्राङ्गभूतं स्वस्थवृत्तान्तर्भूताहार-पथ्यादिविषयकसिद्धान्तविवरकं पाकशास्त्रं मानवशरीरपोषकत्वेन, स्वास्थ्य-वर्धकत्वेन चानिवार्यतया समभीप्सितानां प्रकृत्यनुकूलान्नपानाऽदीनां सम्यक् परिपाकमधिकृत्य प्रवर्तते। विद्याभूमिहिरण्यपशुधान्यभाण्डोपस्करमित्राद्यन्यतमार्थस्य साक्षात्परम्परया वा समुत्पादिकाया वसुन्धराया लाभपालनोपायादीनां कृते नान्तरीयकतयाऽपेक्षितानां राजनीति-दण्डनीति-वार्तानीति-न्यायशासननीति-कूटनीति-युद्धनीति-परराष्ट्रनीति-आदिविषयकसिद्धान्तानां विवरणमर्थशास्त्रे विहितमभ्युपगम्यते। सामाजिकमनुजानां संरक्षण-सुख-समृद्धि-शान्ति-साधनान्यतमानां, सन्निवासयोग्यानां दुर्ग-नगर-प्रासाद-सदनादीनां, सपर्योपासनाद्यर्थं समपेक्षितानां चतुरस्राष्टास्रवेसरादिमन्दिरादीनां, प्रतिमा-लिङ्ग-मूर्ति-विग्रह-पीठादीनां, कुण्डमण्डपवेदीस्तम्भादीनाञ्च परिशुद्धनिर्माणविषयकसिद्धान्तान् समधिकृत्येदं वास्तुशिल्पशास्त्रं प्रवर्तितमभ्युपगच्छामः। कामशास्त्रन्तावच्चतुर्विधपुरुषार्थान्यतमस्य धर्मार्थाविरुद्धस्य कामस्य सर्वाङ्गीणं विवरणं समुपस्थापयति। कामशास्त्रं सामान्यतया संकल्प-कामना-मनोरथादीनां मनोविकाराणां स्वरूपं यथा प्रतिपादयति, तथा विशेषतया रमणीयाङ्गनाऽलिङ्गनचुम्बनादिभिरुद्दीपितायाराभिमानिकसुखानुविद्धायाः सन्तानफलवत्याः निरतिशयानन्दसन्दोहानुभूतिजनिकायाश्च सुरतेः नितरां महत्त्वं समाख्यापयति, समुपस्थापयति च भौतिकसुखसारसर्वस्वस्य रतिसुखस्योपलब्धीनां शोभनानवद्यविविधविधानां सर्वाङ्गीणं मनोज्ञं मनोवैज्ञानिकं विवेचनम्। सङ्गीतशास्त्रं तौर्यत्रिकस्य गीतवाद्यनृत्यात्मकस्य सङ्गीतस्य सरसमानवजीवने तावदमन्द-

नादानन्दसन्दोहोत्सत्वेनातितरां महत्त्वं समाख्यापयति । श्रुतिमनोहरं, सहृदयहृदयाल्हादकं मार्गीयं देशीयञ्चोभयविधं कण्ठसङ्गीतं षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादानां सप्तस्वराणां विविधरागविन्यासेषु मनोहारितया समवलम्बितं, गमकतानमूर्च्छनाऽदिभिः श्रुतिललितं सरसमनांसि समनुरञ्जयति । संस्कृतसाहित्येतिहासो हि संस्कृतसाहित्यप्रणेतॄणां, परिमलकोमलस्वान्तानां, लोकोत्तरवर्णनाप्रवीणानां, कल्पनाकामिनीकमनीयकान्तानां सुकवीनां समालोचनप्रवणं, कालक्रमानुकूलं परिचयात्मिकया विधया विवरणं समुपस्थापयति ।

१९. संस्कृतभाषाया माध्यमेन संस्कृतवाङ्मयस्य, संस्कृतभाषायाश्च सार्वभौमप्रचार प्रसारसाधनत्वेन संस्कृतनियतकालिकानां वृत्तपत्रादीनां च भारते आसेतुहिमालयमावङ्गगुर्जरञ्च महत्त्वं वरीवर्ति । यद्यपि सम्भवतः मुद्रणसौलभ्याभावेनार्थाभावेन, विचक्षणानां संस्कृतज्ञानामेतद्विषयकप्रयत्नाभावेन वा वैक्रमविंशशतकात्पूर्वं भारते मुद्रितवृत्तपत्रादीनां प्रकाशनं नाभूत्; तथाऽपि तद्विषयकसमुचितप्रयत्नैः मुद्रणसौलभ्यलाभेन च वैक्रमविंशशतकस्य पूर्वार्द्धे त्रयोविंशत्युत्तरैकोनविंशहायने तावदखिलभारतीयसंस्कृतविद्याकेन्द्रभूतायां वाराणस्यां सर्वतः प्राथम्येन 'काशीविद्यासुधानिधिः' नामकं संस्कृतमासिकपत्रं प्रकाशितमभूदिति समवगम्यते । तदनु भारतीयानेकेषु नगरेषु संस्कृतनियतकालिकानां वैविध्येन प्रकाशनं समभवत् । सम्प्रति चाल्पसंख्याकानां संस्कृतवृत्तपत्राणां प्रकाशनं भवतीतिवस्तुस्थितिः ।

२०. सकलसंस्कृतवाङ्मयस्यागाररूपाणि याथार्थ्येण तत्परिज्ञापकानि च प्रतनानि संस्कृतहस्तलिखितपुस्तकानि, तालभूर्जपत्रात्मकानि विद्वद्भिरनुसन्धित्सुभिश्च भूम्ना परोक्षप्रमाणत्वेनाङ्गीकृतानि नितरां समादृतानि च भवन्ति । एतर्हीमानि पुस्तकानि भारते, अड्यार-अहमदाबाद-अल्लाहाबाद-अलवर-बरोडा-भरतपुर-बीकानेर-बम्बई - कलिकाता - कोचीन-कटक-देहली-होशियारपुर-हैद्राबाद-जम्मू-काश्मीर-जयपुर-जोधपुर-कोटा-कोल्हापुर-कुम्भ कोणम्-लखनऊ-मदरास-मदुराई-मैसूर- नवद्वीप - नागपुर - पटना-पुणे-राजापुर-शृङ्गेरी-शुचिन्द्रम्-तञ्जावूर-तिरुपति-त्रिवेन्द्रम्- उदयपुर - उडिपि-उज्जैन-वाराणसी-आदिनगरेषु विद्यमानेषु हस्तलिखितपुस्तकालयेषु तथा पाश्चात्यदेशेषु कॅम्ब्रिज्-लंदन-आक्स्फोर्ड-एडिन्बरा-ग्लास्गो-बर्लिन-बॉन-

गोटिंजन-लिप्झिग्-मुन्चेन- सेन्टपिटरबर्ग - स्ट्रॉसबर्ग-ट्यूबिंजन-वेन-पॅरिस-कोपेन हॅगन-न्यूहॅवन्-फिलाडेल्फिया-वार्शिग्टन-क्योटो-कोलम्बो-कैन्डी-काठमाण्डू-लाहौर-ढाका-राजशाही-रङ्गपुर-आदिपत्तनेषु संस्थितेषु हस्तलिखितपुस्तकालयेषु सुरक्षितानि वरीवृतति । अमी हस्तलिखितपुस्तकालयाः सस्कृतवाङ्मयविषयकजिज्ञासावतामनुसन्धित्सूनाञ्च कृते संस्कृतज्ञानकोषालयत्वेन समवगन्तुं चातितरां महनीयत्वं समावहन्ति ।

२१. इह जगतीतले संस्कृतवाङ्मयं सार्वकालिकं सार्वदेशिकं चानन्यसाधारणं वैशेष्यं समश्नुत इत्यत्र न कोऽपि विसंवादावकाशः प्रतिभाति । अदः समधिकृत्य न केवलैर्भारतीयैर्विद्याधरैरपितु विशालसंख्यायां परिगण्यमानैर्गण्यमान्यैरभारतीयैर्विद्वद्धौरेयैः स्वीयया दृशा, यथोपलब्धि, विविधास्वभारतीयभाषासु ग्रन्थप्रबन्धानुबन्धनापन्हवविधया संस्कृतसरस्वतीचरणारविन्दयोः समादरसुमनाञ्जलिः समर्पित इति सम्प्रतिपद्यते । तैः समीक्षकवरैर्विविधेषु निबन्धेषु संस्कृतवाङ्मयस्य वैदिक्य लौकिक्यश्चानेकविधा ज्ञानशाखाः प्रशाखाश्च समवलम्ब्य प्रव्यक्तानि शास्त्रीयसिद्धान्ताननुकूलानि वाऽनुकूलान्यभिमतानि पूर्वपक्षविधया, सिद्धान्तविधया वाऽभ्युपगन्तुमर्हाणि प्रतिभान्तीति कृत्वा तद्विरचितानां ग्रन्थप्रबन्धादीनां विषयवर्गीकरणविधया परिगणनं नितरां युक्तं प्रतीयते ।

२२. समुपजीव्यग्रन्थनाम्नां समुल्लेखोहि यथास्थानं टिप्पण्यादिषु विहितोऽस्ति । अतस्तेषामुपयोजितग्रन्थानां पार्थक्येन नामानुक्रमस्य परिशिष्टरूपेणोपस्थापनं नास्मिन् कृतमस्ति ।

२३. वस्तुतस्तु किञ्चित्कुतुकान्वितेन स्वान्तेन समारब्धोऽयं संस्कृतवाङ्मयसंस्तवः साम्प्रतं प्रवर्हप्रव्हीभावानुप्राणितेनान्तःकरणेन संस्कृतवाङ्मयसंस्तवनविधयाऽपूर्णोऽपि पूर्णांशरूपोऽयं ग्रन्थः सुरभारत्याः संस्कृतसरस्वत्याश्चरणकमलयोर्विनयावनतेन मया सादरं समर्पितो भक्तिप्रसूनाञ्जलिरूपः संविलसति ।

२४ अमुष्मिन् ग्रन्थे यान्येव सिद्धान्तानुकूलत्व-यथाशास्त्रत्व-तत्प्रसूतानवद्यमनोज्ञत्वादीनि सम्प्रतिपद्यन्ते, तानि च परमप्रतीक्ष्यवराणां, मद्गुरुचरणानां, शास्त्ररत्नाकरपण्डितराजपद्मभूषणादिविविधोपाधिभिः समलङ्कृतानां, दार्शनिकसार्वभौमाणां, भारतीयराजनीतिविचक्षणानां कैलास-

वासिनां श्रीमद्राजेश्वरशास्त्रिद्रविडपादानां तथा पूजनीयतमानां, पुण्यश्लोकानां, सकृपाशीर्दानां व्यासशिरोमणिभागवतमार्तण्डप्रवचनकेसर्यादिविविधालङ्करणैर्विभूषितानां श्रीमत्तातपादानां, पण्डितप्रवराणां, वैकुण्ठवासिनां श्रीमन् माधवशास्त्रिदातारमहोदयानां (उत्तराश्रमीयब्रह्मीभूतानां, परमहंसपरिव्राजकाणां, सिद्धिगतानां माधवाश्रमस्वामिवराणां) सकृपाऽशीर्वादलब्धानि वरीवृतति । एतत्प्रतीपात्मकमद्यत्वं यदि तावदेतस्मिन् किमपि स्यात्, तद्धि मितम्पचमतिग्रन्थप्रणेत्रगुणगणप्रभावप्रभवमस्तीति नीरक्षीरविवेकिनां, परमहंसानां, सहृदयहृदयाणां विदुषामविदुषाञ्च कृते संव्याहर्तुमावश्यकं न प्रतिभाति ।

२४. एतद्ग्रन्थप्रणयने मम यैर्हितानुबन्धिभिः सुहृद्वरैः स्वीयं शुभाशंसनमभिव्यक्तीकृतं, तेभ्यः सर्वेभ्य एकान्तशुभभावुकेभ्यः शतशो हार्दिकान् धन्यवादानुपहरामि । अपिच यस्याः सौभाग्यवत्याः सुशीलायाः कुशलनिलयीयव्यापारैः सम्प्राप्ते प्रशान्तनिशान्तपरिसरे ग्रन्थस्यास्यप्रणयने मया प्रातिभं सौलभ्यं समलाभि, तस्यै सुगेहिन्यै मे धर्मपत्न्यै सौभाग्यवत्यै इन्दुमत्यै धन्यवादप्रदानं न तावदभिव्यक्तिप्रधानमपितु नितरां हृद्यं समनुभूयते ।

अन्ततो हि सज्जनासज्जनानां परस्परं विभिन्नाः प्रतिक्रियाः संविभाव्य, संविधाय च समेषामनसूयकासूयकानां विदुषां क्षमायाचनं तावदेतावन्निभृतमभिहितं प्राभृतं सम्प्रत्युपसंहरामि ।

'प्रशान्तनिशान्तम्'
के० १८।७६, ब्रह्मघट्टः
वाराणसी १ (उ० प्र०)
प्रौष्ठपदीवरदगणेश चतुर्थी
संवत् २०४६ वै०

सुधियामनुविधेयः
हरिकृष्णशास्त्रिदातारः

सामवेदः ३६
शाखाभेदाः ३६
संहिता-ब्राह्मण-आरण्यकोपनिषदः ३७
सूत्राणि, अनुक्रमणिकाः, शातिशाख्यञ्च ४०
अथर्ववेदः ४२
शाखाभेदाः ४२
संहिता-ब्राह्मण-आरण्यकोपनिषदः ४२
सूत्राणि, अनुक्रमणिकाः, प्रातिशाख्यञ्च ४३
वेदषडङ्गानि ४५–११४
शिक्षाः परिचयः, भेदाश्च ४५
व्याकरणम् ४८
पाणिनिप्राक्तनानि व्याकरणानि ४९
पाणिनीयं व्याकरणं, दर्शनञ्च ५४
पाणिन्यर्वाक्तनानि व्याकरणानि ५६
प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च ५७
ज्योतिषम् ६८
परिचयः, त्रयः स्कन्धाः ६८
मुहूर्त-शकुन-फलित-ताजिक-जैमिनिसूत्र-भृगुसंहिता-नाडीग्रन्थ-केरलमत-प्रश्नशास्त्र-पाशकविद्या-सामुद्रिकशास्त्राणि ७६
प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च ७९
निरुक्तम् ९१
निघण्टवः, संस्कृतशब्दकोशाः, व्याख्याः, तत्प्रणेतारश्च
कल्पः १०३
परिचयः, तस्य भेदाश्च
छन्दः १०६
परिचयः, वैदिकच्छन्दांसि, लौकिकच्छन्दांसि च १०६
प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च ११३

उपवेदाः ११५–१७८
आयुर्वेदः (चिकित्साशास्त्रम्) ११६
परिचयः विवरणं भेदाश्च ११६
शल्य-शालाक्य-काय-भूतविद्या-कौमारभृत्य-अगद-रसायन-वाजीकरणतन्त्राणि प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च १३१
धनुर्वेदः (शस्त्रास्त्रप्रयोगशास्त्रम्) १४१
परिचयः, ब्रह्मास्त्रादीनां प्रयोगवर्णनम्
गान्धर्ववेदः (सङ्गीतशास्त्रम्) १४४
परिचयः, विवरणं, भेदाश्च १४४
प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च १६४
अर्थवेदः (अर्थशास्त्रं-राजनीतिशास्त्रम्) १६८
परिचयः, विवरणञ्च १६८
प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च १७६
इतिहास-पुराणानि १७९-२१०
इतिहासः १७९
परिचयः विवरणञ्च १७९
वाल्मीकिरामायणम् १८०
व्यासमहाभारतम् १८२
पुराणानि १८६
परिचयः, विवरणञ्च १८६
पञ्चलक्षणानि, दशलक्षणानि च १८८
अष्टादशमहापुराणानि १८९
अष्टादशपुराणानि १९०
अष्टादशोपपुराणानि १९०
पुराणानां वर्गीकरणम् १९१
महापुराणानां संक्षिप्ततमः परिचयः १९२
श्रीमद्भागवतम्, प्रमुखा व्याख्याश्च २०२
श्रीमद्भगवद्गीता, प्रमुखाः टीकाश्च २०५
पुराणेष्ववताररहस्यम् २०८

उपसंहारः २११-२१२

परिशिष्टम् (Appendix)-1 1-78

Bibliography of Antique Sanskrit Literature by Non-Indian authors in Non-Indian Languages.

परिशिष्टम् (Appendix)-2 1-8

The Catalogue of the Libraries et cetera of Sanskrit Manuscripts.

●

वैदिक वाङ्मयम्

१. ऋग्वेदः

२. यजुर्वेदः

३. सामवेदः

४. अथर्ववेदः

वेदाः

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे सदानन्दं सदाऽत्मजम् ॥

अपौरुषेयो[1] हि वेदः हिरण्यगर्भपरमेष्ठिचतुर्वदनवदनारविन्द-विनिःश्वसितनित्यभारतीश्रुतिरूपः, समस्तास्तिक[2]जनुष्मतामार्यधर्म-

---

१. वेदोह्यपौरुषेय अस्मर्यमाणकर्तृकत्वाद् गणेशस्तोत्रजीर्णकूपादिवदित्यनुमानस्य तावद् व्यभिचरितत्वाद्वेदस्यापौरुषेयत्वसाधने चेदमनुमानमपर्याप्तं प्रतिभाति ।

'वाचा विरूपनित्यया' (ऋ० सं० ८.८.६४.६), 'अस्य महतो-भूतस्य निःश्वसितमेतत्—ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (२.४.१०) इत्यादि श्रुतिप्रतिपादितदिशा निःश्वसितत्वाभिधानेनार्थानुसन्धानपूर्वकमनु-च्चरितत्वाद् वेदस्य नेश्वरप्रणीतत्वं प्रतिपद्यते ।

अर्थं ज्ञात्वा वाक्यप्रणयनं भवतीति कृत्वा स्वोत्प्रेक्षाविषयार्थाभिसन्धि-पूर्वकोच्चारणविषयत्वं पौरुषेयत्वमन्वाख्यातं वरीवर्ति । तद्धि वेदे नास्तीत्यत वेदस्यापौरुषेयत्वं प्रतिभाति ।

स्वसजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं । तथाविधोच्चा-रणसापेक्षोच्चारणविषयत्वेन तावद्वेदस्यापौरुषेयत्वं प्रव्यक्तं भवति । यतोहि सर्गादौ परमेश्वरः पूर्वसर्गसिद्धवेदसमानानुपूर्वीकं वेदं ब्रह्मण उपदिशतीति सजातीयोच्चारणापेक्षत्वात्परमेश्वरस्य, क्लेशकर्मविपाकाशयैरपरामृष्टस्य पुरुष-विशेषस्य वा तदुच्चारणस्यापि न तावत् पौरुषेयत्वं प्रसज्यते ।

सच्चिदानन्दात्मिकाया मातृशक्तेः शिवसंकल्परूपाग्निना सम्प्रेरितः सन् निःश्वासात्मकः कालस्पन्दः, यदा पञ्चमहाभूतात्मिकायां तन्त्र्यां नर्माघातेन स्पन्दं जनयति, तदा वेदस्याभिव्यक्तिर्भवति । कालस्पन्दरूपोऽयं मातृशक्ते-र्निश्वासः न तावत्कस्यापि व्यक्तिविशेषस्यापितु नित्य अनादिश्चाभ्युपगम्यते । अतोहि वेदस्यापौरुषेयत्वं स्फुटीभवति ।

२. वेदे स्वतःप्रामाण्यबुद्धिरस्ति येषां, तत्त्वमास्तिकत्वम् ।

विषयकजिज्ञासावतां कृते परमप्रमाण[1]भूतः, दशविधश्रौतस्मार्तयज्ञा[2]नुष्ठानादिप्रतिपादकानुश्रवो[3]निगमः, समुपजीव्यश्च सकलसंस्कृतपुराणेतिहासदर्शनागमशास्त्रादिवाङ्मयस्य, अनाद्यनन्तरूपः[4] वर्तमानसृष्टिसमारम्भसमये[5] चतुष्पाद एकरूप एवाऽसीत्। अनन्तरं द्वापरयुगान्ते[6] तत्र भगवता कृष्णद्वैपायनेन महर्षिवेदव्यासेन वेदस्य ऋग्यजुः-

---

१. धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ॥ (मनुस्मृतिः)

प्रमात्मकज्ञानसाधनानि तत्र प्रमाकरणानि प्रमाणानि वेददर्शनशास्त्रादिभिरङ्गीकृतानि नवसंख्याकानि वरीवृतति। तानि चेमानि १. प्रत्यक्षं, २. अनुमानं, ३. उपमानं, ४. शब्दः, ५. अर्थापत्तिः, ६. अनुपलब्धिः, ७. सम्भवः, ८. ऐतिह्यं, ९. चेष्टा चेति।

परमाप्तपरमेशनिःश्वसितस्य वेदस्य प्रामुख्येण शब्दप्रामाण्यं समस्तैरास्तिकैरविप्रतिपन्नविधयाऽनन्यविधया चाङ्गीक्रियते।

२. पञ्च श्रौतयज्ञाः —१. अग्निहोत्रयज्ञः, २. दर्शपूर्णमासयज्ञः, ३. चातुर्मास्ययज्ञः, ४. पशुयज्ञः, ५. सोमयज्ञश्च।

पञ्चस्मार्तयज्ञाः —१. ब्रह्मयज्ञः-वेदाध्यापनं, २. देवयज्ञः-हवनं, ३. पितृयज्ञः-तर्पणं, ४. भूतयज्ञः-बलिप्रदानं, ५. नृयज्ञः-अतिथिपूजनं च।

३. वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनसामान्यादधुनाऽध्ययनं यथा ॥ इत्युक्तदिशा वेदस्य गुरूच्चारणापेक्षोच्चारणविषयत्वादानुश्रविकत्वं प्रसिध्यति। अतएव वेदः गुरुमुखात्प्रतिश्रुयत इति श्रुतिः। म्ना अभ्यासे इतिधातोरासमन्तादभ्यस्यत इत्याम्नायो वेदः।

४. अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥ इति स्मृतिः। अनन्ता वै वेदा इति श्रुतिश्च।

५. भारतीयज्यौतिषगणनया वर्तमान-सृष्टिसमारम्भ-समयोहि २०४४ वैक्रमवर्षतः १,९६,०८,५३,०८८ इति संख्याकसंवत्सरेभ्यः पूर्वमासीदिति परिनिश्चीयते।

६. द्वापरसमाप्तिसमयः, कलिप्रारम्भसमयश्च विक्रमपूर्वीयेभ्यः ३०४० वर्षेभ्यः पूर्वमासीदितीतिहासज्ञाः सोपपत्तिकं समाख्यापयन्ति।

सामाथर्वरूपैश्चातुर्विध्यं पार्थक्येन संव्यस्य[1] स्वशिष्यवराश्चत्वार ऋषि-प्रवरा मन्त्रद्रष्टारः पैलवैशम्पायनजैमिनिसुमन्तवः क्रमशः समुपदिश्यन्तेस्म। तैर्हि चतुर्भिः शिष्यवर्यैस्तेषां प्रशिष्यवरैश्चाग्रे चतुर्धा व्यस्तानां वेदानां[2] विविधासु शाखासु संविभागः संव्यधायि।

---

१. त्रेतायां संहता वेदा यज्ञा वर्णास्तथैव च।
संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे॥
(महाभारतम्, शा० प०, अ० २ श्लो० ३८)

आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः।
ततो दशगुणः कृत्स्नः यज्ञोऽयं सर्वकामधुक्॥
अत्रैवामत्सुतो व्यासः अष्टाविंशतितमेन्तरे।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः॥
(विष्णुपुराणम्)

वेदश्चैकश्चतुर्धा तु व्यस्यते द्वापरादिषु॥ (मत्स्यपुराणम् १४४.११)

२. नेन्द्रियाणि, नानुमानं, वेदा ह्येवैनं वेदयन्ति, तस्मादाहुर्वेदा इति पिप्पलाद-श्रुतिः। (विष्णुतत्त्वनिर्णये आनन्दतीर्थः)

पुरुषार्थानां वेदयिता वेद उच्यते। (तैत्तिरीयसंहिताभाष्ये भट्टभास्करः)

विदन्त्यनेन धर्मं वेदः। (अमरकोषटीकायां क्षीरस्वामी)

निःश्रेयसकराणि कर्माण्यावेदयन्तीति वेदाः। (आपस्तम्बसूत्रभाष्ये कर्पर्दिस्वामी)

विदन्ति, विद्यन्ते, विन्दन्ति, विन्दन्ते वा सर्वे मनुष्याः सर्वाः सत्य-विद्याः यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदाः। (ऋग्वेदभाष्य भूमिकायां दयानन्दसरस्वती)

विद्यत इति सत्, वेत्ति तत्त्वमिति चित्, विन्दति चात्यन्तिकीं दुःख-निवृत्तिमित्यानन्द इति वेदोहि सच्चिदानन्दात्मको ब्रह्मरूप अभ्युपगम्यते।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥
चातुर्वर्ण्यं त्रयो लोकाः चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भवच्चैव सर्वं वेदात्प्रसिध्यति॥
(मनुस्मृतिः)

वेद एव द्विजातीनां निःश्रेयसकरः परः॥

इत्यादिप्रशस्तिपरकैर्वचनैःवेदस्य समुपजीव्यत्वं, समुपादेयत्वं, श्रेष्ठतमत्वं चावगम्यते।

श्रौतयज्ञेषु विशेषतया चतुर्विधवेदानां (वेदमन्त्राणां) पार्थक्येन समुपयोगोहि विहित इतिकृत्वाऽस्माभिः वेदानां प्रायोगिकत्वेनापि चातुर्विध्यं परिज्ञायते। तेषु प्रामुख्येण होतृप्रयुक्ता ऋचः,[१] मन्त्रा ऋग्वेदीया भवन्ति, अध्वर्युप्रयुक्तानां मन्त्राणां यजुर्वेदत्वं,[२] उद्गातृप्रयुक्तानां मन्त्राणां[३] सामवेदत्वं तथा ब्रह्मत्वाधिक्रियमाणानां मन्त्राणां च तावदथर्ववेदत्वम्[४]।

वेदचतुष्टये प्रभूततया प्रतिपादिताः प्रवर्हविषयास्तावत् कर्म, ज्ञानम्, उपासना चेति त्रिविधा अभ्युपगम्यन्ते। ऐहिकामुष्मिकेष्टसाधनभूतानां यज्ञकर्मविधीनां विवरणं कर्मकाण्डे, आत्यन्तिकदुःखनिवृत्तिजनकमोक्षसाधनतत्त्वज्ञानस्य विवेचनं ज्ञानकाण्डे, लौकिकपारमार्थिकोभयविधाभीष्टानुबन्धि भगवद्भक्तिनिरूपणं चोपासनाकाण्डे कृतमस्तीति प्रावगम्यते।

यद्यपीदानीन्तनैः प्राच्यप्रतीच्यैरितिहासज्ञैः अनुसन्धित्सुभिश्च वेदानामनाद्यपौरुषेयत्वं नोररीक्रियते, तथाऽपि तैर्हि वेदानां, विशेषतया ऋग्वे-

---

१. ऋचस्त्रिविधाः परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च। यत्र पादकृता व्यवस्था ते मन्त्रा ऋचः। पादेनार्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः। (जैमिनीयन्यायमालायां माधवाचार्यः)

२. यन्नगीतिर्नच पादबद्धं, तत् प्रश्लिष्टं पठितं यजुः। (शाबरभाष्यम्) वृत्तिगीतिर्वर्जितत्वेन प्रश्लिष्टपठिता मन्त्राः यजूंषि। (जैमिनीयन्यायविस्तरे माधवाचार्यः)

३. विशिष्टा काचिद् गीतिः सामेत्युच्यते। प्रगीतेही मन्त्रवाक्ये सामशब्दमभियुक्ता उपदिशन्ति। (शाबरभाष्यम्)

४. अथर्ववेदस्योपवेदान् पञ्चवेदान् निरमिमीत, सर्पवेदम्, पिशाचवेदम्, असुरवेदम्, इतिहासवेदम्, पुराणवेदञ्च। (गोपथब्राह्मणम् १।१०)

दस्य नितरां प्रतनतमत्वं,[1] मौलिकत्वञ्च[2] स्वीक्रियत इत्यत्र न काऽपि

---

१. वेदप्रणयनसमयं समधिकृत्य प्राच्याप्राच्येतिहासविदां, तिलकपावगीदीक्षितवैद्यभाण्डारकरविद्यालङ्कारगौतमचुलैटरघुनन्दनशर्मदासामेलकरमैक्समूलरकीथविन्टरनिट्झहर्टेलह्यूमेलमार्टिनहागजैकोविफ्रेड्रिकस्लीगलमेक्डानेलवेबरविट्स्काडरप्रभृतीनां ऐकमत्यं न प्रतिभाति । समेषामेषां राद्धान्तितमतानुसारं वेदनिर्माणकालखण्डो हि ४००००० क्रिस्टपूर्वीयवर्षतः १५०० क्रिस्टपूर्वीयवर्षावधि विस्तृतो भवितुमर्हति । तिलकपावगोदीक्षितादिविदुषां गणितमूलकतर्कैः, प्रमाणैरैतिहासिकैर्भूस्तरभौगोलिकपुरातत्त्वसिद्धान्तैर्हि वेदनिर्माणसमयविभागो निम्नलिखितविधया कृतः समवगम्यते । संहितानिर्माणकालखण्डः—क्रि० पू० ६०००–क्रि० पू० १५०० वर्षाणि, ब्राह्मणनिर्माणकालखण्डः—क्रि० पू० ३०००–क्रि० पू० १५०० वर्षाणि, आरण्यकोपनिषन्निर्माणकालखण्डः—क्रि० पू० २०००–क्रि० पू० १५०० वर्षाणि । इमं विषयमधिकृत्य कृतं विवरणं, विवेचनञ्च निम्नलिखितेषु ग्रन्थेषु समुपलभ्येते ।

तिलकः Orion (Pub. 1899 A. C.)

Arctic Home in the Vedas.

पावगी : The Vedic Fathers of Geology.

The Aryawartic home and the Aryan Credal in Sapt Sindhus.

दीक्षित : भारतीय ज्योतिःशास्त्रम् (प्र० १९३१ ई०)

Max Müller : Ṛgveda Saṁhita, Vol. 1, 1861 A. C.

J. Hertel : Über Heimat und Alter des Ṛgveda (Pub. J. B. Berlin)

A. B. Keith : The Age of Ṛgveda. Woolner Comm. Vol. Lahore 1940.

K. Hummel : Die Relative Chronologie der alten Prosaupani Saden. (München, 1925)

२. ऋग्वेदमन्त्राः, यजुषां चतुर्थांशभूताः साम्नां षोडशांशेषु पञ्चदशांशरूपाः, आथर्वणस्य पञ्चमांशात्मकाः सन्तीति गणनाप्रवीणैः प्रतिपाद्यते ।

विप्रतिपत्तिर्वरीवर्ति ।[1]

वेदविभागाः

मन्त्रद्रष्टृमहर्षिभिः वेदानां[2] त्रयो विभागाः परिनिर्धारिताः सन्ति । मन्त्रसंहिता,[3] ब्राह्मणम्, आरण्यकोपनिषदश्च ।

मन्त्रसंहिता

इयन्तावन्मन्त्रसमुच्चयात्मिका, महत्परिमाणा, कर्मोपासनाप्रतिपादिका च वर्तते । अस्या यथार्थज्ञानार्थं स्कन्दस्वाम्युद्गीथमाधवभवस्वामिकौशिकभट्टभास्करमिश्रगुणविष्णुसायणानन्दबोधशत्रुघ्नमहीधर-दयानन्दप्रभृतीनां व्याख्यानभाष्यादीनि सम्पूर्णान्यांशिकानिवा नितरां महत्त्वं समावहन्ति ।

---

१. वेदापौरुषेयत्वविषये दार्शनिकेष्वप्यैकमत्यं न प्रतिभाति । भौतिकवादिनां वैज्ञानिकानामत्र विषये सर्वथा प्रतीपमभिमतं सन्दृश्यते । डाक्टरक्रैकनेमहोदयप्रतिपादितसुपरसोनिक्सशास्त्रीयह्वाइब्रेशन्ससिद्धान्तानुसारमपि वेदानामनादिनिधनत्वं चाविप्रतिपन्नं न प्रतिभाति । अतो हि वेदानामनाद्यपौरुषेयत्वविषयमधिकृत्य तावदद्यतनानां प्राच्याप्राच्यसंस्कृतज्ञानां, अनुसन्धित्सूनां च कृते विवेचनविमर्शनादिकं भृशमावश्यकं प्रतिभाति ।

२. वेदानां वेदशाखानामितिभावः । वर्तमानकलियुगप्रारम्भे वेदानां सैकत्रिंशच्छतोत्तरसहस्रसंख्याकाः शाखाः समासन् । पतञ्जलिमुनिप्रोक्तदिशा ऋग्वेदस्यैकविंशतिशाखाः, यजुषः एकोत्तरशतशाखाः (कृष्णयजुषः षडशीतिशाखाः, शुक्लयजुषः पञ्चदशशाखाश्च), साम्नः सहस्रशाखाः, अथर्वस्य च नवशाखा आसन् । शाखाभेदो हि सूत्रभेदेन, पाठभेदेन, संहिताब्राह्मणान्यतरग्रन्थभेदेन वा भवति ।

३. संहितापाठो हि द्विविधोऽस्ति । निर्भुजसंहितापाठः, प्रतृणसंहितापाठश्च । तत्र निर्भुजसंहितापाठः (आर्षपाठः) मन्त्रसंहितायाः अविकलपाठात्मको भवति । प्रतृणसंहितापाठोऽपि द्विविध अवगम्यते । पदसंहितापाठः, क्रमसंहितापाठश्च । पदसंहितापाठे समेषां पदानां पार्थक्येन पाठो भवति । क्रमसंहितापाठे पूर्वपदत्यागोत्तरपदग्रहणपूर्वकः शृङ्खलाबद्ध आन्तं पाठो भवति । विकृतिवल्ल्यादिग्रन्थेषु, प्रतिशाख्येषु च क्रमसंहितापाठस्याष्टविधत्वं अष्टविकृतिरूपेण सविस्तृतं सोदाहरणं च विवृतं तावदभ्युपगम्यते । अत्र विषये प्रातिशाख्यसम्बद्धटिप्पण्यां विसृतं विवरणं समुपस्थापितं वरीवर्ति ।

ब्राह्मणम्[1]

संहितामन्त्राणां प्रव्यक्ततया वास्तविकार्थप्रतिपादकं व्याख्यानं, विवेचनञ्चास्मिन् सन्दृश्यते। श्रौतयज्ञादिषु वैदिकमन्त्राणां विनियोगविधिः, तद्विषयकं च विवरणं ब्राह्मणग्रन्थे समुपलभ्यते। अस्य गोविन्दस्वामिभवस्वामिहरिस्वामिजयस्वामिभरतस्वामिभट्टभास्करभट्टविनायकषड्गुरुशिष्यभट्टगुणविष्णुपुत्रोव्वटसायणमहीधरभवत्रातनारायणाचार्यादिभिः प्रणीतानि भाष्यविवरणादीनि सम्पूर्णतयांऽऽशिकतया वा समुपलभ्यन्ते[2]।

आरण्यकोपनिषदः

अरण्ये पठितुं विहिता वेदविभागा आरण्यकानि[3]। इमानि ब्राह्मणग्रन्थाङ्गभूतानि, तत्परिशिष्टरूपाणि वा समुपलभ्यन्ते। आरण्यकान्तर्भूता अतिरिक्ताश्चोपनिषदस्तु[4] विद्यालये आचार्यगुरुसद्मनि वाऽध्येतुं योग्या भवन्ति। आरण्यकोपनिषत्सु प्राधान्येन तत्त्वज्ञानोपासनाविध्यादिकं, सरहस्यं परिसूक्ष्मतया प्रतिपादितमस्तीत्यतस्तावदस्य वेदविभागस्य

---

१. ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम् (मेदिनीकोशः, णान्तवर्गः)
ब्राह्मणलक्षणं शाबरभाष्ये (२.१.८)
हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परिक्रिया पुराकल्पो व्यवधारणकल्पना। उपमानं दशैते तु विधयो ब्राह्मणस्य तु ॥
ब्राह्मणं त्रिविधमस्ति—(१) कर्मब्राह्मणं, मन्त्रविनियोगकर्मविधानादिप्रतिपादकं, (२) कल्पब्राह्मणं, मन्त्रपाठात्मकं तथा (३) अनुब्राह्मणं, ब्राह्मणसदृशम्, आर्षग्रन्थादिकम्।

२. ब्राह्मणारण्यकादीनां वेदत्वं कैश्चिदाधुनिकैर्विचारकैर्नाङ्गीक्रियते। तैर्हि केवलानां शाखासंहितानां वेदपदवाच्यत्वमूरीक्रियते। मन्त्रब्राह्मणयोः वेदनामधेयमिति पारम्परिका विद्वांसः सम्मन्वते। अत्र विषये तत्त्वं तत्त्वान्वेषकैरनुसन्धित्सुभिर्विशेषतया मृग्यमिति भाति।

३. अरण्येऽनूच्यमानत्वादारण्यकम्। अरण्य एव पाठ्यत्वादारण्यकमितीर्यते ॥ इति ऐतरेयारण्यकभाष्ये सायणाचार्यः प्रतिपादयति।

४. उप—जीवसमीपे निषीदति श्रेयः—तत्त्वज्ञानं, यया—ब्रह्मविद्यया, सा उपनिषद्। तत्त्वज्ञानं उपनिषण्णं—परिपूर्णमस्ति यस्यां सोपनिषद्। उप—नितरां सादयति—प्रापयति ब्रह्म इत्युपनिषद् ब्रह्मविद्या। तत्प्रतिपादके वेदशिरोभागे उपनिषच्छब्द उपचर्यत इति वा।

ज्ञानकाण्डत्वं, रहस्यत्वञ्चावगम्यते। प्रभूतसंख्याका आरण्यकोपनिषदः सम्प्रति विलुप्ता[1] नोपलभ्यन्ते। ईशकेनादिप्राग्र्यतमाः द्वादशोपनिषदः शांकरभाष्ययुताः सायणभाष्यमण्डिताश्च समुपलभ्यन्ते। ऐतरेयतैत्तिरीय-बृहदारण्यकच्छान्दोग्यादीन्यारण्यकान्यपि सायणभाष्यादियुतानि वरीवृतति।

●

---

१. प्रतनसमये विंशत्युत्तरशतद्वय (२२०) संख्याका आरण्यकोपनिषदः समुपलब्धा आसन्। सम्प्रति मुक्तिकोपनिषदि समुल्लिखितास्तावदष्टोत्तरशतोपनिषदः स्वल्पसंख्याकान्यारण्यकानि च प्रामाणिकमौलिकरूपाभ्यां समुपलभ्यन्त इति वस्तुस्थितिः। तत्र ऋग्वेदसम्बन्धिन्यः दशोपनिषदः, कृष्णयजुषः द्वात्रिंशदुपनिषदः, शुक्लयजुषः एकोनविंशतिसंख्याकाः, सामवेदस्य षोडशोपनिषदः, अथर्ववेदस्य चैकत्रिंशदुपनिषदः समवगम्यन्ते। 'ईशाष्टोत्तरशतोपनिषदः' ग्रन्थः काशीस्थसर्वहितैषीकम्पनीद्वारा १९३८ ईसवीयेऽब्दे प्रकाशितोऽस्ति।

उपनिषदां विंशत्युत्तरद्विशत (२२०) संख्याकानां, नाम्नां अकारानुक्रमः निम्नविधोऽस्ति।

१. अक्षमालोपनिषद्, २. अक्षि-उपनिषद्, ३. अथर्वशिखोपनिषद्, ४. अथर्वशिरोपनिषद्, ५. अद्वयतारकोपनिषद्, ६. अद्वैतोपनिषद्, ७. अद्वैतभावनोपनिषद्, ८. अध्यात्मोपनिषद्, ९. अनुभवसारोपनिषद्, १०. अन्नपूर्णोपनिषद्, ११. अमनस्कोपनिषद्, १२. अमृतनादोपनिषद्, १३. अमृतबिन्दूपनिषद् (ब्रह्मबिन्दूपनिषद्), १४. अरुणोपनिषद्, १५. अल्लोपनिषद्, १६. अवधूतोपनिषद् (गद्यपद्यात्मिका), १७. अवधूतोपनिषद् (पद्यात्मिका), १८. अवक्तोपनिषद्, १९. आचमनोपनिषद्, २०. आत्मपूजोपनिषद्, २१. आत्मप्रबोधोपनिषद् (आत्मबोधोपनिषद्), २२. आत्मोपनिषद् (वाक्यात्मिका), २३. आत्मोपनिषद् (पद्यात्मिका), २४. आथर्वणद्वितीयोपनिषद्, २५. आयुर्वेदोपनिषद्, २६. आरुणिकोपनिषद् (आरुणेय्युपनिषद्), २७. आर्षेयोपनिषद्, २८. आश्रमोपनिषद्, २९. इतिहासोपनिषद्, ३०. ईशावास्योपनिषद्, ३१. ऊर्ध्वपुण्ड्रोपनिषद्, ३२. एकाक्षरोपनिषद्, ३३. ऐतरेयोपनिषद् (अध्यायात्मिका), ३४. ऐतरेयोपनिषद् (खण्डात्मिका), ३५. ऐतरेयोपनिषद् (अध्यायात्मिका), ३६. कठरुद्रोपनिषद्, ३७. कठोपनिषद्, ३८. कठश्रुत्यु-

पनिषद्, ३९. कलिसन्तरणोपनिषद् (हरिनामोपनिषद्), ४०. कात्यायनोपनिषद्, ४१. कामराजकीलितोद्धारोपनिषद्, ४२. कालाग्निरुद्रोपनिषद्, ४३. कालिकोपनिषद्, ४४. कालीमेधादीक्षितोपनिषद्, ४५. कुण्डिकोपनिषद्, ४६. कृष्णोपनिषद्, ४७. केनोपनिषद्, ४८. कैवल्योपनिषद्, ४९. कौलोपनिषद्, ५०. कौषीतकिब्राह्मणोपनिषद्, ५१. क्षुरिकोपनिषद्, ५२. गणपत्यथर्वशीर्षोपनिषद्, ५३. गणेश (वरद) पूर्वतापिन्युपनिषद्, ५४. गणेश (वरद) उत्तरतापिन्युपनिषद्, ५५ गर्भोपनिषद्, ५६. गन्धर्वोपनिषद्, ५७. गायत्र्युपनिषद्, ५८. गायत्रीरहस्योपनिषद्, ५९. गारुडोपनिषद्, ६०. गुह्यकाल्युपनिषद्, ६१. गुह्यषोढान्यासोपनिषद्, ६२. गोपालपूर्वतापिन्युपनिषद्, ६३. गोपालोत्तरतापिन्युपनिषद्, ६४. गोपीचन्दनोपनिषद्, ६५. चतुर्वेदोपनिषद्, ६६. चाक्षुषोपनिषद् (मैत्रोपनिषद्), ६७. चित्युपनिषद् ६८. छागलेयोपनिषद्, ६९. छान्दोग्योपनिषद्, ७०. जाबालदर्शनोपनिषद्, ७१. जाबालोपनिषद्, ७२. जाबाल्युपनिषद्, ७३. तारसारोपनिषद्, ७४. तारोपनिषद्, ७५. तुरीयातीतोपनिषद् (तीतावधूतोपनिषद्), ७६. तुरीयोपनिषद्, ७७. तुलस्युपनिषद्, ७८. तेजोबिन्दूपनिषद्, ७९. तैत्तिरीयोपनिषद्, ८०. त्रिपाद्विभूतिमहानारायणोपनिषद्, ८१. त्रिपुरातापिन्युपनिषद्, ८२. त्रिपुरोपनिषद्, ८३. त्रिपुरामहोपनिषद्, ८४. त्रिशिखिब्राह्मणोपनिषद्, ८५. त्रिसुपर्णोपनिषद्, ८६. दक्षिणा मूर्त्युपनिषद्, ८७. दत्तात्रेयोपनिषद्, ८८. दत्तोपनिषद्, ८९. दुर्वासोपनिषद्, ९०. देव्युपनिषद् (गद्यपद्यात्मिका), ९१. द्वयोपनिषद्, ९२. ध्यानबिन्दूपनिषद्, ९३. नादबिन्दूपनिषद्, ९४. नादपरिव्रजोपनिषद्, ९५. नारदोपनिषद्, ९६. नारायणपूर्वतापिन्युपनिषद्, ९७. नारायणोत्तरतापिन्युपनिषद्, ९८. नारायणोपनिषद् (नारायणअथर्वशीर्ष), ९९. निरालम्बोपनिषद्, १००. निरुक्तोपनिषद्, १०१. निर्वाणोपनिषद्, १०२. नीलरुद्रोपनिषद्, १०३. नृसिंहपूर्वतापिन्युपनिषद्, १०४. नृसिंहषट्चक्रोपनिषद्, १०५. नृसिंहोत्तरतापिन्युपनिषद्, १०६. पञ्चब्रह्मोपनिषद्, १०७. परब्रह्मोपनिषद्, १०८. परमहंसपरिव्राजकोपनिषद्, १०९. परमहंसोपनिषद्, ११०. परमात्मिकोपनिषद्, १११. पारायणोपनिषद्, ११२. पाशुपतब्रह्मोपनिषद्, ११३. पिण्डोपनिषद्, ११४. पीताम्बरोपनिषद्, ११५. पुरुषसूक्तोपनिषद्, ११६. पैङ्गलोपनिषद्, ११७. प्रणवोपनिषद् (पद्यात्मिका), ११८. प्रणवोपनिषद् (गद्यात्मिका), ११९. प्रश्नोपनिषद्, १२०. प्राणाग्निहोत्रोपनिषद्, १२१. बटुकोपनिषद्, १२२.

बह्वृचोपनिषद्, १२३. बाष्कलमन्त्रोपनिषद्, १२४. बिल्वोपनिषद् (पद्यात्मिका), १२५. बिल्वोपनिषद् (गद्यात्मिका), १२६. बृहज्जाबालोपनिषद्, १२७. बृहदारण्यकोपनिषद्, १२८. ब्रह्मविद्योपनिषद्, १२९. ब्रह्मोपनिषद्, १३०. भगवद्गीतोपनिषद्, १३१. भवसन्तरणोपनिषद्, १३२. भस्मजाबालोपनिषद्, १३३. भावनोपनिषद् (कापिलोपनिषद्), १३४. भिक्षुकोपनिषद्, १३५. मठाम्नायोपनिषद्, १३६. मण्डलब्राह्मणोपनिषद्, १३७. मन्त्रिकोपनिषद् (चूलिकोपनिषद्), १३८. मल्लायूपनिषद्, १३९. महानारायणोपनिषद् (बृहत्० उत्तर०), १४०. महावाक्योपनिषद्, १४१. महोपनिषद्, १४२. माण्डूक्योपनिषद्, १४३. माण्डूक्योपनिषद्कारिका (आगमः, अलातशान्तिः, वैतथ्यं, अद्वैतं च), १४४. मुक्तिकोपनिषद्, १४५. मुण्डकोपनिषद्, १४६. मुद्गलोपनिषद्, १४७. मृत्युलाङ्गूलोपनिषद्, १४८. मैत्रायण्युपनिषद्, १४९. मैत्रेय्युपनिषद्, १५०. यज्ञोपवीतोपनिषद्, १५१. याज्ञवल्क्योपनिषद्, १५२. योगकुण्डल्युपनिषद्, १५३. योगचूडामण्युपनिषद्, १५४. योगतत्त्वोपनिषद् (१), १५५. योगतत्त्वोपनिषद् (२), १५६. योगराजोपनिषद्, १५७. योगशिखोपनिषद्, १५८. योगोपनिषद्, १५९. राजश्यामलारहस्योपनिषद्, १६०. राधिकोपनिषद् (गद्यात्मिका), १६१. राधोपनिषद्, (प्रपाठात्मिका), १६२. रामपूर्वतापिन्युपनिषद्, १६३. रामरहस्योपनिषद्, १६४. रामोत्तरतापिन्युपनिषद्, १६५. रुद्रहृदयोपनिषद्, १६६. रुद्राक्षजाबालोपनिषद्, १६७. रुद्रोपनिषद्, १६८. लक्ष्म्युपनिषद्, १६९. लाङ्गूलोपनिषद्, १७०. लिङ्गोपनिषद्, १७१. वज्रपञ्जरोपनिषद्, १७२. वज्रसूचिकोपनिषद्, १७३. वनदुर्गोपनिषद्, १७४. वराहोपनिषद्, १७५. वासुदेवोपनिषद् १७६. विश्रामोपनिषद्, १७७. विष्णुहृदयोपनिषद्, १७८. शरभोपनिषद्, १७९. शाट्यायनीयोपनिषद्, १८०. शाण्डिल्योपनिषद्, १८१. शारीरकोपनिषद्, १८२. शिवसंकल्पोपनिषद् (१), १८३. शिवसंकल्पोपनिषद् (२), १८४. शिवोपनिषद्, १८५. शुकरहस्योपनिषद्, १८६. शौनकोपनिषद्, १८७. श्यामोपनिषद्, १८८. श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषद्, १८९. श्रीचक्रोपनिषद्, १९०. श्रीविद्यातारकोपनिषद्, १९१. श्रीसूक्तोपनिषद्, १९२. श्वेताश्वतरोपनिषद्, १९३. षोढोपनिषद्, १९४. संकर्षणोपनिषद्, १९५. सदानन्दोपनिषद्, १९६. सन्ध्योपनिषद्, १९७. संन्यासोपनिषद् (अध्यायात्मिका), १९८. संन्यासोपनिषद् (गद्यात्मिका), १९९. सरस्वतीरहस्योपनिषद्, २००. सर्वसारोपनिषद् (सर्वोपनिषद्) २०१. सहवै-उपनिषद्,

२०२. संहितोपनिषद्, २०३. सामरहस्योपनिषद्, २०४. सावित्र्युपनिषद्, २०५. सिद्धान्तविठ्ठलोपनिषद्, २०६. सिद्धान्तशिखोपनिषद्, २०७. सिद्धान्तसारोपनिषद्, २०८. सीतोपनिषद्, २०९. सुदर्शनोपनिषद्, २१०. सुबालोपनिषद्, २११. सुमुख्युपनिषद्, २१२. सूर्यतापिन्युपनिषद्, २१३. सूर्योपनिषद्, २१४. सौभाग्यलक्ष्म्युपनिषद्, २१५. स्कन्दोपनिषद्, २१६. स्वयंवेद्योपनिषद्, २१७. हयग्रीवोपनिषद्, २१८. हंसषोढोपनिषद्, २१९. हंसोपनिषद्, २२०. हेरम्बोपनिषद् ।

आसूपनिषत्सु आरण्यकान्यपि परिगणितानि प्रतिभान्ति । अष्टोत्तरशतोपनिषदां संग्रहो मुम्बईस्थनिर्णयसागरप्रेसद्वारा प्रकाशितोऽस्ति । एकोनाशीत्युत्तरशतसंख्याकानामुपनिषदां संग्रहः मदरासस्थअड्यारपुस्तकालयद्वारा प्रकाशित उपलभ्यते ।

ऋषिप्रणीता वेदसम्बद्धनिबन्धग्रन्थाः
(वेदाङ्गोपाङ्गान्यतमाः)

१. सूत्राणि

(क) वेदाङ्गकल्पसूत्राणि

(ख) उपाङ्गपरिशिष्टसूत्राणि

२. अनुक्रमणिकाः

३. प्रातिशाख्यं च ।

सूत्राणि

वेदाङ्गकल्पसूत्रेषु वेदविहितकर्मणां क्रमपूर्वकव्यवस्थापनस्य परिकल्पनं भवतीत्यत एषां कल्पसूत्राणां वैदिककर्मकाण्डप्रकरणत्वं समवगम्यते। शाखाभेदेन सूत्राणां प्रायशः पार्थक्यं समुपलभ्यते। कल्पसूत्राणि त्रिविधानि वरीवृतति।

१. श्रौतसूत्रम्

श्रौतयज्ञविधाननियमादिज्ञापकम्।

२. स्मार्तसूत्रम्

स्मार्तयज्ञविधानन्यायनियमसंस्कारादिज्ञापकम्।

३. शुल्बसूत्रम्

यज्ञवेदिकुण्डमण्डपादिनिर्माणविधाननियमादिज्ञापकम्।

एतेषु स्मार्तसूत्रं द्विविधमुपलभ्यते।

१. धर्मसूत्रम्

धर्मानुष्ठान-नीतिनियम-न्यायव्यवस्थादिज्ञापकम्।

२. गृह्यसूत्रम्

षोडशसंकारादिविधानगृह्याग्निविधानादिज्ञापकम्।

अनुक्रमणिकाः

वैदिकशाखा-संहितानां यथावत् स्वरूपपरिज्ञापिकाः अनुक्रमणिकाः, विशेषतया ऋषीणां, छन्दसां, देवतानां, सूक्तानुवाकमन्त्रादीनाञ्चानु-

क्रमणिका', याथार्थ्येन वेद-शाखापरिमाणस्वरूपादिपरिज्ञाने नितरां समुपयुक्ताः प्रतीयन्ते। वेदानामध्ययनाध्यापनादिषु मन्त्राणां ऋषिच्छन्दोदेवतानां, सन्धि-योगस्वरादीनाञ्च ज्ञानं वेदपाठिनां कृते पुण्यजनकत्वेन नितरामावश्यकं[1] प्रतिपद्यते।

प्रातिशाख्यम्[2]

अस्मिन् शिक्षाव्याकरणादिविषयाणां प्रमेयविवरणं, वैदिकमन्त्राणां स्वरोच्चारणनियमव्यवस्थापनं, विकृति[3]सन्धिस्वरूपनिर्णयादिकञ्च साङ्गोपाङ्गं, सविस्तरञ्च कृतमभ्युपगम्यते।

---

१. अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥
ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि।
अविदित्वा प्रयुञ्जानोमन्त्र-कण्टक उच्यते॥ (षड्गुरुभाष्यम्)

२. शाखां शाखां प्रति प्रातिशाख्यम्, प्रतिशाखं भवं प्रातिशाख्यं वा। प्रातिशाख्यानुक्रमणिकापरिशिष्टसूत्रादीनां प्रणयनसमयो हि विक्रमपूर्वीयपञ्चशतवर्षेभ्यः पूर्वमासीदिति परिनिश्चीयत इतिहासज्ञैः।

३. प्रातिशाख्यातिरिक्तेषु व्याडिप्रणीतविकृतिवल्लीजटापटलजटावल्यादिग्रन्थेषु वैदिकसहितानां विकृतिस्वरूपविधाऽदिविषयमधिकृत्य वैस्तर्येण कृतं विवरणं समुपलभ्यते। उक्तग्रन्थेषु वेदविकृतयस्तावदष्टसंख्याका विवृता उपलभ्यन्ते। ताश्चेमाः —

जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः॥
(विकृतिवल्ली १–५)

तत्र जटालक्षणम्—

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम्।
अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाऽभिधीयते॥
(जटापटलं)

पुष्पमालालक्षणम्—

माला मालेव पुष्पाणां पदानां ग्रथिनी हि सा।
आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः॥

क्रममालालक्षणम्--

ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोन्ततः ।
अन्तं चादिं नयेदेवं क्रममालेति गीयते ॥

शिखालक्षणम्—

पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ॥

लेखालक्षणम्—

क्रमाद् द्वित्रिचतु.पञ्च पदक्रममुदाहरेत् ।
पृथक् पृथक् विपर्यस्य लेखामाहुः पुनः क्रमात् ॥

ध्वजलक्षणम्—

ब्रूयादादेः क्रमं सम्यगान्तादुत्तारयेद्यदि ।
वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः ॥

दण्डलक्षणम्—

क्रमं मुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् ।
अर्धर्चादेव मुक्तोक्तः क्रमदण्डोऽभिधीयते ॥

रथलक्षणम्—

समे ऋचौ गृहीत्वा च रथवच्चलति क्रमः ।
पादशोऽर्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः ॥

घनलक्षणम्—

अन्तात् क्रमं पठेत् पूर्वं आदिपर्यन्तमानयेत् ।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥

नवीनघनलक्षणम्—

पदद्वयं जटां मुक्त्वा गृहीत्वाऽनन्तरं पदम् ।
द्विवारं च पठित्वा तत् एकवारं तु मध्यमम् ॥
पुनर्द्विवारं प्रथमं मध्यमं चान्त्यमेकदा ।
अयं घन इति प्रोक्त इत्यष्टौ विकृतीः पठेत् ॥

पञ्चसन्धिघन लक्षणम्—

क्रममादौ प्रयुञ्जीत पदमन्त्यं द्विरावृतम् ।
विपर्यासं ततः कृत्वा द्विवारं प्रथमं स्मृतम् ॥
पुनश्च क्रममुच्चार्य पञ्चसन्धेश्च लक्षणम् ॥ (जटावली)

पञ्चसन्धयः—

पदक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा ।
सङ्क्रमश्चेति पञ्चैते भवन्ति क्रमसन्धयः ।। (जटापटलम्)

वेदमन्त्राणां मूलांशप्रक्षिप्तांशयोर्विवेचने पदक्रमपाठौ विशेषतया निकषायेते । मन्त्राणां मात्राक्षरादीनां, ध्वनिवर्णादीनाञ्च प्रक्षेपच्युत्यवसादादि विकारपरिवर्जनार्थं जटाद्यष्टविकृतयः समाविष्कृता अभूवन् । इत्थं वेद-संहितानां स्वराक्षरवर्णमात्राऽदीनां न्यूनत्वातिरिक्तत्वमिथ्याप्रयुक्तत्वादिदोषाणां सर्वथा परिहारार्थं यथावदानुश्रविकवेदमन्त्रसंहितास्वरूप-परिरक्षणार्थं च पदक्रम-जटादिविकृतीनां, प्रतृणसंहितापाठानां समुद्भावनं समभूत् । एतत्पाठ-प्रवर्तकान् समधिकृत्य मधुशिक्षायां प्राह मधुसूदनमुनिः —

भगवान् संहितां प्राह पदपाठन्तु रावणः ।
बाभ्रव्यर्षिः क्रमं प्राह जटां व्यालिरवोचत ।।
मालापाठं वसिष्ठश्च शिखापाठं भृगुस्तथा ।
अष्टावक्रोऽब्रवीद्रेखां विश्वामित्रोऽब्रवीद्ध्वजम् ।।
दण्डं पराशरः प्राह काश्यपो रथमब्रवीत् ।
घनमत्रिमुनिः प्राह विकृतीनामयं क्रमः ।। इति ।

प्रतनैः ऋषिप्रवरैराविष्कृतौ वेदमन्त्रसंहितापाठौ सम्प्रति सम्प्रतिपद्येते । (१) निर्भुजसंहितापाठः तथा (२) प्रतृणसंहितापाठः । तत्र निर्भुज-संहितापाठः मूलमन्त्रसंहितायाः केवलाविकलपाठरूपः तथा प्रतृणसंहिता-पाठो हि मूलमन्त्रसंहितायाः पदक्रमजटाऽद्यष्टविकृतिपाठात्मको भवति ।

तत्र संहितापाठः

यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणि । प्रथमान्यासन् ।

पदपाठः

यज्ञेन । यज्ञं । अयजन्त । देवाः । तानि । धर्माणि प्रथमानि । आसन् ।

क्रमपाठः

यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् । आसन्नित्यासन् ।

जटापाठः

यज्ञेन यज्ञं यज्ञं यज्ञेन यज्ञेन यज्ञम् । यज्ञमयजन्तायजन्त यज्ञं यज्ञमयजन्त । अयजन्त देवाः देवा अयजन्तायजन्त देवाः । देवास्तानि तानि देवाः देवा-

स्तानि । तानि धर्माणि धर्माणि तानि तानि धर्माणि । धर्माणि प्रथमानि प्रथमानि धर्माणि धर्माणि प्रथमानि । प्रथमान्यासन्नासन् प्रथमानि प्रथमान्यासन् । आसन्नित्यासन् ।

पुष्पमालापाठः

यज्ञेन यज्ञं । यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवा अयजन्त । अयजन्त देवाः । देवास्तानि । तानि देवाः । देवास्तानि । तानि धर्माणि । धर्माणि तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् । आसन् प्रथमानि । प्रथमान्यासन् । आसन्नित्यासन् ।

(पुष्प-मालायां पदद्वयात्मक-क्रम-व्युत्क्रम-सङ्क्रमाणां पार्थक्येण जटासदृशः पाठो भवति ।)

क्रममालापाठः

यज्ञेन यज्ञं । आसन् प्रथमानि । यज्ञमयजन्त । प्रथमानि धर्माणि । अयजन्त देवाः । धर्माणि तानि । देवास्तानि । तानि देवाः । तानि धर्माणि । देवा अयजन्त । धर्माणि प्रथमानि । अयजन्त यज्ञं । प्रथमान्यासन् । आसन्नित्यासन् । यज्ञं यज्ञेन ।

शिखापाठः

यज्ञेन यज्ञं यज्ञं यज्ञेन यज्ञेन यज्ञमयजन्त । यज्ञमयजन्तायजन्त यज्ञं यज्ञमयजन्त देवाः । अयजन्त देवाः देवा अयजन्तायजन्त देवास्तानि । देवास्तानि तानि देवाः देवास्तानि धर्माणि । तानि धर्माणि धर्माणि तानि तानि धर्माणि प्रथमानि । धर्माणि प्रथमानि प्रथमानि धर्माणि धर्माणि प्रथमान्यासन् । प्रथमान्यासन्नासन् प्रथमानि प्रथमान्यासन् । आसन्नित्यासन् ।

लेखापाठः

यज्ञेन यज्ञं । यज्ञं यज्ञेन यज्ञेन यज्ञं ॥ यज्ञमयजन्त देवाः । देवा अयजन्त यज्ञं । यज्ञमयजन्त । अयजन्त देवाः ॥ अयजन्त देवास्तानि धर्माणि । धर्माणि तानि देवा अयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि ॥ देवास्तानि धर्माणि प्रथमान्यासन् । आसन् प्रथमानि धर्माणि तानि देवाः । देवास्तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् ॥ तानि धर्माणि । धर्माणि तानि । तानि धर्माणि ॥ धर्माणि प्रथमान्यासन् । आसन् प्रथमानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् ॥ प्रथमान्यासन् । आसन् प्रथमानि । प्रथमान्यासन् । आसन्नित्यासन् ॥

ध्वजपाठः

यज्ञेन यज्ञं । देवा इति देवाः । यज्ञमयजन्त । सन्ति देवाः । अयजन्त देवाः । साध्याः सन्ति । देवास्तानि । पूर्वे साध्याः । तानि धर्माणि । यत्र पूर्वे । धर्माणि प्रथमानि । सचन्त यत्र । प्रथमान्यासन् । महिमानः सचन्ते । आसन्नित्यासन् । नाकं महिमानः । तेह । ह नाकं । ह नाकं । तेह । नाकं महिमानः । आसन्नित्यासन् । महिमानः सचन्ते । प्रथमान्यासन् । सचन्त यत्र । धर्माणि प्रथमानि । यत्र पूर्वे । तानि धर्माणि । पूर्वे साध्याः । देवास्तानि । साध्याः सन्ति । अयजन्त देवाः । सन्ति देवाः । यज्ञेन यज्ञम् ।

दण्डपाठः

यज्ञेन यज्ञं । यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवा अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि देवा अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि । धर्माणि तानि देवा अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमानि धर्माणि तानि देवा अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् । आसन् प्रथमानि धर्माणि तानि देवा अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । देवास्तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् । आसन्नित्यासन् ।

रथपाठः

यज्ञेन यज्ञं । यज्ञं यज्ञेन । यज्ञेन यज्ञं । तानि धर्माणि । धर्माणि तानि । तानि धर्माणि । यज्ञमयजन्त । अयजन्त यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । धर्माणि प्रथमानि । प्रथमानि धर्माणि तानि । तानि धर्माणि । धर्माणि प्रथमानि । अयजन्त देवाः । देवाः अयजन्त । यज्ञं यज्ञेन । यज्ञेन यज्ञं । यज्ञमयजन्त । अयजन्त देवाः । प्रथमान्यासन् । आसन्प्रथमानि धर्माणि तानि । तानि धर्माणि । धर्माणि प्रथमानि । प्रथमान्यासन् । आसन्नित्यासन् । (रथविकृतेः द्विचक्र-त्रिचक्र-चतुश्चक्रेति भेदाः प्रतिपद्यन्ते । अत्र तावत् प्रमाणानि वैदिकैरनुसन्धित्सुभिः गवेषितव्यानि ।)

प्राचीनघनपाठः

आसन्नित्यासन् । यज्ञेन यज्ञं । प्रथमान्यासन् । यज्ञमयजन्त । धर्माणि प्रथमानि । अयजन्त देवाः । तानि धर्माणि । देवास्तानि । देवास्तानि । तानि धर्माणि । अयजन्त देवाः । धर्माणि प्रथमानि । यज्ञमयजन्त । प्रथमान्यासन् । यज्ञेन यज्ञम् ।

नवीनघनपाठः

यज्ञेन यज्ञं यज्ञं यज्ञेन यज्ञेन यज्ञमयजन्तायजन्त यज्ञं यज्ञेन यज्ञेन यज्ञमयजन्त । यज्ञमयजन्तायजन्त यज्ञं यज्ञमयजन्त देवाः देवा अयजन्त यज्ञं यज्ञमयजन्त देवाः । अयजन्त देवाः देवा अयजन्तायजन्त देवास्तानि तानि देवा अयजन्ता यजन्त देवास्तानि । देवास्तानि तानि देवाः देवास्तानि धर्माणि धर्माणि तानि देवाः देवास्तानि धर्माणि । तानि धर्माणि धर्माणि तानि तानि धर्माणि प्रथमानि प्रथमानि धर्माणि तानि तानि धर्माणि प्रथमानि । धर्माणि प्रथमानि प्रथमानि धर्माणि धर्माणि प्रथमान्यासन् आसन् प्रथमानि धर्माणि धर्माणि प्रथमान्यासन् । प्रथमान्यासन्नासन्प्रथमानि प्रथमान्यासन् । आसन्नित्यासन् ।।

पञ्चसन्धयः

(१) यज्ञेन यज्ञं (क्रमसन्धिः), (२) यज्ञं यज्ञं (उत्क्रमसन्धिः), (३) यज्ञं यज्ञेन (व्युत्क्रमसन्धिः), (४) यज्ञेन यज्ञेन (अभिक्रमसन्धिः), (५) यज्ञेन यज्ञं (संक्रमसन्धिः) ।

पञ्चसन्धिघनपाठः

यज्ञेन यज्ञं । यज्ञं यज्ञं । यज्ञं यज्ञेन । यज्ञेन यज्ञेन । यज्ञेन यज्ञं ।। यज्ञेन यज्ञं यज्ञं यज्ञेन यज्ञेन यज्ञमयजन्तायजन्त यज्ञं यज्ञेन यज्ञेन यज्ञमयजन्त ।। यज्ञमयजन्त । अयजन्तायजन्त । अयजन्त यज्ञं । यज्ञं यज्ञं । यज्ञमयजन्त ।। यज्ञमयजन्तायजन्त यज्ञं यज्ञमयजन्त देवाः देवा अयजन्त यज्ञं यज्ञमयजन्त देवाः ।। इत्यादिः ।

संहितापाठतः पुण्यं द्विगुणं पदपाठतः ।
त्रिगुणं क्रमपाठेन जटापाठेन षड्गुणम् ।।

इति वराहपुराणान्तर्गतपद्यानुसारेण पुण्यजनकत्वेन विकृतिपाठानां तावदुत्तरोत्तरं प्राशस्त्यं, महत्त्वं चावगम्येते । आदित्यपुराणे जटादिविकृतिपाठकानां महत्त्वं इत्थं प्रतिपादितमस्ति ।

जटाऽदिविकृतीनां ये पारायणपरायणाः ।
महात्मानो द्विजश्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः ।। इति ।

१. ऋग्वेदः

मन्त्रसंहिता

ऋग्वेदस्य एकविंशतिसंख्याकासु विलुप्तासु शाखासु[1] केवलानां पञ्चानां शाखानां शौनकप्रणीते चरणव्यूहग्रन्थे समुल्लेखः समुपलभ्यते। (१) आश्वलायनशाखा, (२) सांख्यायनशाखा (शाङ्खायनशाखा), (३) शाकलशाखा, (४) बाष्कलशाखा तथा (५) माण्डुकेयशाखा।

---

१. श्रीमद्भागवत (१२।६) वायुपुराण (अ० ६०) ब्रह्माण्डपुराण (अ० ३५) विष्णुपुराण (३।४) मत्स्यपुराणादिषु शैशिरिशिक्षायां च विवृतं वैदिकशाखा-प्रशाखानां प्रभेदविस्तरादिकं संविविच्य तावदार्चशाखानां निम्नविधया वर्गीकरणं भवितुमर्हति। इमं विषयमधिकृत्य एतद्विषयकानुसन्धित्सुभिर्गवेषितव्यम्। प्रस्तुते 'चरण' शब्दः प्रमुखशाखा-वाचकः प्रतिभाति।

(१) शाकलशाखा, इयं पञ्चविधाऽस्ति।

(क) मुद्गला, (ख) गालवा, (ग) शालीया, (घ) वात्स्या, (ङ) शैशिरिशाखा च।

(२) बाष्कलशाखा, इयं चतुर्विधाऽस्ति।

(क) बौध्या, (ख) अग्निमाठरा, (ग) पाराशरी, (घ) जातुकर्ण्य-शाखा च।

(३) आश्वलायनशाखा

(४) शाङ्खायनशाखा, इयं चतुर्विधा विद्यते।

(क) शाङ्खायना, (ख) कौषीतकीया, (ग) महाकौषीतकीया, (घ) शाम्बव्यशाखा च।

(५) माण्डुकेयशाखा, (६) बह्वृचशाखा,
(७) पैङ्ग्यशाखा, (८) उद्दालक (गोतम-आरुण) शाखा,
(९) शतबलाक्षशाखा, (१०) गज (हास्तिक) शाखा,
(११) (१२) (१३) बाष्कलिभारद्वाजशाखाः, तिस्रः,
(१४) ऐतरेयशाखा, (१५) वासिष्ठशाखा,
(१६) सुलभशाखा, (१७) शौनकशाखा च।

समुपलब्धायां, ऋग्वेदीयशाखान्यतमशाकलशाखाया मन्त्रसहितायां हौत्र-मन्त्राणां, याज्यापुरोनुवाक्यामन्त्राणां अनेकविधसूक्तानां तथाऽन्येषां विविधमन्त्राणां बृहत्समुच्चयस्तावत् प्रावर्ह्येण समुपलभ्यते। चरणव्यूहानुसारेणास्यां वालखिल्यांशं[1] विहाय दशमण्डलानि, चतुःषष्टिरध्यायाः, सप्तदशाधिकसहस्र (१०१७) संख्याकानि सूक्तानि, षडुत्तरद्विसहस्र (२००६) संख्याका वर्गाः, अशीत्युत्तरपञ्चशताधिकदशसहस्र (१०५८०) संख्याका ऋचः, पञ्चाशीत्युत्तरपञ्चशताधिकद्विपञ्चाशत्सहस्रोत्तरैकलक्ष (१५२५८५) परिमितानि पदानि च सन्ति[2]।

आर्चशाकलमन्त्रसंहितायाः स्कन्दस्वामि (वै० ७ श०) उद्गीथ (वै० ७ श०) वेंकटमाधव (वै० १२ श०) सायण (वै० १५ श०) मुद्गल (वै० १५ श०) दयानन्द (वै० १९-२० श०)-कपालिशास्त्रिप्रभृतिभिः[3] प्रणीतानि भाष्यविवरणादीनि[4] तस्या वास्तविकाशयावबोधनार्थं नितरां समुपयुक्तानि वरीवृतति।

आर्चशाकलशाखा-संहितायाः[5] पदपाठप्रवर्तकः शाकल्यः (वि० पू० २५०० व० पू०) क्रमपाठप्रवर्तकश्च बाभ्रव्य (वि० पू० १५०० व० पू०) आसीदिति ऐतरेयारण्यकं परिसूचयति।

---

१. वालखिल्यांशे शाकलसंहिताया षष्ठाष्टकीयचतुर्थाध्यायान्तर्गता अष्टादशवर्गाः (१४–३१), एकादशसूक्तानि, अशीतिऋचश्चान्तर्भवन्ति।

२. वैदिकशाखाभेदमन्त्रविभागसंख्यादिविषयमधिकृत्य सीगलिंगसायमेनमेक्डानेलादिपाश्चात्यविपश्चिद्भिः कृतं विवेचनं ज्ञातुं योग्यं प्रतिभाति।

३. अनुपलब्धेषु ऋग्वेदभाष्येषु रावण-हस्तामलक (वै० ८ श०) लक्ष्मण (वै० १२ श०) धातुष्कयज्व (वै० १३ श०) भट्टभास्करादिभिः प्रणीतानि भाष्यादीनि श्रूयन्ते। ऋक्संहितांशं समधिकृत्य आनन्दतीर्थ (वै० १३ श०)-आत्मानन्द (वै० १३ श०) चतुर्वेदस्वामि (वै० १६ श०) प्रभृतिभिः प्रणीताः टीकाः परिश्रूयन्ते।

४. मेक्समूलर - पिटर्सन-जेकाबि - मेक्डानेलादिपाश्चात्यपण्डितैस्तावदार्चसंहितायाः कृतानि विवरण-विवेचनादीनि भृशं ज्ञातुं योग्यानि प्रतिभान्ति।

५. आर्चसंहिताया ऋचः काश्चन परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च भवन्ति। आसु, कासुचित् स्तुतिः, प्रार्थना, आशीर्वादः, विधिः, प्रेरणा, प्रैषः, अवधारणा, प्रवाह्लिका, रहस्यं वा समुपलभ्यते।

ब्राह्मणम्[1]

ऐतरेयब्राह्मणम्[2]

अस्मिन् पञ्चाध्यायात्मिकाः पञ्चिका अष्टसंख्याकाः सन्ति। अस्य गोविन्दस्वामि (वै० १२ श०) प्रणीतं भाष्यं, षड्गुरुशिष्य (वै० १३ श०) कृता सुखप्रदावृत्तिः, सायणाचार्य (वै० १४ श०) विरचितं भाष्यं चोपलभ्यन्ते।

सांख्यायन (शांखायन) कौषीतकीय ब्राह्मणम्[3]

अस्मिन् त्रिंशदध्यायाः सन्ति। अस्य सायणभाष्यं, भट्टविनायक-भाष्यञ्चोपलभ्येते।

आरण्यकोपनिषदः

ऐतरेयारण्यकम्[4]

इदं सायणभाष्योपेतं, षड्गुरुशिष्यकृतमोक्षप्रदावृत्तियुतं च विद्यते। अस्मिन् पञ्चारण्यकानि, तेषु चाष्टादशाध्यायाः सन्ति।

शांखायनारण्यकम्[5]

अस्मिन् पञ्चदशाध्यायाः, सप्तत्रिंशदुत्तरशतसंख्याकानि खण्डानि च वर्तन्ते।

---

१. आरुणेयब्राह्मणं, पैंगिब्राह्मणं, सौलभब्राह्मणं, पराशरब्राह्मणं, बाष्कल-ब्राह्मणं, माण्डुकेयब्राह्मणञ्च पुराणेषु समुल्लिखितं समुपलभ्यते। अस्मिन् विषये जिज्ञासुभिर्मृग्यम्।

२. ऐतरेयब्राह्मणं मार्टिन हॉगमहोदयेन सम्पादितं, १८६३ ईसवीयेऽब्दे मुम्बईशासकेन प्रकाशितमुपलभ्यते।

३. कौषीतकीयब्राह्मणं बी० लिण्डनरमहोदयेन सम्पादितं, १८८७ ईसवीयेऽब्दे जेनायां प्रकाशितमस्ति।

४. ऐतरेयारण्यकं डॉ० कीथद्वारा सम्पादितं, १९०९ ईसवीयेऽब्दे आक्सफोर्डे प्रकाशितम्।

५. शांखायनारण्यकं (१-२ अध्यायौ) डॉ० वाल्टर फ्राइड लण्डरेण सम्पादितं १९०० ईसवीयेऽब्दे बर्लिननगरे प्रकाशितमस्ति। शांखायनारण्यकं (७-१५ अध्यायाः) डॉ० कीथमहोदयेन सम्पादितं १९०९ ईसवीयेऽब्दे आक्सफोर्ड-नगरे प्रकाशितं वर्तते।

ऐतरेयोपनिषद्

अस्याः शंकराचार्यप्रणीतं भाष्यं समुपलभ्यते ।
कौषीतकीयोपनिषद्, बाष्कलोपनिषच्च समुपलब्धे स्तः ।

सूत्राणि

आश्वलायन[1]श्रौतसूत्रम्

इदं सिद्धान्तिभाष्यसहितं, नारायणवृत्तियुतञ्चोपलभ्यते ।

आश्वलायनगृह्यसूत्रम्

इदं देवस्वामिभाष्योपेतं, नारायणवृत्तियुतं, गार्ग्यनारायणवृत्तियुतं, हरिदत्तवृत्तिसहितञ्चोपलभ्यते ।

एतस्य सूत्रद्वयस्य षड्गुरुशिष्यप्रणीता वृत्तिः समुपलभ्यते ।
शांखायनश्रौतसूत्रम् आनर्तीयभाष्ययुतम्,
शांखायनगृह्यसूत्रम् नारायणप्रणीतभाष्यसहितम्,
शांखायनशुल्बसूत्रम् महीधरकृतभाष्योपेतम्,
कौषीतकीयश्रौतसूत्रम् ब्रह्मदत्तकृतटीकायुतम्,
कौषीतकीयगृह्यसूत्रम् भवत्रातप्रणीतभाष्ययुतम्,
शौनकगृह्यसूत्रञ्चोपलभ्यन्ते ।

अनुक्रमणिकाः

ऋष्यनुक्रमणिका

अस्यां २९५ ऋषीणा[2]मनुक्रमोऽस्ति ।

छन्दोऽनुक्रमणिका

अस्यां ५३ छन्दसां परिगणनं विहितमस्ति ।

देवतानुक्रमणिका

अस्यां ७९ मन्त्रदेवतानामनुक्रमो विद्यते ।

---

१. आश्वलायनशांखायनशौनकबाष्कलादिऋषयः वि० पू० २५०० वर्षेभ्यः पूर्वं आसन् । वेदाङ्गकल्पसूत्रप्रणयनसमयखण्डो हि वि० पू० २५००–वि० पू० ५०० वर्षात्मक अनुमीयते ।

२. महर्षि-ऋषि-ऋषीक-ऋषिपुत्रक-श्रुतर्षयः पञ्चविधा वैदिका ऋषयः ।

एतदतिरिक्ता अनुवाकानुक्रमणिका, सूक्तानुक्रमणिका, बृहद्देवता च समुपलभ्यन्ते। इमा अनुक्रमणिकाः शौनकप्रणीताः सन्ति। ऋक्सर्वानुक्रमणिका कात्यायनप्रणीताऽस्ति। इयं ऋक्सर्वानुक्रमणिका उव्वटभाष्ययुता, षड्गुरुशिष्यकृतवेदार्थदीपिकावृत्तिसहिता चोपलभ्यते।

प्रातिशाख्यम्

शौनकप्रणीतेऽस्मिन् ऋक्प्रातिशाख्ये त्रीणि काण्डानि, प्रतिकाण्डं पटलषट्कं, संकलिताः त्र्युत्तरशतसंख्याकाः कण्डिकाश्च विद्यन्ते। अस्मिन् ऋग्विधानं, पादविधानं, वृद्धपरिशिष्टं, सांख्यायनपरिशिष्टम्, आश्वलायनगृह्यपरिशिष्टं, विकृतिपरिशिष्टं च विशिष्यन्ते। व्याडिप्रणीतविकृतिवल्लीग्रन्थ ऋक्परिशिष्टान्यतमोऽस्ति।

आश्वलायन-सांख्यायन (शाङ्खायन) बाष्कलादिशाखानां प्रातिशाख्यानि वाजसनेयीप्रातिशाख्यस्यानन्तभाष्ये समुल्लिखितानि सन्ति; किन्तु सम्प्रति तानि नोपलभ्यन्त इति सम्भाव्यते।

ऋक्प्रातिशाख्यस्य भाष्यवृत्तिव्याख्याः[1] —

ऋक्प्रातिशाख्यभाष्यम्, अज्ञातकर्तृकम्।
ऋक्प्रातिशाख्यभाष्यम्, उव्वटाचार्यप्रणीतम्।
ऋक्प्रातिशाख्यवृत्तिः, आत्रेय-विरचिता।
ऋक्प्रातिशाख्यवृत्तिः, विष्णुमित्रकृता।
ऋक्प्रातिशाख्य व्याख्या, सत्ययशःप्रणीता।
वाक्यदीपिका, अज्ञातकर्तृका।
ऋक्प्रातिशाख्यव्याख्या, अज्ञातप्रणीता।
ऋक्प्रातिशाख्यव्याख्या, पशुपतिनाथकृता च।

---

१. ऋक्प्रातिशाख्यस्यानुवादः फ्रेंचभाषायां एग्नियरमहोदयेन १८५३ ईसवीयेऽब्दे कृतोऽस्ति। अस्य जर्मनभाषायामुपनिबद्धस्य टिप्पणस्य सम्पादनं मैक्समूलरमहोदयेन १८६९ ईसवीये वर्षे कृतमभ्युपगम्यते।

२. यजुर्वेदः

यजुर्वेदो हि कृष्णशुक्लभेदेन द्विधा विभक्तोऽस्ति। मन्त्रसंहिता-ब्राह्मणग्रन्थयोर्मन्त्रसाङ्कर्येण (अविविक्तत्वेन) आध्वर्यवहौत्रयोरव्यवस्थितप्रस्थापनेन च तावद् वैशंपायनीयं यजुः कृष्णयजुरित्यभिधानेन व्यपदिश्यते। याज्ञवल्क्यीये वाजसनेयियजुषि तथाविधं मन्त्रसाङ्कर्यं नोपलभ्यत अपितु मन्त्रब्राह्मणयोर्विविक्तत्वमस्तीतिकृत्वा यजुरिदं शुक्लयजुरितिनाम्ना निगद्यते।

कृष्णयजुर्वेदः

अस्य विलुप्तासु षडशीतिसंख्याकासु शाखासु चरणात्मके द्वे शाखे समुपलभ्येते।

(१) चरकशाखा (२) तैत्तिरीयशाखा च।

चरकशाखा

इयं शाखा शौनकप्रणीते चरणव्यूहग्रन्थे द्वादशविधा परवर्णिताऽस्ति।

१. चरकशाखा[1]
२. आव्हरकशाखा
३. कठशाखा[2]
४. प्राच्यकठशाखा
५. कपिष्ठलकठशाखा
६. चारायणीयशाखा
७. वारायणीयशाखा
८. वार्तान्तवेयशाखा

---

१. ब्रह्माण्डविष्णुवाय्वादिपुराणानुसारेण, पातञ्जलमहाभाष्यस्य काशिकावृत्त्यनुसारेण च चरकशाखायाः प्राच्योदीच्यमाध्यमेतिवर्गत्रये नवविधात्वं समवगम्यते। १. आलम्बिना, २. पालङ्गिना, ३. कामलिना, ४. श्यामायना, ५. काठका, ६. कालापका, ७. आर्चाभिना, ८. आरुणिना, ९. ताण्डिना च। तत्र कालापकाशाखा चतुर्विधाऽस्ति। १. हारिद्रवीया, २. छागलेया, ३. तुम्बरी, ४. उलपा च।

२. कठशाखायाश्चतुश्चत्वारिंशत्संख्याका उपग्रन्थाः (प्रभेदाः) आसन्निति परिश्रूयते।

९. श्वेताश्वतरशाखा ११. पाताण्डनीयशाखा
१०. औपमन्यवशाखा १२. मैत्रायणीयशाखा च।

मैत्रायणीया शाखा षड्विधा प्रतिपादिताऽस्ति।

१. मानवशाखा,[1] २. दुन्दुभशाखा, ३. वाराहकशाखा, ४. छागलेयशाखा,[2] ५. हारिद्रवेयशाखा, ६. श्यामायनीयशाखा च।

मन्त्रसंहिता

प्राक्प्रतिपादितेषु शाखासु सम्प्रति पूर्णतया शाखयोः मन्त्रसंहिताद्वयं तावदुपलभ्यते।

१. मैत्रायणीयसंहिता, २. कठशाखासंहिता[3] च।

ब्राह्मणानि

विविधग्रन्थेषु समुल्लिखितानि सप्त ब्राह्मणानि परिज्ञायन्ते।

१. चरकब्राह्मणम् (ऋग्वेदस्य सायण-भाष्ये (८।६६।१०) समुल्लिखितम्)
२. मैत्रायणीयब्राह्मणम् (बौधायनश्रौतसूत्रे (३०।८) समुल्लिखितम्)
३. काठकब्राह्मणम् (तैत्तिरीयब्राह्मणस्यांशभूतम्)
४. श्वेताश्वतरब्राह्मणम् (याज्ञवल्क्यस्मृतेः बालक्रीडाटीकायामुल्लिखितम्)
५. हारिद्रविकब्राह्मणम् (ऋक्सायणभाष्ये (५।४०।८) समुल्लिखितम्)
६. आव्हरकब्राह्मणम् (नारदीयशिक्षायाः शोभाकरकृतटीकायां, सम्प्रदायपद्धतिग्रन्थे चोल्लिखितम्)

---

१. ऐकेयशाखा मानवशाखान्तर्गता प्रतिभाति।

२. छागलेयहारिद्रवेयशाखाद्वयं मैत्रायणीयशाखाविभेदान्तर्भूतं, कालापकशाखाप्रभेदान्तर्गतं वाऽत्रविषये तावदविप्रत्तिर्न प्रतिभाति।

३. जर्मनीदेशे डॉ० श्रोदरमहोदयेन मैत्रायणीयसंहिता, कठशाखासंहिता च १९१० ईसवीयेऽब्दे सम्पूर्णतया प्रकाशिते समुपलभ्येते। भारते पं० सातवलेकरमहाशयेन उक्तसंहिताद्वयं प्रकाशितमस्ति। कपिष्ठलकठसंहिता चांशिकतया हस्तलिखितरूपेण वाराणसीस्थसरस्वतीभवनपुस्तकालये सुरक्षिताऽस्ति। सा च सम्प्रति श्रीरघुवीरमहोदयेन सम्पादिता दिल्लीनगर्यां प्रकाशिताऽस्ति। कठसंहिताया आदित्यदर्शनदेवपालसोमानन्दपुत्रप्रभृतिभिः प्रणीतानि, सम्प्रति लोपङ्गतानि भाष्यादीनि परिश्रूयन्ते।

७. कङ्कतिब्राह्मणम् (आपस्तम्बश्रौतसूत्रे (१४।२०।४) समुल्लिखितम्)

आरण्यकोपनिषदः

मैत्रायणीयाऽरण्यकम् (चारकबृहदारण्यकम्)

इदं सशांकरभाष्यं, नारायण-प्रकाशात्मयति-रामतीर्थप्रणीतदीपिका-टीकात्रययुतञ्चास्ति ।

मैत्रायणीयोपनिषद् विज्ञानभिक्षुकृताऽलोकटीकायुता विद्यते ।

कठोपनिषद् शांकरभाष्यसहिताऽस्ति ।

श्वेताश्वतरोपनिषद् शांकरभाष्ययुता वर्तते ।

सूत्राणि

मैत्रायणीयं श्रौतसूत्रं, गृह्यसूत्रं च ।

काठक-श्रौतसूत्रं, गृह्यसूत्रं च ।

मानवश्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रं, शुल्बसूत्रञ्च । कुमारिलभट्टप्रणीत-व्याख्यायुतम् ।

वाराहगृह्यसूत्रम् ।

अनुक्रमणिकाः

चारायणीया ऋषिच्छन्दोदेवताऽनुक्रमणिकाः ।

प्रातिशाख्यम्

मैत्रायणीयप्रातिशाख्यं, चारायणीयप्रातिशाख्यं[1] च ।

तैत्तिरीयशाखा

शौनकप्रणीतचरणव्यूहग्रन्थानुसारेण तैत्तिरीया शाखा द्विविधा[2] प्रति-पादिताऽस्ति ।

---

१. लौगाक्षिगृह्यसूत्रस्य देवपालप्रणीतभाष्ये समुल्लिखितमिदं चारायणीयप्राति-शाख्यं सम्प्रति लोपङ्गतमाभाति ।

२. ब्रह्माण्डविष्णुवाय्वादिपुराणानुसारेण, आनन्दसंहिताऽनुसारेण च तैत्तिरीया शाखाऽष्टविधा प्रतिपद्यते । (१) औखेया, (२) आत्रेया, (३) वैखानसा, (४) खाण्डिकीया, (५) वाघूला, (६) कौण्डिन्या, (७) अग्निवेशीया, (८) हारीताशाखा च । आसु शाखासु तावदौखेयाऽत्रेयखाण्डिकीयातिरिक्ताः पञ्च शाखाः केवलाः सौत्रशाखाः सन्ति । अस्मिन् विषये वैदिकैरनुसन्धित्सुभि-स्तत्त्वं मृग्यम् ।

१. औख्य (औखेय) शाखा, २. खाण्डिकेयशाखा च।

तत्र खाण्डिकेयशाखा पञ्चविधा[1] समुल्लिखिताऽस्ति।

१. आपस्तम्बीशाखा, २. बौधायनी शाखा, ३. सत्याषाढीशाखा, ४. हिरण्यकेशीशाखा, ५. औधेयीशाखा च।

मन्त्रसंहिता

उपर्युल्लिखितानां पञ्चानां सौत्रशाखानां संहितामन्त्रभेदो न प्रतिभाति। अस्ति चेत् क्वाचित्कः। सूत्रभेदो हि सर्वासां शाखानां वरीवर्ति। अस्यां संहितायां (तैत्तिरीय-खाण्डिकेयमन्त्रसंहितायां) सप्त काण्डानि, चतुश्चत्वारिंशत् (४४) प्रश्नाः, एकपञ्चाशदधिकशतकषट्क (६५१) संख्याका अनुवाकाः, अष्टनवत्युत्तरैकशताधिकद्विसहस्र (२१९८) संख्याकाः कण्डिकाः, नवत्युत्तरद्विनवतिसहस्राधिकलक्ष (१९२०९०) संख्याकानि पदानि, अष्टषष्ट्युत्तराष्टशताधिकत्रिपञ्चाशत्सहस्राधिकलक्षद्वय (२५३८६८) संख्याकान्यक्षराणि च वर्तन्ते।

मन्त्रसंहितायामस्यां प्रवर्हतया श्रौतयज्ञानां अग्न्याधान-अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्य-आग्रयण-निरूढपशुबन्ध-सौत्रामणि-अग्निष्टोम-उक्थ्य-षोडश्यतिरात्र-आप्तोर्याम-वाजपेय-महाग्निचयन-पौरोडाश-सोम-याजमान्य-राजसूय-अश्वमेध-पुरुषमेध- सर्वमेध-दक्षिणावद् - अदक्षिणावत्-सहस्रदक्षिणावदादीनां विधानम्, आध्वर्यवविधेः विवेचनञ्च समुपलभ्येते।

तैत्तिरीयसंहितायाः[2] कौशिक (वि० पू० २००० व० पू०)-भट्टभास्कर (वै० ११ श०)-सायणाचार्य (वै० १४-१५ श०)-वेंकटेश शत्रुघ्न (वै० १६ श०) आदिभिः प्रणीतानि भाष्यादीनि समुपलभ्यन्ते। वृत्तिकार-कौण्डिन्य (वि० पू० २००० व० पू०) भवस्वामि (वै० ७ श०) गुहदेव

---

१. खाण्डिकेया शाखा वाराणस्यां प्रकाशिते चरणव्यूहग्रन्थस्य संस्करणे इत्थं पञ्चविधा प्रतिपादिताऽस्ति। (१) कालेता, (२) शाट्यायनी, (३) हैरण्यकेशी, (४) भारद्वाजी, (५) आपस्तम्बी च।

२. तैत्तिरीयसंहिताया आंग्लभाषायामनुवादः डॉ० कीथमहोदयेन कृतः, हार्वर्ड ओरिएन्टल-सिरीज्द्वारा प्रकाशितश्च (१९१४ ई० अब्दे) समुपलभ्यते।

(वै० ७ श०) क्षुर (वै० १३ श०) हरदत्त (वै० १३ श०) आदिभिः कृतानि विवरणभाष्यादीनि सम्प्रति सम्भवत अनुपलभ्यन्ते। तैत्तिरीय-संहितायाः पदपाठप्रवर्तक आत्रेय (वि० पू० २००० व० पू०) आसीत्।

ब्राह्मणम्

तैत्तिरीयब्राह्मणम्[1] उक्तसौत्रशाखापञ्चकसाधारणमस्ति। अस्य भव-स्वामिकृतं भाष्यं,[2] भट्टभास्करप्रणीतं भाष्यं, सायणभाष्यं च नितरामु-पादेयानि प्रतिभान्ति।

ब्राह्मणेऽस्मिन् अष्टकत्रयम्, अष्टविंशतिप्रपाठकाः त्रिपञ्चाशदुत्तरत्रिशत (३५३) संख्याका अनुवाकाः (दशकाः) च विद्यन्ते।

आरण्यकोपनिषदः

तैत्तिरीयारण्यकानि षट्संख्यानि सन्ति। इमानि वरदराज[3]-भट्ट-भास्कर-सायणाचार्यप्रणीतभाष्ययुतानि वर्तन्ते।

तैत्तिरीयोपनिषदः, चतस्रः शंकराचार्य-वरदराज-भट्टभास्कर-सायणा-चार्यैः प्रणीतैर्भाष्यैः परिमण्डिता उपलभ्यन्ते।

सूत्राणि

आपस्तम्बकल्पसूत्रम् (श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रं, शुल्ब[4]सूत्रं च।) आपस्तम्बश्रौतसूत्रं, धूर्तस्वामि-रामाग्निचित्-रुद्रदत्तप्रणीतैर्व्याख्या-

---

१. भाषिकसूत्रे (३।२६) औखेयखाण्डिकेयब्राह्मणयोरुल्लेखः समुपलभ्यते। तैत्तिरीयब्राह्मणं सायणभाष्यसहितं पुण्यपत्तनस्थानन्दाश्रममुद्रणालयद्वारा १८९९ ईसवीये वर्षे विशुद्धं प्रकाशितमुपलभ्यते। भट्टभास्करप्रणीतभाष्ययुतं तैत्तिरीयब्राह्मणं १९०८–१९२१ ईसवीयाब्देषु मैसूरनगरे प्रकाशितमस्तीति परिज्ञायते।

२. अस्य भाष्यस्योल्लेखः तैत्तिरीयब्राह्मणस्य भट्टभास्करभाष्ये समुपलभ्यते।

३. जर्मनपण्डितआफ्रेख्टमहोदयस्य संस्कृतग्रन्थानां बृहत्सूचीपत्रे वरदराजप्रणीत-भाष्यस्योल्लेखः समुपलभ्यते।

४. आपस्तम्बशुल्बसूत्रे ज्यामितेस्त्रिकोणमितेश्च सिद्धान्तानां, नियमादीनां च विवरणं समुपलभ्यते।

वृत्तिभाष्यैर्युतमुपलभ्यते । आपस्तम्बगृह्यसूत्रं, हरदत्त-सुदर्शनाचार्य-प्रभृतिभिः प्रणीताभिर्वृत्तिव्याख्याभिः सहितं विद्यते । आपस्तम्बधर्मसूत्रम् उज्ज्वलावृत्तिसहितं समुपलभ्यते । आपस्तम्बशुल्बसूत्रं, कपर्दिस्वामि-करविन्द-सुन्दरराजविरचिताभिर्व्याख्याभिरलङ्कृतमस्ति ।

हिरण्यकेशीयसत्याषाढश्रौतसूत्रम्
हिरण्यकेशीयसत्याषाढगृह्यसूत्रम्

अनयोः श्रौतसूत्रं वाञ्छेश्वरयज्वकृतव्याख्यासहितमस्ति । एते सूत्रे महादेवप्रणीतवैजयन्तीटीकायुते, गोपीनाथकृतज्योत्स्नासहिते, महा-देवशास्त्रिप्रणीतप्रयोगचन्द्रिकायुते च वर्तेते ।

बौधायन श्रौत-धर्म-गृह्य-शुल्बसूत्राणि

एषु बौधायनश्रौतसूत्रं, वासुदेवदीक्षितकृतव्याख्यायुतमस्ति । बौधा-यनधर्मसूत्रं, गोविन्दस्वामिप्रणीतविवरणोपेतमुपलभ्यते ।

भारद्वाजश्रौतसूत्रं, गृह्यसूत्रं च ।

वैखानसश्रौतसूत्रं, स्मार्तसूत्रं च ।

वाघूलगृह्यसूत्रं, तैत्तिरीयकठसूत्रं च ।

अनुक्रमणिकाः

आत्रेयानुक्रमणिका, चारायणीयानुक्रमणिका चोपलभ्येते । अनयोः ऋषिच्छन्दोदेवतानामनुक्रमणिकाः सन्ति ।

प्रातिशाख्यम्

तैत्तिरीयप्रातिशाख्यम्

अस्य भाष्यव्याख्याटीकाः —

आत्रेयप्रणीतं तैत्तिरीयप्रातिशाख्यभाष्यं, वररुचिविरचितं तैत्ति-रीयप्रातिशाख्यव्याख्यानं, माहिषेयकृतं तैत्तिरीयप्रातिशाख्यभाष्यं, सोमयार्यप्रणीता तैत्तिरीयप्रातिशाख्यव्याख्या, पद्मनाभकृतं तैत्तिरीय-प्रातिशाख्यविवरणं, अज्ञातकर्तृकं वैदिकभूषणं,[1] वीरराघवप्रणीतः शब्द-

---

१. इदं अड्यारराजकीयहस्तलिखितपुस्तकालये सुरक्षितमस्ति ।

ब्रह्मविलासः,[1] भैरवाचार्यविरचिता वर्णक्रमदर्पणव्याख्या, गार्ग्यगोपालयज्वप्रणीतं वैदिकाभरणं च।

शुक्लयजुर्वेदः

शौनकप्रणीतचरणव्यूहग्रन्थानुसारेण शुक्लयजुर्वेदीया वाजसनेयीशाखाः[2] पञ्चदशविधाः निम्नलिखिता आसन्।

१. काण्वा, २. माध्यन्दिना, ३. श्यावीया, ४. स्थापायनीया, ५. कापाला, ६. पौण्ड्रवत्सा, ७. आवटिका, ८. परमावटिका, ९. पाराशर्या, १०. वैधेया, ११. वैनेया, १२. औधेया, १३. गालवा,[3] १४. बैजवा, १५. कात्यायनीया शाखा च।

अपरे चरणव्यूहग्रन्थस्य संस्करणे वाजसनेयीशाखाः पञ्चदशविधा इत्थं परिज्ञायन्ते।

१. जाबाला,[4] २. बौद्धायना, ३. काण्वा, ४. माध्यन्दिनेया, ५.

---

१. अयं ग्रन्थः मदरासराजकीयहस्तलिखितपुस्तकालये समुपलभ्यते।

२. शुक्लयजुष वाजसनेयीशाखाऽऽविर्भावविषयकं, याज्ञवल्क्यविषयकञ्च पुराकथाविवरणं श्रीमद्भागवते (१२।६) विष्णुपुराणे च समुपलभ्यते।

३. ब्रह्माण्डविष्णुवाय्वादिपुराणानुसारेण वाजसनेयीशाखान्तर्गतायाः गालवशाखायाः चतुर्विंशतिप्रभेदाः प्रतिपद्यन्ते। १. काणा, २. कुब्जा, ३. सारस्वता, ४. अंगजा, ५. वंगजा, ६. भृंगजा, ७. यावना, ८. शैवजा, ९. पालीभद्रा, १०. नैलवा, ११. वैतानला, १२. जनिश्रवा, १३. भद्रका, १४. सौभरा, १५. कुथिश्रवा, १६. बौध्यका, १७. पाञ्चालजा, १८. ऊर्ध्वाङ्गजा, १९. कुशेन्द्रवा, २०. पुष्करणीया, २१. जयत्रवारा, २२. ऊर्ध्वरेतसा, २३. कथसा, २४. पालाशनीया च।

४. इत्थं वाजसनेयीशाखान्तर्गताया जाबाला शाखाया अपि षड्विंशतिप्रभेदाः प्रतिपद्यन्ते। १. उत्कला, २. मैथिला, ३. शवर्या, ४. कौशीला, ५. तन्तिला, ६. बर्हिशीला, ७. खेटवा, ८. डोम्भिला, ९. गोभिला, १०. गौरवा, ११. सौभरा, १२. जृम्भका, १३. पौण्ड्रका, १४. हरिता, १५. शौण्डका, १६ रोहिणा, १७ माभरा, १८ लैंगवा, १९. माण्डवा, २०. भारवा, २१. चौभगा, २२. टौनका, २३. हिरण्यश्रृंगा, २४. कारुण्वेया, २५. धूम्राक्षा, २६. कापिला च।

शाफेया, ६. तापनीया, ७. कपोला, ८. पौण्डरवत्सा, ९. आवटिका, १०. परमावटिका, ११. पाराशरा, १२, वैणेया, १३. वैधेया, १४. अद्धा, १५. बौधेया शाखा च।

एतासु पञ्चदशशाखासु प्रसिद्धे, पूर्णतयोपलब्धे चेमे शाखेऽस्तः।

१. माध्यन्दिनशाखा, २. काण्वशाखा च।

माध्यन्दिनशाखा

मन्त्रसंहिता

अस्यां मन्त्रसंहितायां चत्वारिंशत्संख्याका अध्यायाः सन्ति। अस्या अन्तिमोऽध्यायो हि संहितोपसंहाररूप ईशावास्योपनिषन्नाम्ना प्रसिद्धोऽस्ति। अस्याः संहिताया भाष्यकाराः शौनक (वि० पू० २००० व० पू०)-हरिस्वामि (वै० ७ श०)-उव्वट (वै० ११ श०)-गौरधर (वै० १४ श०)-महीधर (वै० १७ श०)-दयानन्दस्वामि (वै० १९-२० श०) प्रभृतय आसन्। माध्यन्दिनशाखासंहितायाः पदपाठप्रवर्तको माध्यन्दिनि (वि० पू० २००० व० पू०) रासीत्।[1]

ब्राह्मणम्

माध्यन्दिनशतपथब्राह्मणम्[2]

अस्मिन् शतसंख्याका अध्यायाः, चतुर्दशकाण्डानि, अष्टषष्टिसंख्याकाः प्रपाठकाश्च सन्ति। एतस्मिन् परिशेषसंग्रहरहस्यादिकं विवृतं वरीवर्ति। अस्य हरिस्वामि (वै० ७ श०)-उव्वट (वै० ११ श०) सायण (वै० १४ श०)-महीधर (वै० १७ श०) प्रभृतिभिः प्रणीतानि भाष्यविवरणादीनि भृशमुपयुक्तानि वर्तन्ते।

---

१. माध्यन्दिनिप्रणीतशुक्लयजुषः पदपाठ ग्रन्थावलोकनेनेदं स्फुटीभवति।

२. वाजसनेयीशाखासम्बद्धस्य जाबालब्राह्मणस्य याज्ञवल्क्यस्मृतेर्बालक्रीडाटीकायां, गालवब्राह्मणस्य च पातञ्जलमहाभाष्ये (१.१.४४) चोल्लेखः समुपलभ्यते। माध्यन्दिनशतपथब्राह्मणं वेबरमहोदयेन सम्पादितं, १९२४ ईसवीयेऽब्दे लिपझिक् (जर्मनी) नगरे प्रकाशितमस्ति। इदं सायणभाष्ययुतं सत्यव्रतसामश्रयिणा सम्पादितं १९०३ ईसवीये वर्षे कलिकातास्थएशियाटिकसोसाइटि आफबेंगालद्वारा प्रकाशितं चावगम्यते।

आरण्यकोपनिषदः

माध्यन्दिनबृहदारण्यकम्

अस्मिन् षडध्यायाः, चतुश्चत्वारिंशद् ब्राह्मणानि च सन्ति। अस्य भर्तृप्रपञ्चप्रणीता टीका, द्विवेदगङ्गकृता मुख्यार्थप्रकाशिका टीका च समुपलभ्येते।

ईशावास्योपनिषद् उव्वटप्रणीतभाष्यसहिताऽस्ति।

सूत्राणि

कात्यायनकल्पसूत्रम् (श्रौतधर्मगृह्यशुल्बसूत्राणि)

इदं कर्कभाष्युतं, देवयाज्ञिकप्रणीतभाष्यसहितं च विद्यते।

अस्य महीधरकृता वृत्तिः, विद्याधरकृता सरलावृत्तिश्चोपलभ्येते। बैजवगृह्यसूत्रं, श्रौतसूत्रं च।

लौगाक्षिगृह्यसूत्रं देवपालप्रणीतभाष्यसहितमस्ति।

गोभिलीयगृह्यसूत्रं भट्टनारायणकृतभाष्ययुतं, विद्यालङ्कारप्रणीत-भाष्यसहितं च विद्यते।

कात्यायनाष्टादशपरिशिष्टसूत्राणि

१. ज्योतिःशास्त्रसूत्रं, २. सामुद्रिकसूत्रं, ३. प्रतिज्ञासूत्रं, ४. अनुवाकाध्यायः, ५. चरणव्यूहः, ६. श्राद्धसूत्रं, ७. शुल्बसूत्रं, ८. पार्षदपरिशिष्टसूत्रं, ९. ऋग्यजुःपरिशिष्टसूत्रं, १० इष्टकापूरणपरिशिष्टसूत्रं, ११. प्रवराध्यायः, १२. उक्थशास्त्रपरिशिष्टसूत्रं, १३. क्रतुसंख्या, १४. निगमपरिशिष्टसूत्रं, १५. यज्ञपार्श्वपरिशिष्टसूत्रं, १६. हौत्रकपरिशिष्टसूत्रं, १७. प्रसवोत्थानपरिशिष्टसूत्रं, १८. कूर्मलक्षणपरिशिष्टसूत्रं च।

अनुक्रमणिकाः

कात्यायनीयऋषिच्छन्दोदेवताऽनुक्रमणिकाः, यास्कप्रणीता याजुषसर्वानुक्रमणिका च।

प्रातिशाख्यम्

कात्यायनेन (वि० पू० २००० व० पू०) प्रणीतस्य माध्यन्दिनप्रातिशाख्यस्य विवरणभाष्यवृत्तिव्याख्याः निम्नलिखिताः सन्ति।

कात्यायनप्रातिशाख्यव्याख्यानं उव्वट (वै० ११ श०) प्रणीतं,
कात्यायनप्रातिशाख्यशिवभाष्यं शिवरामचन्द्र (वै० १६ श०) विरचितं,
कात्यायनप्रातिशाख्यभाष्यं अनन्तभट्ट (वै० १७ श०) प्रणीतं,
ज्योत्स्नावृत्तिः श्रीरामशर्म (वै० १८ श०) कृता,
कात्यायनप्रातिशाख्यदीपिका रामाग्निहोत्रि (वै० १९ श०) प्रणीता,
कात्यायनप्रातिशाख्यविवरणं अज्ञातकर्तृकं चोपलभ्यन्ते ।

काण्वशाखा[1]

मन्त्रसंहिता

एषा सायण (वै० १५ श०)-आनन्दबोध (वै० १६ श०)-अनन्ताचार्य (वै० १७ श०) आदिप्रणीतैर्भाष्यैर्युताऽस्ति । अस्या अंशं समधिकृत्य व्याख्याकृतः कालनाथः (वै० १३ श०), यजुर्मञ्जरीकारः, ब्राह्मणसर्वस्वकारः हलायुधः (वै० १३ श०), पारस्करमन्त्रभाष्यकारो मुरारिमिश्रश्च (वै० १४ श०) परिज्ञायन्ते ।

शतपथब्राह्मणम्[2]

अस्मिन् सप्तदशकाण्डानि, चतुरुत्तरशत (१०४) संख्याका अध्यायाश्च सन्ति । सम्प्रति सार्धत्रयोदशैव काण्डानि समधीयन्त इति स्थितिः ।

---

१. वाजसनेयीकाण्वशाखायाः पञ्चदशविभेदाः परिज्ञायन्ते—१. काण्वा, २. कठा, ३. पिञ्जुलकठा, ४. जृम्भककठा, ५. औदलकठा, ६. सपिच्छलकठा, ७. मुद्गलकठा, ८. शृगलकठा, ९. सौभरकठा, १०. मौरसकठा, ११. चञ्चुकठा, १२. योगकठा, १३. हंसलककठा, १४. दौसलकठा, १५. घोषकठा च ।

वेदानां विशेषतया यजुषः शाखाविभेदप्रकारादिविषयमधिकृत्य कृतं विवरणं प्रपञ्चहृदयग्रन्थे, दिव्यावदानबौद्धग्रन्थे, भगवद्दत्तप्रणीतवैदिकवाङ्मयेतिहासग्रन्थे च वैस्तर्येण समुपलभ्यते ।

२. इदं कैलेण्डमहोदयेन सम्पादितं १९२६ ईसवीयेऽब्दे लाहोरस्थपंजाबसंस्कृतबुकडिपोद्वारा प्रकाशितमस्ति ।

आरण्यकोपनिषदः

काण्वबृहदारण्यकम्

अस्मिन् षडध्यायाः, सप्तचत्वारिंशत् (४७) संख्याकानि ब्राह्मणानि च सन्ति । एतस्य भाष्यव्याख्यानादीनि निम्नलिखितानि समवगम्यन्ते ।

शाङ्करभाष्यं, विज्ञानभिक्षुभाष्यं, आनन्दतीर्थभाष्यं, व्यासतीर्थभाष्यं, रङ्गरामानुजभाष्यं, सायणाचार्यभाष्यञ्च ।

परब्रह्मप्रकाशिकाटीका—	रघूत्तमः,
दीपिकाव्याख्या—	गंगाधरेन्द्रः,
मिताक्षराव्याख्या—	नित्यानन्दः,
लघुवृत्तिः -	मथुरानाथः,
बृहदारण्यकोपनिषद्खण्डार्थः—	राघवेन्द्रः,
बृहदारण्यकोपनिषदर्थसंग्रहः—	राघवेन्द्रः,
दीपिकाटीका—	नारायणः ।

काण्वईशावास्योपनिषद् शांकरभाष्यसहिताऽस्ति ।

सूत्राणि

कात्यायन श्रौत-धर्म-गृह्य-शुल्बसूत्राणि,

पारस्कर (कातीय) गृह्यसूत्रम्, कण्डिकापरिशिष्टसहितम्,

कात्यायनप्रणीतभाषिकसूत्रम्

पारस्करगृह्यसूत्रस्य भाष्यादीनि कर्काचार्य-जयरामभट्ट-हरिहर-गदाधर-विश्वनाथादिप्रणीतान्युपलभ्यन्ते । कण्डिकापरिशिष्टस्य कामदेव-दीक्षितकृतं भाष्यं चोपलभ्यते ।

अनुक्रमणिकाः

ऋषिच्छन्दोदेवतानामनुक्रमणिकाः सन्ति ।

प्रातिशाख्यम्

काण्वप्रातिशाख्यम्[1] वाजसनेयी[2]शाखाऽन्यतमाया अस्याः शाखायाः महत्त्वं समावहति ।

---

१. त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषा शाखान्तराः स्मृताः ॥

पाठान्तरेण वा

मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः ॥

(त्रिगुणं, उदात्तानुदात्तस्वरितेतिस्वरत्रयसहितम्)

इति कात्यायनपरिशिष्टान्यतमचरणव्यूहग्रन्थानुसारेण श्रौतयज्ञादि-कर्मसु कृष्ण-यजुषः प्राधान्यमन्वाख्यातं प्रतिभाति । यतो हि कृष्णयजुष एव मन्त्रसंहिताब्राह्मणग्रन्थयोः पाठः उदात्तानुदात्तस्वरितेतित्रिभिः स्वरैर्भवितु-मर्हति । अत्र विषये तत्त्वं वैदिकैरनुसन्धित्सुभिर्मृग्यमिति भाति ।

२. 'अन्नं वै वाजः' वाजस्य-अन्नस्य, सनिः-दानं, अस्ति यस्य महर्षेः, सोऽयं वाजसनिः तस्य पुत्रो वाजसनेयो याज्ञवल्क्यः, तेनाधीता शाखा वाजसनेयी इति काण्वसंहिताभाष्यभूमिकायां सायणाचार्यः ।

३. सामवेदः

सामवेदस्य सहस्रसंख्याकाः शाखा[1] आसन्। अनध्यायेष्वधीतास्ताः शक्रेण वज्रेणाभिहताः प्रणष्टाः समभूवन्। चरणव्यूहग्रन्थे समवशिष्टषट्-संख्याकानां शाखानामुल्लेख इत्थंविधया सम्प्रतिपद्यते।

१. आसुरायणीया, २. वासुरायणीया, ३ वार्तान्तरेया, ४. प्राञ्जल-ऋग्वैनविधा, ५. प्राचीनयोग्या, ६. राणायनीया च।

तत्र राणायनीयाशाखा नवविधाऽस्ति—

१ राणायनीया, २. शाट्यायनीया, ३. सात्यमुद्गला, ४. खल्वला, ५. महाखल्वला, ६. लाङ्गला, ७. कौथुमी, ८. गौतमी, ९. जैमिनीया च।

---

१. प्रपञ्चहृदयग्रन्थे समुल्लिखिताः सामवेदीयाः तलवकार-छन्दोग-शाट्यायन-राणायनि-दुर्वासस-भागुरि-गौ-स्तलवकाराल्लि-सावर्ण्य-गार्ग्य-वार्षगण्य - औपमन्यवेति द्वादशशाखा अवगम्यन्ते।

दिव्यावदानबौद्धग्रन्थे च सामवेदीयानां विलुप्तानां सहस्रसंख्याकानां शाखानां परिगणनं निम्नस्थूलविधाभिः कृतं समुपलभ्यते।

सामवेदीयाः	शीलवल्कशाखा. पञ्चविंशतिसंख्याकाः	(२५)
	लौकाक्षाशाखाः चत्वारिंशत्संख्याकाः	(४०)
	कौथुमशाखाः शतसंख्याकाः	(१००)
	ब्रह्मसमशाखाः शतसंख्याकाः	(१००)
	महासमशाखाः पञ्चशतसंख्याकाः	(५००)
	महायाजिकशाखाः शतसंख्याकाः	(१००)
	सात्यमुग्रशाखाः शतसंख्याकाः	(१००)
	समन्तवेदशाखाः शतसंख्याकाः	(१००)

इत्थं सामवेदीयाः सर्वाः शाखाः पञ्चषष्ट्युत्तरसहस्रसंख्याकाः परिगण्यन्ते। इमाः साम्नः शाखाः संहत्य सहस्राधिकाः कथं भवितुमर्हन्तीति जिज्ञासुभिर्विवेक्तव्यम्।

कौथुमीशाखाऽपि षड्विधा प्रतिपादिताऽस्ति । ताश्चेमाः—

१. कौथुमी, २. आसुरायणी, ३. वातायनी, ४ प्राञ्जलिद्वैनभृता, ५ प्राचीनयोग्या, ६. नैगमीया च ।

तलवकारशाखा जैमिनीयशाखाया एका प्रशाखाऽस्ति । उक्तासु सामवेदीयशाखा[1]स्वपि बहव्यः सम्प्रति लुप्ताः प्रतिभान्ति ।

इदानीं प्राधान्येनाध्ययनाध्यापनादिषु पूर्णतया समुपलब्धाः तिस्रः शाखाः परिज्ञायन्ते ।

१. कौथुमीशाखा, सौराष्ट्रप्रदेशे उत्तरभारते च प्रसिद्धा ।
२. राणायनीया शाखा महाराष्ट्रप्रदेशे प्रसिद्धा ।
३. जैमिनीया शाखा कर्नाटककेरलप्रदेशयोः प्रसिद्धा ।

मन्त्रसंहिता

उपर्युक्तानां आसां तिसृणां शाखासंहितानां भाष्यविवरणादिप्रणेतारः निम्नलिखिताः परिज्ञायन्ते ।

माधवाचार्यः (वै० ७ श०), गुणविष्णुः[2] (वै० १३ श०), भरतस्वामी (वै० १४ श०), महास्वामी (वै० १४ श०), शोभाकरभट्टः (वै० १४ श०), सायणाचार्यः (वै० १५ श०), सूर्यदैवज्ञः (वै० १६ श०) आदयः ।

राणायनीया संहिता पूर्वार्चिकोत्तरार्चिकस्तोभविभागेषु विभक्ताऽस्ति । पूर्वार्चिकोत्तरार्चिकयोर्ग्रामगेयानि गानानि (वेयगानानि) आरण्यगानानि, ऊहगानानि, ऊह्यगानानि च सङ्कलितानि सन्ति ।

---

१. ब्रह्माण्डविष्णुवाय्वादिपुराणेषु, इतरेषु ग्रन्थेषु च लुप्तानां कतिपयसामवेदीयशाखानां निम्नलिखितानि नामानि समुपलभ्यन्ते । सात्यमुग्रा, नैगेया, शार्दूला, वार्षगण्या, भाल्लवि, कालबवि, रौरुकि, कापेया, माषशराव्या, करद्विषा, शाण्डिला, ताण्ड्या, कापोला, महाकापोला, लाङ्गलायनाऽऽद्याः । एतद्विषयकं विस्तृतं विवरणं भगवद्दत्तप्रणीते वैदिकवाङ्मयेतिहासग्रन्थे समुपलभ्यते । अस्मिन् विषये वेदसंशोधकैर्विवेक्तव्यमिति भाति ।

२. गुणविष्णुप्रणीतं छान्दोग्यमन्त्रभाष्यं समुपलभ्यते ।

सामसंहितायां अशीत्युत्तरशत (१८०) संख्याकानि अग्निसूक्तानि, चतुरुत्तरशत (१०४) संख्याकानि पवमानसूक्तानि, षड्विंशति (२६) संख्याकानि इन्द्रसूक्तानि च वर्तन्ते। इमानि सर्वाणि सामगणात्मकानि वरीवृतति। अस्यां संहितायां चतुर्दशोत्तर-अष्टशताधिक-अष्टसहस्रसंख्याकाः साममन्त्राः, सप्तत्युत्तरनवशत (९७०) संख्याकाः सुपर्णप्रोक्श्यवाल-खिल्यमन्त्राश्चोपलभ्यन्ते।

सामगानादिषु, उदात्तानुदात्तस्वरितेति त्रयाणां स्वराणां स्थाने प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-क्रुष्ट-अतिस्वारेति सप्तस्वराणां, आरोहा-वरोहविधाभ्यां समुपयोगो[1] भवति।

सामवेदस्य पदपाठस्य प्रवर्तको गार्ग्य आसीत्।

ब्राह्मणानि

१. ताण्ड्य (पञ्चविंश) ब्राह्मणम्[2]

अस्मिन् पञ्चविंशतिप्रपाठकाः, सप्तचत्वारिंशदुत्तरत्रिशत (३४७) संख्याकानि च खण्डानि सन्ति। अस्य जयस्वामि (वै० ७ श०) प्रणीतं भाष्यं, सायणाचार्य (वै० १५ श०) विरचितं भाष्यं, नारायणाचार्य[3]-कृतं भाष्यं चोपलभ्यन्ते।

२. षड्विंशब्राह्मणम्[4]

अस्मिन् पञ्चप्रपाठकाः, अष्टचत्वारिंशत् (४८) संख्याकानि खण्डानि च वर्तन्ते। अस्य सायणाचार्यप्रणीतं भाष्यं, विज्ञापनभाष्यं च समुपलभ्येते।

---

१. वस्तुतस्तु सम्प्रति कौथुमीयराणायनीयसामगायनेषु पञ्चाधिकाः स्वराः प्रयुक्ता नानुभूयन्ते।

२. इदं आनन्दचन्द्रवेदान्तवागीशेन सम्पादितं १८७० ईसवीयेऽब्दे कलिकातास्थ-एशियाटिकसोसाइटिआफ्बेंगालद्वारा प्रकाशितमस्ति।

३. राजकीयहस्तलिखितपुस्तकालये, मैसूरनगरे सुरक्षितमस्ति।

४ इदं ससायणभाष्यं जीवानन्दविद्यासागरेण सम्पादितं, १८८१ ईसवीयेऽब्दे कलिकातायां प्रकाशितम्। इदं विज्ञापनभाष्ययुतं एच्० एफ्० ईलसिंहेन सम्पादितं, १९०८ ईसवीयेऽब्दे लिडेननगरे प्रकाशितम्।

३. सामविधानब्राह्मणम्[1]

इदं भरतस्वामिप्रणीतभाष्ययुतं, सायणाचार्यविरचितभाष्यसहितञ्च समुपलभ्यते। अस्मिन् प्रपाठकत्रयं, पञ्चविंशतिखण्डानि च सन्ति।

४. आर्षेयब्राह्मणम्[2]

इदं भट्टभास्करप्रणीतसामवेदार्षेयदीपभाष्ययुतं, सायणकृतभाष्य-सहितं चास्ति। अस्मिन् त्रयः प्रपाठकाः द्व्यशीतिखण्डानि च वर्तन्ते।

५. दैवतब्राह्मणम्[3]

इदं सायणाचार्यप्रणीतभाष्ययुतं वरीवर्ति। अस्मिन् त्रीणि खण्डानि, द्विषष्टिसंख्याकाश्च कण्डिकाः सन्ति।

६. जैमिनीयतलवकारब्राह्मणम्[4]

इदं सायणभाष्यसहितं, भवत्रातप्रणीतभाष्ययुतञ्चास्ति। अस्मिन् त्रयो विभागाः द्व्यशीत्युत्तरशताधिकसहस्र (११८२) संख्याकानि खण्डानि च विद्यन्ते।

७. मन्त्रब्राह्मणम्[5]

इदं भट्टगुणविष्णुप्रणीतभाष्ययुतं, सायणभाष्यसहितं चास्ति। अस्मिन् द्वौ प्रपाठकौ, षोडशखण्डानि च सन्ति।

८ वंशब्राह्मणम्[6]

सायणभाष्यसहितेऽस्मिन् त्रीणि खण्डानि सन्ति।

---

१. इदं ससायणभाष्यं ए० सी० बर्नेलमहोदयेन सम्पादितं १८७३ ईसवीयेऽब्दे लण्डननगरे प्रकाशितमस्ति।

२. इदं ए० सी० बर्नेलमहोदयेन सम्पादितं, १८७६ ईसवीयेऽब्दे मंगलोरनगरे प्रकाशितम्।

३. इदं जीवानन्दविद्यासागरेण सम्पादितं, १८८१ ईसवीये वर्षे कलिकातायां प्रकाशितम्।

४. इदं लाहोरनगरे प्रकाशितं, पं० वेदव्यासेन च सम्पादितमस्ति।

५. इदं सत्यव्रतसामश्रमिणा सम्पादितं, १८९० ईसवीयेऽब्दे कलिकातायां प्रकाशितम्।

६. इदं ससायणभाष्यं सत्यव्रतसामश्रमिणा सम्पादितं, १८९२ ईसवीये वर्षे कलिकातानगरे प्रकाशितमुपलभ्यते।

९. संहितोपनिषद्ब्राह्मणम्[1]

इदं सायणभाष्ययुतं, विष्णुपुत्र[2]कृतभाष्यसहितं, द्विजराजभट्टप्रणीत-भाष्ययुतञ्च विद्यते। अस्मिन् एकः प्रपाठकः पञ्चखण्डानि च सन्ति।

१०. जैमिनीयार्षेयब्राह्मणम्[3]

अस्मिन् चतुरशीति (८४) खण्डान्युपलभ्यन्ते।

आरण्यकोपनिषदः

एतासु छान्दोग्यारण्यकं सायणभाष्यसहितं, तलवकारारण्यकं भवत्रात-

---

१. सभाष्यं ए० सी० बर्नेलेन सम्पादितं, १८७७ ईसवीयेऽब्दे मंगलोरनगरे प्रकाशितमस्ति।

२. इदं भाष्यं वटोदरास्थराजकीयहस्तलिखितपुस्तकालये समुपलभ्यते।

३. इदं ब्राह्मणं ए० सी० बर्नेलेन सम्पादितं, १८७८ ईसवीयेऽब्दे मंगलोरनगरे प्रकाशितम्।

एतदतिरिक्तानि ब्राह्मणग्रन्थनामानि, विविधप्रमाणग्रन्थोल्लिखितानि तावदित्थं समुपलभ्यन्ते।

भाल्लविब्राह्मणस्य बृहद्देवताग्रन्थे (५।२३), भाषिकसूत्रे (३।१५), पातञ्जलयोगसूत्रे (४।२।१०४) चोल्लेखः समुपलभ्यते।

शाट्यायनब्राह्मणस्य आपस्तम्बश्रौतसूत्रे (५।२३।३), ऋक्सायणभाष्ये (१।५१।३) चोल्लेखः समुपलभ्यते।

कालबविब्राह्मणस्य आपस्तम्बश्रौतसूत्रे (२०।९।९), पुष्पसूत्रे (८।८।१८४) चोल्लेख उपलभ्यते।

रौरुकिब्राह्मणस्य गोभिलगृह्यसूत्रे (३।२।५), द्राह्यायणश्रौतसूत्रे (४।३।१) चोल्लेख उपलभ्यते।

अतिरिक्तानि च ब्राह्मणान्तरनामानि विविधपुराणेषूल्लिखितानि निम्नलिखितानि परिश्रूयन्ते। तुम्बुरुब्राह्मणं, माषशराविब्राह्मणं, कापेयब्राह्मणं, शैलालिब्राह्मणं, अन्वाख्यानब्राह्मणं, षष्टिपथब्राह्मणं च।

कृतभाष्ययुतं, छान्दोग्योपनिषत् शांकरभाष्यसहिता, केनोपनिषत् शांकर-भाष्योपेता चोपलभ्यन्ते ।

सूत्राणि

एतेषु लाट्यायनश्रौतसूत्रं अग्निस्वामिप्रणीतभाष्ययुतं, द्राह्यायणश्रौत-सूत्रं धन्विकृतव्याख्यासहितं, जैमिनीयश्रौतसूत्रं, आर्षेयकल्पसूत्रं, गौतम-धर्मसूत्रं हरदत्तकृतमिताक्षरावृत्तिसहितं, कौथुमगृह्यसूत्रं, कौशिकगृह्यसूत्रं, जैमिनीयगृह्यसूत्रं रुद्रस्कन्दप्रणीतवृत्तिसहितं, द्राह्यायणगृह्यसूत्रं रुद्रस्कन्दीय-वृत्तियुतं, गोभिलगृह्यसूत्रं, कर्मप्रदीपगृह्यसूत्रं, माषकसूत्रं, पुष्पसूत्रं, उपग्रन्थसूत्रं, अनुस्तोभसूत्रं, अनुपदसूत्रं, ताण्ड्यलक्षणसूत्रं, कल्पानु-पदसूत्रं, क्षुद्रसूत्रं, पञ्चविधसूत्रं, निदानसूत्रं, प्रतिहारसूत्रं, संज्ञालक्षणसूत्रं, धातुलक्षणसूत्रं, औदव्रजिकृतं सामतन्त्रं, आपिशलिकृतं अक्षरतन्त्रं, शाकटायनप्रणीतं ऋक्तन्त्रं चोपलभ्यन्ते ।

अनुक्रमणिकाः

सामवेदस्य ऋषिच्छन्दोदेवतानामनुक्रमणिका उपलभ्यन्ते ।

प्रातिशाख्यम्

पुष्पमुनिप्रणीते सामप्रातिशाख्ये (पुष्पसूत्रे) ताण्ड्यपरिशिष्टानि, विविधाः पद्धतयश्चोपलभ्यन्ते । शाकटायनप्रणीतं ऋक्तन्त्रं कौथुमी-शाखायाः प्रातिशाख्यमस्ति । सामप्रातिशाख्ये पञ्चविधसूत्रस्य, पुष्पसूत्रस्य चापि तावदन्तर्भावो भवति । पुष्पमुनिप्रणीतस्य सामप्रातिशाख्यस्य अजातशत्रूपाध्यायकृतं भाष्यं, रामकृष्णदीक्षितसूरिकृता टीका चोप-लभ्येते ।

४. अथर्ववेदः

चरणव्यूहे समुल्लिखिता अथर्ववेदस्य नवशाखा[1] आसन्। ताश्चेमाः—

१. पैप्पलाशाखा, २. दान्ताशाखा, ३. प्रदान्ताशाखा, ४. औताशाखा, ५. जाबालाशाखा, ६. शौनकाशाखा, ७. ब्रह्मपलाशाशाखा, ८. कुनखीवेददर्शीशाखा, ९. चारणविद्याशाखा च।

मन्त्रसंहिता

आसु नवसु शाखासु सम्प्रति केवले शाखासंहिते समुपलभ्येते।

१. शौनकाशाखा

इयं सायणाचार्यप्रणीतभाष्ययुता, अध्ययनादिषु प्रचलिताऽस्ति।

२. पैप्पलाशाखा[2]

इयं शाखा सम्भवतः नाध्ययनादिष्वपितु पुस्तकेषूपलब्धाऽस्ति।

---

१. पुण्यपत्तने मुद्रितस्य चरणव्यूहग्रन्थस्यायं पाठः। अन्येषु मुद्रितामुद्रितेषु चरणव्यूहग्रन्थेषु निम्नलिखितं पाठान्तरं समुपलभ्यते। तच्चैतत्—१. पिप्पला, २. शौनका, ३. दामोदा, ४. तोत्तायना, ५. जाबाला, ६. ब्रह्मपलाशा, ७. स्तौता, ८. देवदर्शी, ९. चारणविद्या च।

आथर्वणपरिशिष्टचरणव्यूहे—१. पैप्पलादा, २. स्तौदा, ३. मौदा, ४. शौनकीया, ५. जाजला, ६. जलदा, ७. ब्रह्मवदा, ८. देवदर्शी, ९. चारणवैद्या च।

प्रपञ्चहृदयग्रन्थे—१. पैप्पलादा, २. योदा, ३. तोदा, ४. मोदा, ५. दायढा, ६. ब्रह्मपदा, ७. शौनका, ८. आंगिरसा, ९. देवर्षिशाखा च।

२. पैप्पलाशाखायाः भूर्जपत्रेषु लिखितं शारदालिप्यां, प्राचीनं पुस्तकं काश्मीरदेशे समुपलब्धं, सम्प्रति ट्यूबिंजनविश्वविद्यालयस्य हस्तलिखितपुस्तकालये सुरक्षितं वरीवर्ति। अस्या देवनागरीलिप्यां लिखितमेकं पुस्तकं पुण्यपत्तनस्थभाण्डारकरओरिएन्टलरिसर्चइन्स्टीट्यूटे, अपरं मुम्बापुरीस्थरायल्एशियाटिकसोसाइट्यां सुरक्षितमस्ति।

शौनकायां शाखायां विंशतिकाण्डानि, द्वादशसहस्रमन्त्राः, पञ्चशत-संख्याकमन्त्रात्मकपञ्चकल्पानि च सन्ति। एतानि पञ्चकल्पानि निम्न-लिखितानि सन्ति।

१. नक्षत्रकल्पं, २. विधानकल्पं, ३. विधिविधानकल्पं, ४. संहिताकल्पं, ५. शान्तिकल्पं च।

शौनकसंहितायामस्यां दार्शनिक - आयुर्वेदिक - शान्तिक - पौष्टिक-ऐन्द्र-जालिक-आभिचारिक-प्रायश्चित्त-उपचार-आदिमन्त्राणां, विविधसूक्तानाञ्च समुच्चयः प्रावर्ह्येणोपलक्ष्यते।

ब्राह्मणम्

सम्प्रति परिलुप्तेषु ब्राह्मणेषु केवलं गोपथब्राह्मणं[1] समुपलभ्यते। अस्मिन् पूर्वोत्तरविभागौ स्तः। पूर्वविभागे पञ्चप्रपाठकाः उत्तरविभागे च षट्प्रपाठकाश्चेत्थमेकादशप्रपाठका वर्तन्ते। अस्य सायणाचार्यप्रणीतं भाष्यं समुपलभ्यते।

आरण्यकोपनिषदः

शौनकशाखायाः, इमा उपनिषदः समुपलभ्यन्ते। प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डूक्योपनिषद्, नृसिंहतापन्युपनिषच्च। एताः शांकर-भाष्यसहिताः रङ्गरामानुजवीरराघवादिप्रणीतभाष्यादियुताः सन्ति। मुक्तिकोपनिषद्युल्लिखिताः सप्तनवति (९७) संख्याका आथर्वणोपनिषदः समासन्। इदानीं ता विलुप्ताः प्रतिभान्ति। आथर्वणमारण्यकं तावदधुना सम्भवतः नोपलभ्यते।

सूत्राणि

आथर्वणानि सूत्राणि निम्नलिखितानि सन्ति। तानि चैतानि–वैतान-श्रौतसूत्रं, आङ्गिरसकल्पसूत्रं, कौशिकगृह्यसूत्रं, नक्षत्रकल्पसूत्रं, शान्ति-

---

१. इदं हरिश्चन्द्रविद्याभूषणेन सम्पादितं, १८७० ईसवीयेऽब्दे कलिकातायां प्रकाशितं तथा डॉ० ड्यूकगस्ट्रेन सम्पादितं, १९१९ ई० वर्षे लीडेननगरे प्रकाशितम्।

कल्पसूत्रं, संहिताविधिसूक्तं च। आथर्वणपरिशिष्टान्यष्टसप्तति (७८) संख्याकानि परिश्रूयन्ते।

अनुक्रमणिकाः

अस्याः शाखायाः ऋषिच्छन्दोदेवताऽनुक्रमणिकाः, पञ्चतालिकाऽनुक्रमणी, शान्तिकपौष्टिकादिमन्त्रानुक्रमश्चोपलभ्यन्ते।

प्रातिशाख्यम्

आथर्वणप्रातिशाख्यं त्रिविधमस्ति। तच्चैतत्–१. शौनकीया चतुराध्यायिका,[२] २. अथर्ववेदप्रातिशाख्यम्,[३] ३. आथर्वणगोपथप्रातिशाख्यं[४] च।

---

१. इमानि जे० एफ्० नेगेलाइन जे० एम्० बोलिंगमहोदयाभ्यां सम्पादितानि १९०९ ई० वर्षे प्रकाशितानि च सन्ति।

२. डॉ० ह्विटनेमहोदयेन स्वकृतानुवादसहिता, सम्पादिता चेयं १८६२ ईसवीये वर्षे जर्नलआफ्अमेरिकन्ओरिएन्टलसोसाइट्या प्रकाशिते सप्तमे भागे मुद्रिता समुपलभ्यते।

३. विश्वबन्धुशास्त्रिणा होशियारपुरे (पञ्जापप्रदेशीये) प्रकाशितमस्ति।

४. इदं भूमिका-टिप्पणसहितं लाहोरनगरे प्रकाशितं श्रूयते।

वेदषडङ्गानि

१. शिक्षा
२. व्याकरणम्
३. ज्योतिषम्
४. निरुक्तम्
५. कल्पः
६. छन्दः

वेदषडङ्गानि

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते[1] ॥

१. शिक्षा

यद्यपि चतुर्विधवेदानां विविधेषु प्रातिशाख्येषु प्रवर्हतया शिक्षा-प्रतिपाद्यविषयाणां विवरणं समुपलभ्यते, तथाऽपि वेदाङ्गान्यतमशिक्षा-ग्रन्थानां वसिष्ठशौनकयाज्ञवल्क्यनारदपाणिन्यादिभिः प्रणीतानां बहु-विधानां, पार्थक्येनापार्थक्येन च प्रणयनैरेतत्प्रतिपाद्यविषयाणां प्रभूत-मुपयुक्तत्वं प्रतिभाति ।

प्रथमं तैत्तिरीयशीक्षावल्ल्युपनिषदि वेदमन्त्राद्युच्चारणविषयक-शिक्षायाः परिनिर्देशस्तावदुपलभ्यते । ऋग्वेदभाष्यभूमिकायां सायणा-चार्येण 'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते, सा शिक्षे'त्युदितदिशा सुकृतजनकत्वेनानिवार्यतया भृशमावश्यकं वेदमन्त्राणां स्वरवर्णादीनां परिशुद्धमुच्चारणं शिक्षाया वरेण्यो हि प्रतिपाद्यो विषयः समवगम्यते ।

विविधासु शिक्षासु, विशेषतया पाणिनीयशिक्षायां, वेदमन्त्रस्वराक्षरो-च्चारणविषयकं विवरणं, विधानञ्च, मन्त्रपाठस्य गुणदोषाणां प्रतिपादनं, एतत्सम्बद्धसमस्तनियमादीनां परिवर्णनञ्च सविस्तरं समुपलभ्यते ।

इदानीमप्रकाशिताः प्रकाशिता वा प्रतना बहुविधाः शिक्षाः निम्न-लिखिताः परिज्ञाता भवन्ति । ताश्चेमाः –

पराशरशिक्षा, वसिष्ठशिक्षा, व्यासशिक्षा,[2] काश्यपशिक्षा, कौशिक-

---

१. पाणिनीयशिक्षा, ४१-४२ श्लोकौ ।

२. कृष्णघनपाठिना सम्पादिता, मैसूरस्थ सं० म० पा० पत्रिकायां १९५१ ईसवीये वर्षे प्रकाशिताऽस्ति ।

शिक्षा, भारद्वाजशिक्षा,[1] शौनकशिक्षा, याज्ञवल्क्यशिक्षा, आत्रेयशिक्षा, चारायणीयशिक्षा,[2] गालवशिक्षा, बाभ्रव्यशिक्षा, नारदशिक्षा,[3] गौतमशिक्षा, लोमशशिक्षा, माण्डूक्यशिक्षा, माध्यन्दिनिशिक्षा, माण्डव्यशिक्षा, व्याडिशिक्षा,[4] अपिशलिशिक्षा,[5] पाणिनिशिक्षा,[6] शैशीर्यशिक्षा,[7] कौहलिशिक्षा,[8] कात्यायनशिक्षा[9] च।

एतदतिरिक्ताः काश्चनाप्रतनतराः शिक्षाः समुपलभ्यन्ते। ताश्चेमाः – अमोघनन्दिनीशिक्षा, अमरेशकृता प्रातिशाख्यानुसारिणी वर्णरत्नप्रदीपिकाशिक्षा, केशवदैवज्ञकृता प्रातिशाख्यानुसारिणी केशवशिक्षा, मल्लशर्मकृता

---

१. इयं दीक्षिताऽयंगाराभ्यां सम्पादिता, भाण्डारकर ओ० रि० इन्स्टीट्यूट, पुणेद्वारा १९३८ ईसवीयेऽब्दे प्रकाशिताऽस्ति।

२. इयं कीलहार्नेन सम्पाद्य प्रकाशिता, १८७६ ई० वर्षे इण्डियनएन्टिक्वेर्यां मुद्रिताऽस्ति।

३. अस्याः भट्टशोभाकरप्रणीतं विवरणं समुपलभ्यते।

४ केशवघनपाठिना सम्पादिता, मैसूरस्थसंस्कृतमहापाठशालायाः पत्रिकायां १९४८ ई० वर्षे प्रकाशिताऽस्ति।

५. रघुवीरेण सम्पादिता, लाहौरे प्रकाशिते जर्नलआफ्वेदिकस्टडीज्पत्रे १९३४ ई० अब्दे प्रकाशिताऽस्ति।

६. युधिष्ठिरमीमांसकेन सम्पादिता, अजमेरस्थप्राच्यविद्याप्रतिष्ठानद्वारा १९४९ ई० वर्षे प्रकाशिताऽस्ति। सम्प्रति समुपलब्धा पाणिनिशिक्षा अपाणिनिकृता पाणिनीयसूत्राधारेण केनचित्परवर्तिना प्रणीता संविभाव्यते। दयानन्दस्वामिना पाणिनीयसूत्राणां सम्पादनं अनुवादञ्च संविधाय वर्णोच्चारणशिक्षेतिनाम्ना तानि प्रकाशितान्युपलभ्यन्ते।

७. इयं तारापदचौधरिणा सम्पादिता, लाहोरप्रकाशितजर्नलआफ्वेदिकस्टडीज्पत्रे १९३५ ई० अब्दे प्रकाशिताऽस्ति।

८. इयं साधुरामेण सम्पादिता, लाहोरप्रकाशितजर्नलआफ्वेदिकस्टडीज्पत्रे १९३५ ई० वर्षे प्रकाशिता विद्यते।

९. कात्यायनशिक्षाया जयन्तस्वामिकृतं व्याख्यानमुपलभ्यते।

इमाः शिक्षाः शिक्षासंग्रहनामके पुस्तके, युगलकिशोरदासेन सम्पादिते, बनारससंस्कृतसीरीज्मध्ये, ब्रजबी०दासकंपनिद्वारा १८८९ ई० अब्दे प्रकाशिते, समुपलभ्यन्ते।

मल्लशिक्षा, जयन्तस्वामिकृता स्वरांकुशशिक्षा, रामकृष्णकृता षोडश-श्लोकीशिक्षा, अनन्तदेवकृता अवसाननिर्णयशिक्षा, कात्यायनकृता स्वर-भक्तिलक्षणपरिशिष्टशिक्षा, मधुसूदनसरस्वतीकृता मधुशिक्षा, क्रमसन्धान-शिक्षा, गलदृकशिक्षा, याज्ञवल्क्यकृता मनःस्वारशिक्षा, यजुर्विधानशिक्षा, अनन्तकृता स्वराष्टकशिक्षा, शम्भुमिश्रकृता क्रमकारिकाशिक्षा, बालकृष्ण-गोडशेकृता, रामचन्द्रप्रणीतव्याख्यायुता च प्रातिशाख्यप्रदीपशिक्षा, चन्द्रगोमिविरचिता सूत्रात्मिका चन्द्रगोमिशिक्षा[1] इत्येवमाद्याः ।

ऋग्वेदसम्बद्धाः शिक्षाः –

वसिष्ठशिक्षा-पाणिनीयशिक्षाऽद्याः सन्ति ।

कृष्णयजुर्वेदसम्बद्धाः शिक्षाः —

वसिष्ठशिक्षा - चारायणीयशिक्षा - पाणिनिशिक्षा - भारद्वाजशिक्षाऽद्या वर्तन्ते ।

शुक्लयजुस्सम्बद्धाः शिक्षाः —

याज्ञवल्क्यशिक्षा-माध्यन्दिनिशिक्षा-मनःस्वारशिक्षा-यजुर्विधानशिक्षा-क्रमकारिकाशिक्षाऽद्याः सन्ति ।

सामवेदसम्बद्धाः शिक्षाः —

गौतमशिक्षा-नारदशिक्षा-लोमशशिक्षाऽद्या वरीवृतति ।

अथर्ववेदसम्बद्धाः शिक्षाः —

माण्डूक्यशिक्षाऽद्या विद्यन्ते ।

---

१. इयं युधिष्ठिरमीमांसकेन सम्पादिता, अजमेरस्थप्राच्यविद्याप्रतिष्ठानद्वारा १९४९ ईसवीये वर्षे प्रकाशिताऽस्ति ।

१. इन्द्रः

अयं विक्रमपूर्वीयेभ्यः ८५०० वर्षेभ्यः पूर्वकालिक[1] आसीत् । अनेन प्रणीतं ऐन्द्रव्याकरणं[2] जैनशाकटायनव्याकरणे समुल्लिखितमस्ति ।

२. वायुः

अयमपि विक्रमपूर्वीयेभ्यः ८५०० अब्देभ्यः पूर्वकालिक आसीत् । एतेन विरचितं वायुव्याकरणं कवीन्द्राचार्यस्य ग्रन्थसूच्यामुल्लिखितं वर्तते ।

३ भरद्वाजः

अयं विक्रमपूर्वीयेभ्यः ८३०० संवत्सरेभ्यः पूर्वसामयिक आसीत् । भरद्वाजव्याकरणस्य ऋक्तन्त्रे सन्दर्भः समुपलभ्यते ।

४. भागुरिः

अयं विक्रमपूर्वीयेभ्यः ३१०० वर्षेभ्यः प्राक्कालिक आसीत् । भागुरि-व्याकरणस्य शब्दशक्तिप्रकाशिकायामुल्लेखः समुपलभ्यते ।

५. पौष्करसादिः

अयं विक्रमपूर्वीयेभ्यः ३१०० अब्देभ्यः प्राक्तन आसीत् । एतत्प्रणीतस्य पौष्करसादिव्याकरणस्य तैत्तिरीये प्रातिशाख्ये, मैत्रायणीये प्रातिशाख्ये च सान्दर्भिकोल्लेखः समुपलभ्यते ।

६. चारायणः

अयमपि विक्रमपूर्वीयेभ्यः ३१०० वर्षेभ्यः पूर्वसामयिक आसीत् । अस्य चारायणव्याकरणस्य पतञ्जलिविरचिते व्याकरणमहाभाष्ये सन्दर्भस्तावदुपलभ्यते ।

७. काशकृत्स्नः

असौ विक्रमपूर्वीयेभ्यः ३१०० संवत्सरेभ्यः प्राक्तन आसीत् । अस्या-

---

१. प्रकरणेऽस्मिन् युधिष्ठिरमीमांसकस्याभिमतानुसारेण युक्तियुक्तो विक्रमपूर्वकाल-निर्णयः तर्कानुकूलः प्रतिभातीति कृत्वा ग्रन्थकृतोरीकृतोऽस्ति ।

२. ऐन्द्रव्याकरणे पञ्चसहस्रसंख्याकानि सूत्राण्यासन्निति श्रूयते । पण्डित धनराजशास्त्रिणः ग्रन्थसूच्यनुसारेण माहेश्वरं व्याकरणं, शिवसूत्रञ्चासीदिति ज्ञायते । माहेश्वरव्याकरणे लक्षसंख्याकानि सूत्राण्यासन् । शिवसूत्रग्रन्थे पञ्चविंशसहस्रसंख्याकानि सूत्राण्यासन्निति परिश्रूयते ।

ध्यायत्रयसंवलितस्य काशकृत्स्नव्याकरणस्योक्तव्याकरणमहाभाष्ये सान्दर्भिकोल्लेख उपलभ्यते ।

८. वैयाघ्रपद्यः

अयं विक्रमपूर्वीयेभ्यः ३१०० वर्षेभ्यः पूर्वकालिक आसीत् । अस्य दशाध्यायैस्संवलितस्य वैयाघ्रपद्यव्याकरणस्य जयादित्यवामनाभ्यां प्रणीतायां पाणिनीयाष्टाध्यायीपाठस्य काशिकावृत्त्यां समुल्लेख उपलभ्यते ।

९. माध्यन्दिनिः

असौ विक्रमपूर्वीयेभ्यः ३००० अब्देभ्यः प्राक्तन आसीत् । अस्य माध्यन्दिनिव्याकरणस्योल्लेखः प्रागुक्तायां काशिकावृत्त्यां समुपलभ्यते ।

१०. रौढिः

असावपि विक्रमपूर्वीयेभ्यः ३००० वर्षेभ्यः पूर्वसामयिक आसीत् । रौढिव्याकरणस्यापि सान्दर्भिकोल्लेखः काशिकावृत्तौ समुपलभ्यते ।

११. शौनकिः

अयं च तावद् विक्रमपूर्वीयेभ्यः ३००० वर्षेभ्यः प्राक्तन आसीत् । अस्य शौनकिव्याकरणस्योल्लेखः जेज्जटप्रणीतायां चरकसंहितायाः टीकायामुपलभ्यते ।

१२. गौतमः

अयमपि विक्रमपूर्वीयेभ्यः ३००० अब्देभ्यः पूर्वकालिक आसीत् । गौतमव्याकरणस्योल्लेखः व्याकरणमहाभाष्य उपलभ्यते ।

१३. व्याडिः

असौ विक्रमपूर्वीयेभ्यः २८५० संवत्सरेभ्यः पूर्वकालिक आसीत् । अस्य व्याकरणं ऋक्प्रातिशाख्ये समुल्लिखितं वरीवर्ति ।

एतदतिरिक्ताः पाणिन्यनुल्लिखिताः, अपितु वैदिकप्रातिशाख्येषु समुदाहृता वैय्याकरणाः, द्विचत्वारिंशत्संख्याकाः निम्नोट्टङ्किताः परिज्ञायन्ते ।

अग्निवेश्यः, अग्निवेश्यायनः, अन्यतरेयः, आगस्त्यः, आत्रेयः, उख्यः, उत्तमोत्तरीयः, औदव्रजिः औपशविः, काण्डमायनः, कात्यायनः, काण्वः,

कौण्डिन्यः, कौहलिपुत्रः, जातूकर्ण्यः, दाल्भ्यः, नैगी, पञ्चालः, प्राच्य-पञ्चालः, प्लाक्षायणः, प्लाक्षिः, बाभ्रव्यः, माक्षव्यः, माचाकीयः, माण्डुकेयः, मीमांसकः, यास्कः, वाडवीकरः, वात्सप्रः, वाल्मीकिः, वेदमित्रः, शाकलः, शाकल्यपिता, शाङ्कमित्रिः, शाङ्खायनः, शूरवीरः, शूरवीरसुतः, शैत्यायनः, स्थविरकौण्डिन्यः, स्थविरशाकल्यः, साङ्कृत्यः, हारीतश्च ।

पाणिनिनोल्लिखिता व्याकरणप्रणेतारः निम्नोट्टङ्किता आसन् । तेचेमे-

१. आपिशलिः

अयं विक्रमपूर्वीय २९०० वर्षपूर्वकालिक आसीत् । अस्योल्लेखः पाणिनिना स्वीये सूत्रपाठे (अष्टाध्यायीसूत्रपाठे ६।१।९२) कृतोऽस्ति । अनेन प्रणीताः ग्रन्थाः-आपिशलिव्याकरणम्,[1] धातुपाठः, गणपाठः, उणादि-सूत्रम्, शिक्षा, कोशः, अक्षरतन्त्रम्, सामप्रातिशाख्यञ्च ।

२. काश्यपः

असौ विक्रमपूर्वीय २९०० अब्दपूर्वकालिक आसीत् । अस्योल्लेखः पाणिनिना स्वकीये सूत्रपाठे (१।२।२५) कृतो वर्तते । अस्य ग्रन्थः काश्यप-व्याकरणं परिज्ञायते ।

३. गार्ग्यः

अयं विक्रमपूर्वीय ३१०० वर्षपूर्वसामयिक आसीत् । अस्योल्लेखः पाणिनिना सूत्रपाठे (८।३।२०) कृत उपलभ्यते । एतत्प्रणीतं गार्ग्यव्याक-रणं[2] श्रूयते ।

४. गालवः

अयं विक्रमपूर्वीय ३१०० अब्दपूर्वकालिक आसीत् । अस्योल्लेखः पाणिनिना सूत्रपाठे (६।३।६१) कृतो वर्तते । एतत्प्रणीतं गालव-व्याकरणमस्तीति परिश्रूयते ।

---

१. श्रीमधुसूदनप्रसादमिश्रस्य मतानुसारेणेदं नवसहस्रसूत्रैः संवलितमस्ति ।

२. एतेषामेवाभिमतानुसारं गार्ग्यव्याकरणं द्वादशसहस्रसूत्रैः संवलितं वरीवर्ति ।

५. चाक्रवर्मणः

असौ विक्रमपूर्वीय ३१०० वर्षपूर्वसामयिक आसीत्। अस्योल्लेखः पाणिनिना स्वीये सूत्रपाठे (६।१।१३०) कृत अवगम्यते। अमुना विरचितं चाक्रवर्मणव्याकरणं[1] वरीवर्ति।

६. भारद्वाजः

एषः विक्रमपूर्वीय २८०० वर्षपूर्वकालिक आसीत्। अस्योल्लेखो हि पाणिनिना सूत्रपाठे (४।२।१४५) कृतो विद्यते। एतेन प्रणीतं भारद्वाज-व्याकरणमस्ति।

७ शाकटायनः

असौ विक्रमपूर्वीय ३००० वर्षपूर्वकालिक आसीत्। अस्योल्लेख-स्तावत् पाणिनिना सूत्रपाठे (३।४।११) विहित उपलभ्यते। एतेन विरचिता ग्रन्थाः शाकटायनव्याकरणम्,[2] दैवतग्रन्थः, कोशः, ऋक्तन्त्रं, लघुऋक्-तन्त्रं, सामतन्त्रं, पञ्चपादी-उणादिसूत्रं, श्राद्धकल्पश्चेत्यादयः सन्ति।

८. शाकल्यः

अयं विक्रमपूर्वीय ४००० वर्षपूर्वसामयिक आसीत्। अस्योल्लेखः पाणिनिना सूत्रपाठे (१।१।१६) कृत अभ्युपगम्यते। अनेन विरचितं शाकल्यव्याकरणं[3] वरीवर्ति।

९. सेनकः

असौ विक्रमपूर्वीय २९०० अब्देभ्यः प्राक्कालिक आसीत्। अस्योल्लेखः पाणिनिना सूत्रपाठे (५।४।११) कृतः समुपलभ्यते। एतेन प्रणीतं सेनक-व्याकरणं श्रूयते।

१०. स्फोटायनः

एषः विक्रमपूर्वीय २९०० संवत्सरेभ्यः पूर्वसामयिक आसोत्। अस्यो-ल्लेखः पाणिनिना स्वोये सूत्रपाठे ६।१।१२३) विहितः समुपलभ्यते। अनेन प्रणोतं स्फोटायनव्याकरणं श्रूयते। अयमेव स्फोटवादोद्भावक आसीत्।

---

१. श्रीमधुसूदनप्रसादमिश्रमतानुसारेण व्याकरणमिदं त्रिसहस्रसूत्रैः संवलितमस्ति।

२. एतेषामभिमतानुसारेण शाकटायन व्याकरणं दशसहस्रसूत्रैः संवलितं वरीवर्ति।

३. इदं शाकल्यव्याकरणं पञ्चसहस्रसूत्रैः संवलितं विद्यते।

पाणिनीयं व्याकरणम्

विक्रमपूर्वीय २८०० वर्षपूर्वसमयप्रभवस्तत्रभवान् तपःपूतचित्तोहि मुनिसत्तमः शलङ्कसूनुः पाणिनिः[1] प्रणिनाय व्याकरणं, व्याकरणान्तर-विलक्षणं, लक्षणं प्रेक्षाप्रकर्षस्य, शर्वाणीकान्तस्य शितिकण्ठस्यानुकम्पया समासादितं पुरातनसामयिकसकलव्याकरणानां सारसर्वस्वं वैदिका-वैदिकसंस्कृतशब्दानुशासनात्मकम्। इदानीं यावत् परिज्ञातेषु समुपलब्धेषु च प्रतननूतनेषु समस्तसंस्कृतव्याकरणेषु सर्वाङ्गपरिपूर्णं सुपरिष्कृत-ञ्चेदं व्याकरणं वरीवर्तीत्यतस्तावद् वेदषडङ्गान्यतमत्वेनेदमेव विद्वद्भि-र्नितरां समाद्रियते। छान्दसलौकिकोभयविधानां संस्कृतशब्दानां संशुद्धि-साधुत्वादीनां नियमव्यवस्थापकमेतत्पाणिनिप्रणीतं शब्दानुशासनं वास्तविकशब्दार्थावबोधनार्थं प्रतिपदं पदानि (शब्दान्) परिव्याकरोति, परिष्करणार्थं परिसंस्करोति च।

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥

इति पाणिनिप्रशस्तिपरकपद्यानुसारेण, अनितरकृतप्रयत्नफलकमिदं व्याक-रणं प्रेक्षावतां जनुष्मतां कृते भृशमावश्यकस्य परोक्षार्थविषयकप्रमा-ऽत्मकज्ञानस्य निदानानां पदानां संस्कृतं चाविकलं स्वरूपं नूनं निपुणं निर्दिशति। अतोहि व्याकरणान्तराणि सकलानि कलयाऽपि पाणिनिप्रणीत-शब्दानुशासकव्याकरणापेक्षया प्रवर्हतराणि सम्प्रत्यपि न सम्प्रतिपद्यन्ते।[2]

---

१. पणोऽस्यास्तीति पणी, तस्यापत्यं पाणिनः, पाणिनस्यापत्यं पणिनोयुवा पाणिनिः। पाणिनेर्जनकः शलङ्कः (पाणिनः), जननी दाक्षी, मातुलो व्याडिः, अनुजः पिङ्गलः, आचार्य उपवर्षः, शिष्यश्च कौत्स आसन्। अयं पञ्चापप्रदेशान्तर्गतशालातुर (सम्प्रति लहुर) ग्रामवास्तव्य आसीदिति तावदनुश्रूयते।

२. मॅक्समूलर-विलियम्स-कोलब्रुक-हण्टर-शेरवात्सकी-बेबर - भोटलिंक-गोल्डस्टकर-प्रभृतिपाश्चात्यविपश्चिद्भिः पाणिनीयव्याकरणं समधिकृत्य भृशं प्रशंसितमस्ति। अथच तावदेभिः यास्कव्याडिपाणिनिकात्यायनपतञ्जल्यादीनां कृतिसमयादिकं समधिकृत्य भ्रान्ताभ्रान्तविधाभ्यां विवेचनं चानुमानिकमैतिहासिकं वा समुपस्थापितमस्ति।

पाणिनिप्रणीताः ग्रन्थाः

अष्टाध्यायीशब्दानुशासनं, सूत्रात्मकं[1] व्याकरणम्, धातुपाठः, गणपाठः, परिभाषापाठः, उणादिसूत्रं, लिङ्गानुशासनं,[2] अष्टाध्यायीसूत्रपाठस्य स्वोपज्ञ-वृत्तिः, अष्टाध्यायीप्रवचनं, शिक्षा, द्विरूपकोशः, जाम्बवतीविजयकाव्यञ्च।

पाणिनीयव्याकरणस्य (अष्टाध्यायीसूत्रपाठस्य) वार्तिक[3]कारेषु विक्रमपूर्वीय २७०० वर्षपूर्वकालिको वररुचिकात्यायनः भृशं विशिष्यते।

पाणिनीयाष्टाध्यायीसूत्रपाठस्य वृत्तिप्रणेतृषु जयादित्यवामनोवेताभ्यां विरचितया काशिकावृत्त्या, सम्प्रत्यपि विशेषतयाऽध्ययनाध्यापनादिषु प्रयुक्तया नितरां समाद्रियेते।

पाणिनीयव्याकरणस्य (अष्टाध्यायीसूत्रपाठस्य) महाभाष्यप्रणेता विक्रमपूर्वीय १५०० वर्षपूर्वकालिकः पतञ्जलिरासीत्। पतञ्जलिनाऽस्मिन् भाष्ये न केवलाः पाणिनिप्रोद्भाविताः शब्दानुशासनविषयकाः सिद्धान्ता वैस्तर्येण विवृता, अपितु दार्शनिकधार्मिकैतिहासिकव्यावहारिकादि-विषयान् समधिकृत्य प्रतिपादिता राद्धान्ता अपि यथास्थानं सपरिकरं विवेचिता अभ्युपगम्यन्ते। अतस्तावत् पाणिनिप्रणीतं व्याकरणं व्याकरणान्तरेषु समेषु, कात्यायनविरचितवार्तिकेन, पतञ्जलिप्रणीत-महाभाष्येण च महनीयं पदमेतावताऽपि समलङ्करोति।

संस्कृतभाषाऽनुशासकस्य पाणिनीयव्याकरणस्यालौकिकमाध्यात्मिकं पक्षं प्रौढत्वेन प्रस्थापयन् व्याकरणमर्मज्ञस्तार्किकवरो भर्तृहरिः व्याकरण-

---

१. सूत्रलक्षणं—स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्र-विदो विदुः॥ पाणिनीयाष्टाध्यायीसूत्रेषु स्वल्पाक्षरत्वं, असन्दिग्धत्वं, पदानुवृत्तिः, अर्थगभीरत्वं, प्रत्याहारप्रक्रिया, लघ्वीसंज्ञाप्रयोगश्चेत्यादिसूत्रलक्षणानि सम्पूर्ण-तया समन्वितानि भवन्ति। पाणिनीयाष्टाध्यायीसूत्राणि चतुःसहस्र संख्या-कानि वरीवृतति।

२. इमे पञ्चग्रन्था अष्टाध्यायीसूत्रपाठस्य परिशिष्टरूपाः सन्ति।

३. वार्तिकलक्षणं—उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः॥
(पराशरोपपुराणम्)

दर्शनस्य समुद्भावनं स्वप्रणीते वाक्यपदीयग्रन्थे सविस्तरं समकार्षीत्। एतस्मिन् समाख्यातेषु दार्शनिकसिद्धान्तेषु विवर्तवाद-स्फोटवादौ प्रवर्हतया विवृतौ संविभाव्येते।

'अतत्त्वतोऽन्यथाप्रथा विवर्तइत्युदीरित' इत्यनुसारेण रज्ज्वाः सर्परूपेणेव शब्दब्रह्मणः जगद्रूपेण (पदार्थरूपेण) विवर्त इत्यभ्युपगम्यते। 'स्फोटाख्यो निरवयवो नित्यशब्दो ब्रह्मैवेति।' इति वाक्यपदीयोक्तदिशाऽर्थाभिव्यक्तिजनकनित्यशब्दस्फोटस्य,[1] वाक्यस्फोटस्य वा ब्रह्मरूपत्वं प्रतिपद्यते।

पाणिनीयव्याकरणादर्वाक्तनानि व्याकरणानि—

कातन्त्र (कलाप, कौमार) व्याकरणम्

अस्य समुद्भावकः कातन्त्रः विक्रमपूर्वीय १५०० वर्षपूर्वकालिक आसीत्।

चान्द्रव्याकरणम्

अस्योद्भावकः चन्द्रगोमी विक्रमपूर्वीय १००० वर्षपूर्वकालिक आसीत्।

क्षपणकव्याकरणम्

अस्य प्रणेता क्षपणकः (सिद्धसेनदिवाकरः) वैक्रमप्रथमशतक आसीत्।

जैनेन्द्रव्याकरणम्

अस्य समुद्भावकः पूज्यपाददेवनन्दी वैक्रमषष्ठशतके बभूव।

विश्रान्तविद्याधरव्याकरणम्

अस्य विरचयिता वामनः वैक्रमषष्ठशतके समभूत्।

जैनशाकटायनव्याकरणम्

अस्य प्रणेता पाल्यकीर्तिः (शाकटायनः) वैक्रमाष्टमशतके समभूत्।

---

१. स्फुटत्यर्थो यस्मात् सः स्फोटः, स्फुट्यतेऽसौ स्फोट इत्युभयविधव्युत्पत्त्यनुसारेण वाचकपदानां, वाच्यार्थानां च स्फोटविषयत्वेन स्फुटत्वं स्फुटीभवति।

शिवस्वामिव्याकरणम्

अस्योद्भावकः बौद्धशिवस्वामी वैक्रमदशमशतक आसीत् ।

सरस्वतीकण्ठाभरणव्याकरणम्

अस्य प्रणेता भोजदेवः (भोजराजः) वैक्रमैकादशशतक अभूत् ।

बुद्धिसागरव्याकरणम्

अस्य कर्ता जैनाचार्यः बुद्धिसागरः वैक्रमैकादशशतक आसीत् ।

दीपकव्याकरणम्

अस्य प्रणेता भद्रेश्वरो जैनाचार्यः वैक्रमद्वादशशतके समभूत् ।

सिद्धहैमशब्दानुशासनव्याकरणम्

अस्योद्भावकः हेमचन्द्रो जैनाचार्यः वैक्रमद्वादशशतक आसीत् ।

संक्षिप्तसारव्याकरणम्

अस्य प्रणेता क्रमदीश्वरः वैक्रमत्रयोदशशतके समभूत् ।

सारस्वतव्याकरणम्

अस्योद्भावकः नरेन्द्राचार्यः वैकमत्रयोदशशतक आसीत् ।

मुग्धबोधव्याकरणम्

अस्य प्रणेता बोपदेवः वैक्रमचतुर्दशशतके समभूत् ।

सुपद्मव्याकरणम्

अस्य समुद्भावकः पद्मनाभदत्तः वैक्रमचतुर्दशशतक आसीत् ।

एतदतिरिक्तानि कतिपयव्याकरणानि—

अकलङ्कव्याकरणं-भट्ट अकलङ्कः, द्रुतबोधव्याकरणं-भरतसेनः, आशुबोधव्याकरणं-रामकिंकरः, शुद्धाऽशुबोधव्याकरणं-रामेश्वरः, शीघ्रबोधव्याकरणं-शिवप्रसादः, ज्ञानामृतव्याकरणं काशीश्वरः, हरिनामामृतव्याकरणं-रूपगोस्वामी, हरिनामामृतव्याकरणं-जीवगोस्वामी, चैतन्यामृतव्याकरणं-अज्ञातनामा, प्रबोधप्रकाशव्याकरणं बलरामपञ्चाननः, प्रबोधचन्द्रिकाव्याकरणं-विज्जलभूपतिः, भोजव्याकरणं-विनयसुन्दरः, प्रक्रियाव्याकरणं-विनायकः, दीपव्याकरणं-चिद्रूपाश्रमः, रूपावतारव्याकरणं-बौद्ध-

धर्मकीर्तिः, बालबोधव्याकरणं-नरहरिः, कारिकाव्याकरणं-नारायणसुरनन्दः, क्रन्दार्कव्याकरणं-क्रन्दार्कः, मालवव्याकरणं-मालवः, गौरीव्याकरणं-सदाशिवदीक्षितः, कामधेनुव्याकरणं-अज्ञातनामा, प्रयोगरत्नमाला-व्याकरणं-पुरुषोत्तमवागीशः इत्यादीनि ।

अन्ततो हि वेदमुखस्यास्य व्याकरणस्य देवमुखजात[1]वेदोपमत्वाभ्युपगमः कुतुकविषयीभूतः प्रतिभाति । यतो हि व्याकरणस्यापि नाम-आख्यात - उपसर्ग - निपातरूपाणि चत्वारि शृङ्गाणि, भूतवर्तमान-भविष्यत्कालस्वरूपाः त्रयः पादाः, सुप्तिङ्रूपे द्वे शीर्षे, प्रथमाऽदि-सप्तविभक्तयश्च सप्तहस्ताः सन्ति ।

पाणिनीयव्याकरणसम्बद्धाः कतिपयप्रमुखाः ग्रन्थाः —

पाणिनीयाष्टाध्यायीसूत्रपाठस्य वार्तिककाराः —

वररुचिकात्यायनः, भारद्वाजः (अपरः), सुनागः, क्रोष्टा, वाडवः, व्याघ्रभूतिः, वैयाघ्रपद्यः (अपरः), गोनर्दीयः, गोणिकापुत्रः, सौर्यभगवान्, कुरणवाडवः, भवन्तश्च।

कात्यायनवररुचिप्रणीतवार्तिकस्य प्रमुखा व्याख्याः —

वार्तिकोन्मेषव्याख्या-हेलाराजः, अर्थप्रकाशिकाव्याख्या-राघवसूरिः, श्लोकवार्तिकव्याख्या-राजरुद्रः इत्याद्याः ।

अष्टाध्यायीपाठस्य काश्चन प्रमुखा वृत्तयः —

स्वोपज्ञवृत्तिः-पाणिनिः (वि० पू० २८०० व० पू०), अष्टाध्यायी-वृत्तिः-कुणिः (वि० पू० १२०० व० पू०), माथुरीवृत्तिः-माथुरः (वि० पू० १२०० व० पू०), अष्टाध्यायीवृत्तिः-श्वोभूतिः (वि० पू० १२०० व० पू०), अष्टाध्यायीवृत्तिः-वररुचि (श्रुतिः) (वै० प्रथमशतकम्), शब्दावतारन्यासवृत्तिः-देवनन्दी (वै० षष्ठशतकम्), शब्दावतारवृत्तिः-दुर्विनीतः (वै० षष्ठशतकम्), अष्टाध्यायीवृत्तिः-चुल्लिभट्टिः (वै० सप्तमशतकम्), अष्टाध्यायीवृत्तिः-निर्लूरः (वै० सप्तमशतकम्), अष्टा-

---

१. वैदिकसन्दर्भे अग्निस्वरूपवर्णनं इत्थं विहितमस्ति । 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।' 'सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः ।' इति ।

ध्यायीवृत्तिः–चूर्णिः (वै० सप्तमशतकम्), काशिकावृत्तिः–जयादित्यवामनौ (वै० सप्तमशतकम्), भागवृत्तिः–विमलमतिः (वै० सप्तमाष्टमशतके), अष्टाध्यायीवृत्तिः–भर्त्रीश्वरः (वै० अष्टमशतकम्), अष्टाध्यायीवृत्तिः–जयन्तभट्टः (वै० नवमशतकम्), अष्टाध्यायीवृत्तिः–केशवः (वै० द्वादशशतकम्), इन्दुमतीवृत्तिः–इन्दुमित्रः (वै० द्वादशशतकम्), दुर्घटवृत्तिः–मैत्रेयरक्षितः (वै० द्वादशशतकम्), लघुवृत्तिः (भाषावृत्तिः)–पुरुषोत्तमदेवः (वै० द्वादशशतकम्), दुर्घटवृत्तिः–शरणदेवः (वै० त्रयोदशशतकम्), शब्दकौस्तुभबृहद्वृत्तिः[1]–भट्टोजिदीक्षितः (वै० षोडशशतकम्), सूत्रप्रकाशवृत्तिः–अप्पयदीक्षितः (वै० सप्तदशशतकम्), पाणिनीयदीपिकावृत्तिः–वाजपेयिनीलकण्ठः (वै० सप्तदशशतकम्), पाणिनीयमिताक्षरावृत्तिः–अन्नम्भट्टः (वै० सप्तदशशतकम्), शाब्दिकचिन्तामणिवृत्तिः–गोपालकृष्णशास्त्री (वै० सप्तदशशतकम्), व्याकरणदीपिका–ओरम्भट्टः (वै० एकोनविंशशतकम्), अष्टाध्यायीवृत्तिः (भाष्यं)–दयानन्दः (वै० विंशशतकम्) ।

अन्ये चाज्ञातकालिकवृत्तिकाराः —

अप्पननैनार्यः–प्रक्रियादीपिकावृत्तिः, नारायणसुधीः–अष्टाध्यायीप्रदीपवृत्तिः, रुद्रधरः अष्टाध्यायीवृत्तिः, उदयनः–मितवृत्त्यर्थसङ्ग्रहः, रामचन्द्रः–अष्टाध्यायीवृत्तिः, इत्येवमादयः ।

अज्ञातकर्तृकालिकाश्च काश्चन वृत्तयः —

पाणिनीयलघुवृत्तिः, पाणिनीयसूत्रवृत्तिः, पाणिनीयसूत्रविवरणम्, पाणिनीयसूत्रवृत्तिः (अपरा), पाणिनीयसूत्रविवृतिलघुवृत्तिकारिका, पाणिनीयसूत्रव्याख्यानञ्च[2] ।

---

१. ऑफ्रेख्टस्य पुस्तकसूचीपत्रानुसारेण शब्दकौस्तुभस्य प्रथमपादस्य षट्टीकाकृतां नामानि परिज्ञायन्ते । नागेशः–विषमपदी, वैद्यनाथपादगुण्डः–प्रभा, विद्यानाथशुक्लः–उद्योतः, राघवेन्द्र –प्रभा, कृष्णमित्रः–भावप्रदीपः, भास्करदीक्षितः–शब्दकौस्तुभदूषणञ्च । पण्डितराजजगन्नाथोऽपि शब्दकौस्तुभस्य खण्डनं चकारेति श्रूयते ।

२. इमे वृत्तिग्रन्थाः राजकीयमदरासहस्तलिखितपुस्तकालये समुपलभ्यन्ते ।

पतञ्जलिप्रणीतव्याकरणमहाभाष्यस्य प्रमुखा व्याख्याः —

महाभाष्यदीपिका-भर्तृहरिः (वै० चतुर्थशतकम्), महाभाष्यव्याख्या-अज्ञातः (वै० सप्तमशतकम्), महाभाष्यप्रदीपः-कैयटः (वै० एकादशशतकम्), महाभाष्यटीका-ज्येष्ठकलशः (वै० द्वादशशतकम्), महाभाष्यटीका-मैत्रेयरक्षितः (वै० द्वादशशतकम्), प्राणपणावृत्तिः-पुरुषोत्तमदेवः (वै० द्वादशशतकम्), चिन्तामणिटीका-धनेश्वरः (वै० त्रयोदशशतकम्), सूक्तिरत्नाकरटीका-शेषनारायणः (वै० षोडशशतकम्), क्षीरोदरं टिप्पणम्-विष्णुमित्रः (वै० षोडशशतकम्), भाष्यतत्त्वविवेकः-नीलकण्ठवाजपेयी (वै० सप्तदशशतकम्), महाभाष्यप्रदीपिका-शेषविष्णुः (वै० सप्तदशशतकम्), महाभाष्यरत्नाकरः-शिवरामेन्द्रसरस्वती (वै० सप्तदशशतकम्), शाब्दिकचिन्तामणिः-गोपालकृष्णशास्त्री (वै० सप्तदशशतकम्), विद्वन्मुखभूषणम्[1]-प्रयागवेङ्कटाद्रिः (अज्ञातसमयः), अनुपदाव्याख्या-तिरुमलयज्वा (वै० अष्टादशशतकम्), महाभाष्यटीका-कुमारतातयः (वै० अष्टादशशतकम्), शब्दबृहतीटीका-राजनसिंहः (वै० अष्टादशशतकम्), महाभाष्यविवरणम्-नारायणः (वै० अष्टादशशतकम्), महाभाष्यस्फूर्तिटीका-सर्वेश्वरदीक्षितः (वै० अष्टादशशतकम्) इत्येवमाद्याः।

कैयटप्रणीतमहाभाष्यप्रदीपस्य प्रमुखा व्याख्याः[2]—

महाभाष्यकैयटप्रकाशः-चिन्तामणिः (वै० पञ्चदशशतकम्), म० भा० प्रदीपोद्योतनम्-नागनाथः (वै० षोडशशतकम्), म० भा० प्रदीपविवरणम्-रामचन्द्रसरस्वती (वै० षोडशशतकम्), म० भा० प्रदीपविवरणम्-ईश्वरानन्दसरस्वती (वै० षोडशशतकम्), म० भा० प्रदीपोद्योतनम्-अन्नंभट्टः (वै० सप्तदशशतकम्), म० भा० प्रदीपव्याख्या-नारायणशास्त्री (वै० अष्टादशशतकम्), म० भा० प्रदीपोद्योतः-नागेशभट्टः (वै०

---

१. मैसूर - अड्यार - मदरासनगरस्थितराजकीयहस्तलिखितपुस्तकालयीयसूचीपत्रेषु तावदेषां व्याख्या टीकादिग्रन्थानामुल्लेखः समुपलभ्यते।

२. उपर्युक्तेषु व्याख्याग्रन्थेष्वप्रकाशिता बहुविधा ग्रन्थाः हस्तलिखितरूपेण त्रिवेन्द्रम्-अड्यार-तन्जावूर-मदरास-बीकानेर-लाहौर-जम्मूनगरस्थराजकीयहस्तलिखितपुस्तकालयेषु समुपलभ्यन्ते।

अष्टादशशतकम्), म० भा० प्रदीपटिप्पणम्-मल्लयज्वा (वै० अष्टादशशतकम्), म० भा० प्रदीपव्याख्या-रामसेवकः (वै० अष्टादशशतकम्), महाभाष्यप्रदीपप्रकाशिका-प्रवर्तकोपाध्यायः (अज्ञातकालिकः), म० भा० प्रदीपस्फूर्तिः-आदेन्नः, म० भा० प्रदीपविवरणम्-नारायणः, म० भा० प्रदीपस्फूर्तिः-सर्वेश्वरसोमयाजी, म० भा० प्रदीपव्याख्या-हरिरामः, म० भा० प्रदीपटीका-अज्ञातनामा इत्याद्याः ।

नागेशभट्टभट्टकृतमहाभाष्यप्रदीपोद्योतस्य व्याख्याः —

उद्योतव्याख्या (छाया)-वैद्यनाथपादगुण्डः (वै० अष्टादशशतकम्), तत्त्वालोकव्याख्या-रुद्रधरझा (वै० विंशशतकम्) च ।

जयादित्यवामनाभ्यां प्रणीतायाः काशिकावृत्तेर्व्याख्याः —

काशिकाविवरणपञ्जिका (न्यासः)-जिनेन्द्रबुद्धिः (वै० अष्टमशतकम्), अनुन्यासः-इन्दुमित्रः (वै० द्वादशशतकम्), महान्यासः-अज्ञातनामा (वै० द्वादशशतकम्), प्रक्रियामञ्जरी विद्यासागरमुनिः (वै० द्वादशशतकम्), पदमञ्जरी-हरदत्तमिश्रः (वै० द्वादशशतकम्), वृत्तिप्रदीपः-रामदेवमिश्रः (वै० त्रयोदशशतकम्), वृत्तिरत्नव्याख्या[1]-अज्ञातनामा (वै० अज्ञातशतकम्), चिकित्साव्याख्या[2]-अज्ञातनामा (वै० अज्ञातशतकम्) इत्येवमाद्याः ।

काशिकाविवरणपञ्जिकायाः व्याख्याः —

तन्त्रप्रदीपः-मैत्रेयरक्षितः (वै० १२ श०), न्यासोद्योतः-मल्लिनाथः (वै० १४ श०), व्याकरणप्रकाशः-महामिश्रः (वै० १५ श०), न्यासव्याख्या-रत्नमतिः (अज्ञातकालिकः) इत्याद्याः ।

पदमञ्जरीव्याख्यायाः टीकाः —

मञ्जरीमकरन्दः रङ्गनाथयज्वा (वै० १८ श०), कुङ्कुमविकासः-शिवभट्टः (अज्ञातकालिकः) इत्याद्या व्याख्याः ।

---

१. थियोडोर ऑफ्रेख्टमहोदयस्य सूचीपत्रे एतन्नाम समुपलभ्यते ।

२. ऑफ्रेख्टमहोदयेन सङ्कलिते बृहत्तमे ग्रन्थसूचीपत्रे चैतन्नाम सन्दृश्यते ।

पाणिनीयव्याकरणस्य प्रक्रियाग्रन्थाः —

रूपावतारः-धर्मकीर्तिः (वै० १२ श०), प्रक्रियारत्नम्[1]-अज्ञातनामा (वै० १२ श०), रूपमाला-विमलसरस्वती (वै० १४ श०), प्रक्रियाकौमुदी-रामचन्द्रभट्टः (वै० १५ श०), सिद्धान्तकौमुदी-भट्टोजीदीक्षितः (वै० १६ श०), प्रक्रियासर्वस्वम्-नारायणभट्टः (वै० १६ श०), पाणिनिवादनक्षत्रमाला-अप्पयदीक्षितः (वै० १७ श०), मध्यसिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदी-वरदराजः (वै० १७ श०) इत्येवमादयः ।

रामचन्द्रभट्टकृतप्रक्रियाकौमुद्या व्याख्याः —

प्रकाशव्याख्या-शेषकृष्णः (वै० १५-१६ शतके), प्रसादव्याख्या-विठ्ठलः (वै० १६ श०), प्रक्रियाप्रदीपः-चक्रपाणिदत्तः (वै० १६ श०), अमृतसृतिः-वारणवनेशः (अज्ञातकालिकः), प्रक्रियाव्याकृतिः[2]-विश्वकर्मशास्त्री, प्रक्रियाव्याख्यानं-नृसिंहः, निर्मलदर्पणव्याख्या[3]-अज्ञातकर्तृकालिका, तत्त्वचन्द्रटीका[4] जयन्तः, प्रक्रियारञ्जनम्-विद्यानाथदीक्षितः, प्रक्रियाविवरणम्[5] वरदराजः इत्याद्याः ।

सिद्धान्तकौमुद्या विविधा व्याख्याः —

प्रौढमनोरमा-भट्टोजीदीक्षितः (वै० १६ श०), तत्त्वबोधिनी-ज्ञानेन्द्रसरस्वती (वै० १६ श०), सुखबोधिनी-नीलकण्ठवाजपेयी (वै० १७ श०), तत्त्वदीपिका-रामानन्दः (वै० १७ श०), सुबोधिनी-मौनिश्रीकृष्णभट्टः (वै० १७ श०), बृहच्छब्देन्दुशेखरः, लघुशब्देन्दुशेखरश्च-नागेशभट्टः (वै० १८ श०), रत्नाकरटीका-रामकृष्णः (वै० १८ श०), पूर्णिमा-रङ्गनाथयज्वा (वै० १८ श०), बालमनोरमा-वासुदेववाजपेयी (वै० १८ श०), रत्नार्णवटीका-कृष्णमित्रः (वै० १८ श०), स्वरप्रक्रियाव्याख्या-रामचन्द्रः (वै० १९ श०), सुमनोरमा-तिरुमलद्वादशाहयाजी

---

१. अस्य सायणप्रणीतधातुवृत्तौ समुल्लेख उपलभ्यते ।

२. इमे टीके तञ्जावूरराजकीयहस्तलिखितपुस्तकालये समुपलभ्येते ।

३. एते व्याख्ये मदरासराजकीयहस्तलिखितपुस्तकालये स्तः ।

४ इयं टीका लन्दननगरस्थइण्डियाऑफिस्पुस्तकालये वर्तते ।

५. एतयोष्टीकयोरुल्लेखः ऑफ्रेख्टस ङ्कलितपुस्तकसूच्यां समुपलभ्यते ।

(वै० १९ श०), प्रकाशव्याख्या-तोप्पलदीक्षितः, लघुमनोरमा-अज्ञातनामा, शब्दसागरव्याख्या-अज्ञातनामा, शब्दरसार्णवः-अज्ञातनामा, सुधाञ्जनव्याख्या[1]-अज्ञातनामा, विलासटीका[2]-लक्ष्मीनृसिंहः, रत्नाकरटीका-शिवरामेन्द्रसरस्वती, फक्किकाप्रकाशः-इन्द्रदत्तः, बालबोधटीका-सारस्वतव्यूढमिश्रः, मानसरञ्जनी[3]-वल्लभपण्डितः, अभिनवलक्ष्मीः-सभापतिउपाध्यायः (वै० २०-२१ श०), सरलाव्याख्या-गोपालशास्त्रिनेने (वै० २०-२१ श०) इत्याद्याः।

प्रौढमनोरमाया व्याख्याः —

बृहच्छब्दरत्नं-लघुशब्दरत्नं, भैरवी, कल्पलता, ज्योत्स्ना, भावप्रकाशः, रत्नप्रकाशः, रत्नविवेकः, सरला, प्रभा, विभा च।

प्रौढमनोरमाखण्डनम्-शेषवीरेश्वरपुत्रः (वै० १६ श०), प्रौढमनोरमाखण्डनम्-चक्रपाणिदत्तः (वै० १६ श०), प्रौढमनोरमाकुचमर्दनम्-जगन्नाथपण्डितराजः (वै० १७ श०) च।

लघुशब्देन्दुशेखरस्य व्याख्याः —

विषमपदवाक्यवृत्तिः, शिवभट्टी, शाङ्करी, भैरवी, श्रीधरी, चिदस्थिमाला-वैद्यनाथः, इन्दुप्रकाशः-गङ्गाधरः, ज्योत्स्ना-उदयशङ्करः, शेखरदीपकव्याख्या-नित्यानन्दपर्वतीयः, नागेशोक्तिप्रकाशव्याख्या-खुद्दीझा च।

पाणिनीयधातुपाठः —

अस्य काश्चन वृत्तय व्याख्याश्च—

धातुवृत्तिः-पाणिनिः (वि० पू० २८०० व० पू०), सौनागवार्तिकम्-सुनागः (वि० पू० ५०० व० पू०), धातुवृत्तिः भीमसेनः (वि० पू० ५०० व० पू०), धातुपाठवृत्तिः-अज्ञातनामा (अज्ञातसमयः), धातुपाठवृत्तिः-नन्दिस्वामी (अज्ञातसमयः), राजश्रीधातुवृत्तिः-अज्ञातनामा (वै० १ श०), नाथीयधातुवृत्तिः-श्रीनाथः (वै० १ श०), क्षीरतरङ्गिणी-

---

१. अमी पञ्चव्याख्याग्रन्थाः तञ्जावूरराजकीयहस्तलिखितपुस्तकालये समुपलभ्यन्ते।

२. इयं टीका मदरासराजकीयहस्तलिखितपुस्तकालये सुरक्षिताऽस्ति।

३. आसां चतसृणां टीकानामुल्लेखः ऑफ्रेख्टस्य पुस्तकसूचीपत्रे समुपलभ्यते।

क्षीरस्वामी (वै० १२ श०), धातुप्रदीपवृत्तिः-मैत्रेयरक्षितः (वै० १२ श०), शाब्दिकाभरणव्याख्या-हरियोगी (वै० १२ श०), दैवव्याख्या-देवपण्डितः (वै० १२ श०), दैववार्तिकम्-कृष्णलीलाशुकः (वै० १३ श०), माधवीयधातुवृत्तिः-सायणाचार्यः (वै० १४ श०) इत्येवमाद्याः। प्रागुल्लिखितेषु प्रक्रियाग्रन्थेष्वपि यथास्थानं पाणिनीयधातुपाठस्य व्याख्यानं विहितमुपलभ्यते।

अन्ये स्वतन्त्रग्रन्थाः —

धातुमञ्जरी, धातुमाला, धातुरत्नाकरः, धातुरूपसङ्ग्रहः, तिङन्त-मञ्जरी, तिङन्तशिरोमणिः, तिङन्तार्णवतरणिकोशश्च।

समीक्षाग्रन्थः-पाणिनीयधातुपाठसमीक्षा-भागीरथप्रसादः त्रिपाठी (वै० २१ श०)।

पाणिनीयगणपाठः

अस्य व्याख्या-वृत्ति-सङ्ग्रहकृतः —

पाणिनिः (वि० पू० २८०० व० पू०), नामपारायणकारः (वै० ७ श०), क्षीरस्वामी (वै० १२ श०), पुरुषोत्तमदेवः (वै० १२ श०), श्लोकगणकारः (वै० १४ श०), गणपाठकारिकाकारः, गणसङ्ग्रहकार-गोवर्धनः, गणपाठकाररामकृष्णः, यज्ञेश्वरभट्टश्च।

पाणिनीयउणादिपाठः (पञ्चपादिपाठः, दशपादिपाठश्च)

पञ्चपादिपाठव्याख्यातारः —

भाष्यकारगोवर्धनः (वै० १२ श०), दामोदरः (वै० १२ श०), पुरुषोत्तमदेवः (वै० १२ श०), सूतिवृत्तिकारः (वै० १२ श०), उज्ज्वल-दत्तः (वै० १३ श०), विद्याशीलः (वै० १३ श०), श्वेतवनवासी (वै० १३ श०), भट्टोजीदीक्षितः (वै० १६ श०), नारायणभट्टः (वै० १७ श०), महादेववेदान्ती (वै० १८ श०), रामभद्रदीक्षितः (वै० १८ श०), वेङ्कटेश्वरः (वै० १८ श०), पेरुसूरिः (वै० १८ श०), नारायणसुधीः (वै० १९ श०), शिवरामः (वै० १९ श०), रामशर्मा (वै० २० श०), दयानन्दसरस्वती (वै० २० श०) च।

दशपादिपाठवृत्तिकाराः —

अज्ञातनामा (वै० १२ श०), विठ्ठलार्यः (वै० १६ श०) च।

पाणिनीयलिङ्गानुशासनम् —

व्याख्यातारः —

उत्पलभट्टः (वै० १४ श०), रामचन्द्रः (वै० १५ श०), भट्टोजीदीक्षितः (वै० १६ श०), नारायणभट्टः (वै० १७ श०), अज्ञातनामा (वै० १९ श०), नारायणसुधीः (वै० १९ श०), तारानाथतर्कवाचस्पतिः (वै० २० श०) च।

पाणिनीयपरिभाषापाठः —

अस्य वृत्ति-विवरण-व्याख्याः —

परिभाषाप्रकरणम्-हरदत्तः (वै० १२ श०), परिभाषावृत्तिः-अज्ञातनामा (वै० १२ श०), लघुवृत्तिः ललितावृत्तिः-पुरुषोत्तमदेवः (वै० १२ श०), परिभाषावृत्तिः-सीरदेवः (वै० १३ श०), परिभाषाविवरणम्-अज्ञातनामा (वै० १६ श०), परिभाषावृत्तिः-अज्ञातनामा (अज्ञातसमयः), परिभाषावृत्तिः-नीलकण्ठवाजपेयी (वै० १७ श०), परिभाषावृत्तिः-भीमः (वै० १७ श०), परिभाषार्थसङ्ग्रहः-वैद्यनाथशास्त्री (वै० १८ श०), परिभाषाभास्करः-भास्करअग्निहोत्री (अज्ञातसमयः), लघुपरिभाषावृत्तिः-भास्करशिष्यः (अज्ञातसमयः), परिभाषारत्नम्-अप्पासुधीः (अज्ञातसमयः), परिभाषाप्रदीपार्चिः-उदयशङ्करभट्टः (अज्ञातसमयः), परिभाषेन्दुशेखरः-नागेशभट्टः (वै० १८ श०), परिभाषाभास्करः-शेषाद्रिनाथसुधीः (वै० २० श०), सार्थपरिभाषापाठः-रामप्रसादद्विवेदी (वै० २० श०), परिभाषार्थप्रदीपः-गोविन्दाचार्यः (अज्ञातसमयः), परिभाषाविवृतिः-अज्ञातनामा (अज्ञातसमयः), परिभाषावृत्तिः-अज्ञातनामा (अज्ञातसमयः) च।

परिभाषेन्दुशेखरस्य व्याख्याः —

गदा-वैद्यनाथपादगुण्डः, लक्ष्मीविलासः-शिवरामः, चन्द्रिका-विश्वनाथभट्टः, चित्प्रभा-ब्रह्मानन्दः, त्रिपथगा-राघवेन्द्राचार्यः, भूतिः-तात्याशास्त्रिपटवर्धनः, भैरवी-भैरवमिश्रः, त्रिपथगा-वेङ्कटेशपुत्रः, सर्वमङ्गला-शेषशर्मा, शाङ्करी-शङ्करभट्टः, तत्त्वादर्शव्याख्या-वासुदेवशास्त्र्यभ्यङ्करः, विजया-जयदेवमिश्रः, तत्त्वप्रकाशिका-गणपतिशास्त्रिमोकाटे, लघुजटाजूटः-गोविन्दशास्त्री, नागेशाशयनिर्णयः, शास्त्रार्थकलाचेत्याद्याः।

फिट्सूत्राणि—शान्तनवाचार्यः (वि० पू० १००० व० पू०)

एषां व्याख्यावृत्तयः —

फिट्सूत्रवृत्तिः[1]-अज्ञातनामा, फिट्सूत्रवृत्तिः[2]-अज्ञातनामा, फिट्सूत्रवृत्तिः[3]-अज्ञातनामा, फिट्सूत्रव्याख्या-विठ्ठलः (वै० १६ श०), फिट्सूत्रव्याख्या[4]-भट्टोजीदीक्षितः (वै० १६ श०), फिट्सूत्रव्याख्या (स्वरसिद्धान्तचन्द्रिकाऽन्तर्गता)-श्रीनिवासयज्वा (वै० १८ श०) चेत्याद्याः ।

व्याकरणदर्शनस्य प्रमुखा आचार्याः —

स्फोटायनः (वि० पू० २९०० व० पू०), औदुम्बरायणः (वि० पू० २९०० व० पू०), व्याडिः (वि० पू० २८५० व० पू०), पतञ्जलिः (वि० पू० १५०० व० पू०) इत्यादयः ।

व्याकरणदर्शनस्य प्रमुखाः ग्रन्थाः —

वाक्यपदीयम्-भर्तृहरिः (वै० ४ श०), स्फोटसिद्धिः-मण्डनमिश्रः (वै० ८ श०), वैयाकरणभूषणः (कारिका) - भट्टोजीदीक्षितः (वै० १६ श०), वैयाकरणमतोन्मज्जनम्-भट्टोजीदीक्षितः (वै० १६ श०), वैयाकरणभूषणसारः-कौण्डभट्टः (वै० १७ श०), वैयाकरणसिद्धान्तमञ्जूषा (लघुमञ्जूषा-परमलघुमञ्जूषा (पाठद्वयं)-नागेशभट्टः (वै० १८ श०), वैयाकरणसिद्धान्तमञ्जूषा[5]-ब्रह्मदेवः (वै० १८ श०), शब्दशक्तिप्रकाशिका-जगदीशतर्कालङ्कारः (वै० १८ श०), व्युत्पत्तिवादः, शक्तिवादश्च-गदाधरभट्टाचार्यः (वै० १८ श०), विभक्त्यर्थनिर्णयः-गिरिधरोपाध्यायः (वै० १९ श०) इत्येवमादयः ।

वाक्यपदीयस्य व्याख्याः —

स्वोपज्ञवृत्तिः-भर्तृहरिः (वै० ४ श०), वाक्यपदीयव्याख्या-धर्मपालः

---

१. इयं वृत्तिः अड्यारराजकीयहस्तलिखितपुस्तकालये विद्यते ।

२. एषा वृत्तिः शार्मण्य (जर्मनी) देशे प्रकाशिताऽस्ति ।

३. असौ वृत्तिः वाराणसीस्थसरस्वतीभवनहस्तलिखितपुस्तकालये समुपलभ्यते ।

४. अस्या उल्लेखः शब्दकौस्तुभस्वरप्रकरणे, सिद्धान्तकौमुद्याः स्वरप्रक्रियायाञ्चोपलभ्यते ।

५. इयं मदरासराजकीयहस्तलिखितपुस्तकालये समुपलभ्यते ।

(वै० ८ श०), वाक्यपदीयव्याख्या-पुण्यराजः (वै० ११ श०), वाक्यपदीयव्याख्या-हेलाराजः (वै० ११ श०), वाक्यपदीयव्याख्या-फुल्लराजः (वै० १३ श०) च ।

स्फोटसिद्धान्तविषयकग्रन्थाः —

स्फोटसिद्धिः-भरतमिश्रः, स्फोटसिद्धिन्यायविचारः-अज्ञातनामा, स्फोटप्रतिष्ठा-केशवकविः, स्फोटतत्त्वम्-शेषकृष्णकविः, स्फोटचन्द्रिका-श्रीकृष्णभट्टः, स्फोटनिरूपणम्-आपदेवः, स्फोटवादः-नागेशभट्टः, स्फोटवादः-कुन्दभट्टश्चेत्यादयः ।[1]

वैयाकरणभूषणसारस्य व्याख्याः —

भूषणसारदर्पणः-हरिवल्लभः, भूषणसारदर्पण-हरिभट्टः, कान्तिः-मन्नुदेवः, परीक्षा-भैरवमिश्रः, विवृतिः-रुद्रनाथः, रत्नप्रभा-कृष्णमित्रः, शाङ्करी-शङ्करभट्टः, अभिनवसरला, सुबोधिनी-गोपालशास्त्रिनेने इत्येवमाद्याः ।

वैयाकरणसिद्धान्तमञ्जूषाया व्याख्याः —

कुञ्जिका-दुर्बलाचार्यः कला-वैद्यनाथपादगुण्डः इत्याद्याः ।

शब्दशक्तिप्रकाशिकाया व्याख्याः —

कृष्णकान्तविद्यावागीशकृता, रामभद्रसिद्धान्तवागीशकृता च ।

●

१. अमी ग्रन्थाः त्रिवेन्द्रम्राजकीयहस्तलिखितपुस्तकालये समुपलभ्यन्ते ।

३. ज्योतिषम्[1]

श्रौतस्मार्तकर्मानुष्ठानादीनां समारम्भस्य मुहूर्तादीनां प्रख्यापनेन, समुचितकालनिर्णय-फलादेशादीनां यथार्थप्रतिपादनेन चास्य वेदाङ्गस्य भृशं महत्त्वं वरीवर्ति। एतावता ज्योतिषस्यास्य वेदचक्षुष्ट्वं सिध्यति। वैदिक-लौकिकज्योतिषयोर्वैदिकं ज्योतिषमेव वेदाङ्गज्योतिषमिति नाम्ना व्यपदिश्यते। प्रस्तुते वैदिकं ज्योतिषं त्रिविधमभ्युपगम्यते।

ऋग्ज्योतिषम्[2] —

इदं लगधप्रणीतं षट्त्रिंशच् (३६) श्लोकात्मकमुपलभ्यते।

यजुर्ज्योतिषम्[3] —

इदं शेषविरचितं त्रिचत्वारिंशच् (४३) श्लोकात्मकं वरीवर्ति।

अथर्वज्योतिषम् —

इदं पितामहकृतं पञ्चषष्ट्युत्तरशत (१६५) श्लोकात्मकमस्ति।

वेदाङ्गज्योतिषे तावद् युग-वर्ष-अयन-ऋतु-मास-पक्ष-अहोरात्रादीनां

---

१. मॅक्समूलर-वेबर-विलियमजोन्स-कोलब्रुक-ह्विटने-ब्रेंटली-डेविसप्रभृतिभिः पाश्चात्य-विपश्चिद्भिः वेदाङ्गज्योतिषं समधिकृत्य व्याख्याविवरणादीनि प्रस्तुतान्युपलभ्यन्ते। भारतीयविपश्चित्सु कृष्णशास्त्रिगोडबोले-जनार्दनबालाजीमोडक-शंकरबालकृष्णदीक्षितप्रभृतिभिः ऋग्ज्योतिषस्य, यजुर्ज्योतिषस्य च सूत्रात्मक-श्लोकानां यथार्थतयाऽर्थनिरूपणं कृतं समवगम्यते। तदनु बृहस्पतीत्युपनामको लालाछोटेलालः १९०६ ई० वर्षे हिन्दुस्तानरिव्यूपत्रिकायामुपर्युक्तज्योतिषत्रय-मधिकृत्यार्थविवेचनं प्रकाशितवान्। १९०८ ई० अब्दे पण्डितपत्रिकायां प्रकाशितं सुधाकरद्विवेदिगणकेन लिखितं व्याख्यानं समुपलभ्यते। १९३६ ई० अब्दे शामशास्त्रिणा स्वप्रणीतव्याख्याऽलङ्कृतं ज्योतिषं मैसूरनगरे प्रकाशितमस्ति।

२. अस्य ऋग्ज्योतिषस्य प्रणयनसमयो हि विक्रमपूर्वीयं पञ्चदशशतकमासीदिति-तिहासज्ञैः समनुमीयते।

३. यजुर्ज्योतिषस्य सोमाकरप्रणीतं भाष्यं समुपलभ्यते। थिबोमहोदयेन १८७९ ई० वर्षे यजुर्ज्योतिषमधिकृत्य सव्याख्यानं टिप्पणं प्रणीतं, प्रकाशितञ्चास्ति।

विवरणं, श्रौतयज्ञादीनां समुचितकालनिर्णयादिकञ्च प्रावर्ह्येण विहितमभ्युपगम्यते। संक्षेपतः तिथि-वार-नक्षत्र-योग-करणात्मकपञ्चाङ्गविषयकनिर्णयादिकं वेदाङ्गज्योतिषस्योद्देश्यं प्रतिभाति। अस्मिन् चान्द्र-सौर-गणनामानविषयकाणां बार्हस्पत्य-प्राजापत्यसिद्धान्तानां गुरुतरं स्थानं सम्प्रत्यपि सम्प्रतिपद्यते।

ज्योतिषप्रतिपादितप्रवर्हविषयाणां सान्दर्भिकं विवरणं सर्वतः प्राथम्येन वेदेषु[1] समुपलभ्यते। तदनन्तरं वेदाङ्गान्यतममिदं ज्योतिषं विशेषतया विषयस्यास्य विशदं विवरणं समुपस्थापयति। तदनु पुराणेतिहासादिषु[2] च ज्योतिर्विषयमधिकृत्य प्रासङ्गिकं परिवर्णनं परिज्ञायते। ततो हि ज्योतिषसिद्धान्तानां स्वतन्त्रशास्त्ररूपेण समुद्भवः प्रतनसमये समभूदितिवस्तुस्थितिः कालकोविदैर्भारतीयेतिहासज्ञैस्समाश्रुताऽनुश्रूयते।

वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥

इतिवेदाङ्गऋग्ज्योतिषवचनानुसारेण, अपूर्वफलप्राप्तिसाधनसकलश्रौतस्मार्तधर्मानुष्ठानादीनां समुचितकालज्ञानं, मुहूर्तज्ञानञ्च ज्योतिषसिद्धान्तज्ञानाधीनमतोहि शास्त्रमिदं कालविधानशास्त्रत्वेन नितरां महत्त्वं समावहति। एवंविधं ज्योतिषं शास्त्रं, सिद्धान्त (गणित) संहिताहोरात्मकेषु त्रिषु स्कन्धेषु संविभज्य समधिष्ठितमस्तीतिकृत्वाऽस्य ज्योतिषस्य त्रैस्कन्ध्यं प्रसिद्धं समेषां विचक्षणानां विदुषाम्।

---

१. विश्वोत्पत्तिभुवनसंस्था पृथ्वी-अन्तरिक्ष-द्यौ-सूर्य-कल्प-युग-वर्ण-अयन-ऋतु-मास-चान्द्र-सौरमास-पक्ष-दिवस-तिथि-अष्टका - चन्द्रकला-चन्द्रसूर्यगति-वार-दिनमान-मुहूर्त-नक्षत्रग्रह-उल्का-धूमकेतु-वर्षारम्भसमय-शुभकालादिज्योतिषविषयान् समधिकृत्य विशदं संक्षिप्तं वा सान्दर्भिकं विवरणं आर्चशाकलसंहितायां, तैत्तिरीयसंहितायां, माध्यन्दिनकाण्वसंहितयोः, अथर्वशौनकसंहितायां, ऐतरेय-तैत्तिरीय-शतपथ-ताण्ड्यब्राह्मणेषु, बृहदारण्यके, तैत्तिरीयोपनिषत्सु च विहितमुपलभ्यते।

२. महाभारत-विष्णुपुराण-अग्निपुराण-श्रीमद्भागवतादिषु ज्योतिर्विषयकं परिवर्णनं, भूगोल-खगोलादिविषयकं विवरणं च कृतं समवगम्यते।

३. ज्योतिषम्[1]

श्रौतस्मार्तकर्मानुष्ठानादीनां समारम्भस्य मुहूर्तादीनां प्रख्यापनेन, समुचितकालनिर्णय-फलादेशादीनां यथार्थप्रतिपादनेन चास्य वेदाङ्गस्य भृशं महत्त्वं वरीवर्ति। एतावता ज्योतिषस्यास्य वेदचक्षुष्ट्वं सिध्यति। वैदिक-लौकिकज्योतिषयोर्वैदिकं ज्योतिषमेव वेदाङ्गज्योतिषमिति नाम्ना व्यपदिश्यते। प्रस्तुते वैदिकं ज्योतिषं त्रिविधमभ्युपगम्यते।

ऋग्ज्योतिषम्[2] —

इदं लगधप्रणीतं षट्त्रिंशच् (३६) श्लोकात्मकमुपलभ्यते।

यजुर्ज्योतिषम्[3] —

इदं शेषविरचितं त्रिचत्वारिंशच् (४३) श्लोकात्मकं वरीवर्ति।

अथर्वज्योतिषम् —

इदं पितामहकृतं पञ्चषष्ट्युत्तरशत (१६५) श्लोकात्मकमस्ति।

वेदाङ्गज्योतिषे तावद् युग-वर्ष-अयन-ऋतु-मास-पक्ष-अहोरात्रादीनां

---

१. मॅक्समूलर-वेबर-विलियमजोन्स-कोलब्रुक-ह्विटने-ब्रेंटली-डेविसप्रभृतिभिः पाश्चात्य-विपश्चिद्भिः वेदाङ्गज्योतिषं समधिकृत्य व्याख्याविवरणादीनि प्रस्तुतान्युपलभ्यन्ते। भारतीयविपश्चित्सु कृष्णशास्त्रिगोडबोले-जनार्दनबालाजीमोडक-शंकरबालकृष्णदीक्षितप्रभृतिभिः ऋग्ज्योतिषस्य, यजुर्ज्योतिषस्य च सूत्रात्मक-श्लोकानां यथार्थतयाऽर्थनिरूपणं कृतं समवगम्यते। तदनु बृहस्पतीत्युपनामको लालाछोटेलालः १९०६ ई० वर्षे हिन्दुस्तानरिव्यूपत्रिकायामुपर्युक्तज्योतिषत्रय-मधिकृत्यार्थविवेचनं प्रकाशितवान्। १९०८ ई० अब्दे पण्डितपत्रिकायां प्रकाशितं सुधाकरद्विवेदिगणकेन लिखितं व्याख्यानं समुपलभ्यते। १९३६ ई० अब्दे शामशास्त्रिणा स्वप्रणीतव्याख्याऽलङ्कृतं ज्योतिषं मैसूरनगरे प्रकाशितमस्ति।

२. अस्य ऋग्ज्योतिषस्य प्रणयनसमयो हि विक्रमपूर्वीयं पञ्चदशशतकमासीदिति-तिहासज्ञैः समनुमीयते।

३. यजुर्ज्योतिषस्य सोमाकरप्रणीतं भाष्यं समुपलभ्यते। थिबोमहोदयेन १८७९ ई० वर्षे यजुर्ज्योतिषमधिकृत्य सव्याख्यानं टिप्पणं प्रणीतं, प्रकाशितञ्चास्ति।

विवरणं, श्रौतयज्ञादीनां समुचितकालनिर्णयादिकञ्च प्रावर्ह्येण विहितमभ्युपगम्यते। संक्षेपतः तिथि-वार-नक्षत्र-योग-करणात्मकपञ्चाङ्गविषयकनिर्णयादिकं वेदाङ्गज्योतिषस्योद्देश्यं प्रतिभाति। अस्मिन् चान्द्र-सौरगणनामानविषयकाणां बार्हस्पत्य-प्राजापत्यसिद्धान्तानां गुरुतरं स्थानं सम्प्रत्यपि सम्प्रतिपद्यते।

ज्योतिषप्रतिपादितप्रवर्हविषयाणां सान्दर्भिकं विवरणं सर्वतः प्राथम्येन वेदेषु[1] समुपलभ्यते। तदनन्तरं वेदाङ्गान्यतममिदं ज्योतिषं विशेषतया विषयस्यास्य विशदं विवरणं समुपस्थापयति। तदनु पुराणेतिहासादिषु[2] च ज्योतिर्विषयमधिकृत्य प्रासङ्गिकं परिवर्णनं परिज्ञायते। ततो हि ज्योतिषसिद्धान्तानां स्वतन्त्रशास्त्ररूपेण समुद्भवः प्रतनसमये समभूदितिवस्तुस्थितिः कालकोविदैर्भारतीयेतिहासज्ञैस्समाश्रुताऽनुश्रूयते।

वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥

इतिवेदाङ्गऋग्ज्योतिषवचनानुसारेण, अपूर्वफलप्राप्तिसाधनसकलश्रौतस्मार्तधर्मानुष्ठानादीनां समुचितकालज्ञानं, मुहूर्तज्ञानञ्च ज्योतिषसिद्धान्तज्ञानाधीनमतोहि शास्त्रमिदं कालविधानशास्त्रत्वेन नितरां महत्त्वं समावहति। एवंविधं ज्योतिषं शास्त्रं, सिद्धान्त (गणित) संहिताहोरात्मकेषु त्रिषु स्कन्धेषु संविभज्य समधिष्ठितमस्तीतिकृत्वाऽस्य ज्योतिषस्य त्रैस्कन्ध्यं प्रसिद्धं समेषां विचक्षणानां विदुषाम्।

---

१. विश्वोत्पत्तिभुवनसंस्था पृथ्वी-अन्तरिक्ष-द्यौ-सूर्य-कल्प-युग-वर्ण-अयन-ऋतु-मास-चान्द्र-सौरमास-पक्ष-दिवस-तिथि-अष्टका - चन्द्रकला-चन्द्रसूर्यगति-वार-दिनमान-मुहूर्त-नक्षत्रग्रह-उल्का-धूमकेतु-वर्षारम्भसमय-शुभकालादिज्योतिषविषयान् समधिकृत्य विशदं संक्षिप्तं वा सान्दर्भिकं विवरणं आर्चशाकलसंहितायां, तैत्तिरीयसंहितायां, माध्यन्दिनकाण्वसंहितयोः, अथर्वशौनकसंहितायां, ऐतरेय-तैत्तिरीय-शतपथ-ताण्ड्यब्राह्मणेषु, बृहदारण्यके, तैत्तिरीयोपनिषत्सु च विहितमुपलभ्यते।

२. महाभारत-विष्णुपुराण-अग्निपुराण-श्रीमद्भागवतादिषु ज्योतिर्विषयकं परिवर्णनं, भूगोल-खगोलादिविषयकं विवरणं च कृतं समवगम्यते।

शाकल्यब्रह्मसिद्धान्तः ग्रन्थपरिमाणदृष्ट्या, सूर्यसिद्धान्तश्च[1] विषयविवरण-दृशा नितरां विशिष्येते ।

गणितसिद्धान्तग्रन्थप्रणेतारः, वैक्रमषष्ठशतकपूर्ववर्तिनः लाटाचार्य-सिंहाचार्य-प्रद्युम्न-विजयनन्दिप्रभृतयः ज्योतिर्विदः समासन्निति पञ्च-सिद्धान्तिकाब्राह्मस्फुटसिद्धान्तादिग्रन्थेषु कृतैस्तेषां सान्दर्भिकनिर्देशैरनु-मीयते । एतेषां ग्रन्थाः सम्भवतः कालकवलीकृता नाद्योपलभ्यन्ते ।

संहितास्कन्धान्तर्गताः पुरातनतमाः, प्रमाणभूताः संहिताः निम्नो-ट्टङ्किता वरीवृतति । ताश्चेमाः —

नारदसंहिता, गर्गसंहिता, वृद्धगर्गसंहिता, कश्यपसंहिता, बृहस्पति-संहिता, मनुसंहिता, मयसंहिता, सारस्वतसंहिता, ऋषिपुत्रसंहिता, अत्रिसंहिता इत्याद्याः ।

होरा (फलित) स्कन्धीयाः प्राचीनसंहिता अन्ये ग्रन्थाश्च निम्नो-ट्टङ्किताः सन्ति ।

पराशरसंहिता, भृगुसंहिता, जैमिनिसूत्राणि, गौरीजातकं, काल-जातकं, शिवजातकं, योगिनीजातकञ्च ।

---

१. अर्वाचीनसूर्यसिद्धान्तस्य निम्नोट्टङ्किताव्याख्याः समुपलभ्यन्ते । रङ्गनाथकृता गूढार्थप्रकाशिका (१८९१ ई० वर्षे कलिकातायां प्रकाशिता), नृसिंहदैवज्ञ-कृतं सौरभाष्यं, परमेश्वरकृताटीका (१९५६ ई० अब्दे लखनऊनगरे प्रका-शिता), विश्वनाथदैवज्ञकृता गहनार्थप्रकाशिका, दादाभट्टगांवकरकृता किरणा-वलीटीका, सुधाकरद्विवेदिकृताटीका (१९२५ ई० वर्षे कलिकातायां प्रका-शिता), कपिलेश्वरचौधरिकृताव्याख्या (१९४६ ई० वर्षे वाराणस्यां प्रकाशिता), सीतारामझाकृताव्याख्या (१९४२ ई० वर्षे वाराणस्यां प्रका-शिता) च । एतद्भिन्नाः भूधर-मल्लिकार्जुन-येल्लया-आर्यभट-मम्मट-तम्मया-ऽदीनां सूर्यसिद्धान्तस्य पूर्णा अपूर्णा वा व्याख्याः म्याकेंशीसंग्रहे तावदासन्निति विलसनकृतहस्तलिखितपुस्तकसूचीपत्रप्रमाणेन डॉ० ह्विटने परिसूचयति ।

अस्याङ्ग्लभाषायामनुवादः नृसिंहबापुदेवेन १८६० ईसवीयेऽब्दे कृतः, बिब्लिओथिकाइन्डिका, कलिकातायां प्रकाशितश्चोपलभ्यते ।

डॉ० बर्जेसमहोदयेनापि कृतः आङ्ग्लभाषायामस्यानुवादः, डॉ० ह्विटने-महाशयकृतटिप्पणीसहितः १९३५ ईसवीये वर्षे कलिकातायां प्रकाशितोऽस्ति ।

अर्वाचीनसूर्यसिद्धान्तप्रणेतृविषये निश्चितमभिमतं नाभ्युपगम्यते ।

एतैः संहिता-सूत्र-जातकादिग्रन्थैस्तथा गार्गी-बादरायण-याज्ञवल्क्य-शौनक-माण्डव्य-सत्य-मय-यवन-मणिथ्य-जीवशर्म-विष्णुगुप्तादिविरचितैरिदानीं समुपलब्धैरनुपलब्धैर्वा ग्रन्थैर्ज्योतिषशास्त्रस्य समुपबृंहणं, विक्रमपूर्वीयवर्षशतकेषु समभूदितीतिहासः सङ्केतयति। अनन्तरं परवर्तिनां आर्यभट-वराहमिहिर-ब्रह्मगुप्त-लल्ल-श्रीपति-शतानन्द-भास्कर-केशव-गणेश-दैवज्ञ-नीलकण्ठादिज्योतिर्विदां, गणकवरेण्यानां परःशतैर्ग्रन्थरत्नैः शास्त्रस्यास्य परिमण्डनं सम्पन्नमित्यविप्रतिपन्नं समेषां प्रेक्षावज्ज्योतिर्विदाम्।

तत्र गणितस्कन्धस्य सिद्धान्त-तन्त्र-करणेति त्रयो विभागाः सन्ति। सिद्धान्तविभागे कल्पारम्भतः ग्रहगणितविचारः, तन्त्रविभागे युगारम्भतः ग्रहगणितविचारः, करणविभागे चाभीप्सितशकसंवत्सरादि प्रारम्भतः ग्रहगणितविचारश्च सम्पद्यन्ते। वस्तुतस्तु परवर्तिसिद्धान्ततन्त्रग्रन्थेषु ग्रहगणितस्य सोपपत्तिकं प्रमेयविवरणं, सृष्टिनिर्माणवर्णनं, खगोलभूगोल-विषयकं विवेचनं, ग्रहनक्षत्रादिवेधयन्त्रादीनां[1] विज्ञानं, दिग्देशकाल-

---

१. प्रतनसमयत एव भारतवर्षे भारतीयगणकैर्ज्योतिर्विद्भिः खगोलपरीक्षणार्थं, ग्रहनक्षत्रादीनां वेधार्थं च विविधानि यन्त्राणि प्रयुज्यन्तेस्म। तदर्थं समुपयुक्तोन्नतस्थानेषु विनिर्मिताः वेधशालाः यन्त्रादिभिः सुसज्जिता आसन्। तासु प्रयुक्तेषु यन्त्रेषु प्रमुखयन्त्राणां वर्णनं भास्कराचार्य-मदनसूरि-पद्मनाभ-चक्रधर-गणेश-दैवज्ञ-चिन्तामणिदीक्षितप्रभृतिगणकवरैः स्वीयेषु ग्रन्थेषु संव्यधायि। तेषां यन्त्राणां नामानि चेमानि—चक्रयन्त्रं, चापयन्त्रं, तुरीययन्त्रं, गोलयन्त्रं, नाडीवलययन्त्रं, घटिकायन्त्रं, शङ्कुयन्त्रं, फलकयन्त्रं, यष्टियन्त्रं, स्वयंवहयन्त्रं, ध्रुवभ्रमणयन्त्रं, गोलानन्दयन्त्रं, प्रतोदयन्त्रं, सर्वतोभद्रयन्त्रञ्च।

निकटभूतसमये जयपुरमहाराजेन जयसिंहेन वैक्रमाष्टादशशतके देहली-मथुरा-जयपुर-उज्जयिनी-वाराणसीनगरेषु परिनिर्मिताः पञ्चवेधशालाः सम्प्रत्यपि जीर्णावस्थायां सन्दृश्यन्ते। तासु व्यवस्थापितानि कतिपययन्त्राणि निम्नोट्टङ्कितानि सन्ति। यन्त्रराजः, संम्राट्यन्त्रं, जयप्रकाशयन्त्रं, रामयन्त्रं, दिगंशयन्त्रं, नाडीवलययन्त्रं, दक्षिणोवृत्तियन्त्रं, षष्ठांशयन्त्रं, मिश्रयन्त्रं, राशिवलययन्त्रं, उन्नतांशचक्रयन्त्रं, क्रान्तिवृत्तयन्त्रञ्च।

एतर्हि भारते ज्योतिर्विदां वेधादिकार्यं लोपङ्गतमिति भाति। पाश्चात्यदेशेषु वेधशालासु प्रयुक्तानि यन्त्राणि नितरां समुन्नतानि भवन्ति। सम्प्रति तेषां वेधग्रहगणितादिकार्याणि पूर्णतामापन्नानि प्रतिभान्ति।

गणनामानादिविविधविषयाणां गाणितिकं विवेचनं च विशेषतया समुपलभ्यन्ते। करणग्रन्थेषु विशेषतया ग्रहगणितमधिकृत्य प्रमेयविवरणं सम्पद्यते। सामान्यतया गणितस्कन्धीयसिद्धान्ततन्त्रकरणग्रन्थेषु ग्रहगणितं निम्नलिखितेषु एकादशाधिकारेषु विवृतं विविक्तञ्चाभ्युपगम्यते।

तत्र एकादशाधिकाराः —

१. मध्यमाधिकारः, २. स्पष्टाधिकारः, ३ त्रिप्रश्नाधिकारः, ४ चन्द्रग्रहणाधिकारः, ५. सूर्यग्रहणाधिकारः, ६. छायाधिकारः, ७ उदयास्ताधिकारः, ८. शृङ्गोन्नत्यधिकारः, ९ ग्रहयुत्यधिकारः, १०. भग्रहयुत्यधिकारः, ११. महापाताधिकारश्च।

तत्र मध्यमाधिकारे ग्रहाणां मध्यमगतिस्थितिभुवनसंस्था[1]ऽयनचलनग्रहवेधादीनां विवेचनं भवति। स्पष्टाधिकारे ग्रहाणां स्पष्टगतिस्थिति-

---

१. पञ्चसिद्धान्तिकाग्रन्थस्य त्रयोदशाध्याये त्रैलोक्यसंस्थाने वराहमिहिरेण परवर्तिसिद्धान्तग्रन्थप्रणेतृभिश्च स्वीयग्रन्थेषु भुवनसंस्थावर्णनं विशदतया कृतमभ्युपगम्यते। एषां प्रतनाप्रतनगणकप्रवराणां, ज्योतिर्विदां भूगोलपरिमाणस्थितिगत्यादिविषयकाः ग्रहनक्षत्रस्थितिगतिचारपरिमाणादिविषयकाश्च खगोलशास्त्रीयसिद्धान्ताः, अत्याधुनिकभौतिकगाणितिकखगोलविज्ञानस्य (Physical and Mathemetical Astronomy) प्रत्यक्षसिद्धैर्गणितमूलकानुमानादिप्रमाणपर्यधिष्ठितैः सिद्धान्तैस्समं सर्वथा विसम्वदन्तीति भाति। इदानीन्तनैः पाश्चात्यविपश्चिद्भिः वैज्ञानिकैर्गणकप्रवरैः खगोलशास्त्रज्ञैश्च सम्प्रति खगोलविषयकं गभीरतमं, सर्वाङ्गपूर्णं चाध्ययनं, ज्योतिःशास्त्रस्य प्रमुखेषु चतुर्विधेषु विभागेषु विधीयत इति ज्ञातुं, भारतीयसंस्कृतज्योतिषज्ञानां अनुसन्धित्सूनाञ्च कृते नितरामुपयुक्तं, समुद्बोधकञ्च प्रतिभाति।

१. वर्णिकज्योतिषं, अस्मिन् खगोलानां, ग्रहनक्षत्रतारिकाऽदिविविधपिण्डानां, विशेषतया वर्णरूपादिविधया (Spectroscopic) अध्ययनं भवति। २. गतिकज्योतिषं, अत्राऽकाशस्थपिण्डानां पारस्परिकाऽकर्षणगत्यादिविषयान् समधिकृत्याध्ययनं भवति। ३. भौतिकज्योतिषं, अस्मिन्नाकाशीयपिण्डानां विशेषतया भौतिक-रासायनिकरचनादिविषयको विचारः परिसूक्ष्मतया भवति। ४. गोलीय (गणित) ज्योतिषं, अत्र ग्रहनक्षत्रादिगोलानां स्थितिगत्यादिमापन-ग्रहणादिविषयान् समधिकृत्य प्रवर्हतया गाणितिकं विवेचनं भवति।

पञ्चाङ्गा[1]दीनां वर्णनमुपलभ्यते । त्रिप्रश्नाधिकारे दिग्देशकालसाधनं गाणितिक[2]विधया भवति। चन्द्रसूर्यग्रहणाधिकारयोः चन्द्रसूर्यग्रहणविषयक-तथ्याऽदीनां विवरणं लम्बमानविवेचनं, तत्सम्बद्धगाणितिकोपपत्तिवर्णनं च भवति । छायाधिकारे सूर्यातिरिक्तग्रहाणां नित्योदयास्तकाल (दिन-मान)-वर्णनं, इष्टकालिकछायावेधादीनां च विवरणं समुपन्यस्तमस्ति ।

उदयास्ताधिकारे ग्रहाणामुदयास्तादिकमधिकृत्य विवेचनं सम्पद्यते । शृङ्गोन्नत्यधिकारे चन्द्रशृङ्ग (कला) विषयकं गाणितिकं विवरणमुप-लभ्यते । ग्रहयुत्यधिकारे राशि[3]गतग्रहयुतिसन्निकर्षादिकमधिकृत्य गणित-विचारो भवति । भग्रहयुत्यधिकारे नक्षत्रयोगताराग्रहादीनां युतिविषयको गणितविचारः सम्पद्यते । महापाताधिकारे चन्द्रसूर्ययोः क्रान्तिसाम्यरूप-महापातस्य साङ्गोपाङ्गं विवेचनं भवति।

संहितास्कन्धे ग्रहण-ग्रहयुद्ध-ग्रह[4]स्थिति-ग्रहयुति-ग्रहास्तोदय-शृङ्गो-न्नति - धूमकेतु - उल्कापात - परिवेश-इन्द्रधनुष्यादीनां शुभाशुभफलविधानं, जगतराष्ट्रादीनाञ्च कृते संविहितं, त्याज्यविहितकालविधानं, गृहप्रवेश-यात्रा - राज्याभिषेकादिसकलविशिष्टकार्यप्रपञ्चस्य, समस्तसंस्कारादीनाञ्च शुभफलानुबन्धिमुहूर्तविधानं, पञ्चाङ्गानां शुभाशुभत्वप्रख्यापनं, अशुभ-फलानुबन्धिकार्यादीनां शान्तिविधानं, अङ्गस्फुरण-पल्लीपतन-स्वप्नादि-

---

१. तिथि-वार-नक्षत्र-योग-करणानि पञ्चाङ्गानि । चान्द्रेमासि, त्रिंशत्तिथयः, सप्त-वाराः, सप्तविंशसंख्याकानि नक्षत्राणि, सप्तविंशयोगाः, षष्टिकरणानिच भवन्ति ।

२. गणितं पञ्चविधमस्ति—१. अङ्क (पाटी) गणितं, २. बीजगणितं, ३. रेखागणितं, ४. त्रैकोणमितिकगणितं, ५. ग्रहगणितञ्च ।

३. मेष-वृषभ-मिथुन-कर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुम्भ-मीनरूपाः द्वादश-राशयः समाम्नाता वरीवृतति ।

४. प्राचीनमते सूर्य-सोम-भौम-बुध-बृहस्पति-शुक्र-शनयः सप्तग्रहाः, नवीनमते सप्त-ग्रहातिरिक्तौ राहुकेतूचेतिनवग्रहाः, आधुनिकमते हर्षल-यूरेनस-नेपच्यून-प्लूटो-आदिग्रहाश्च सन्ति । साम्प्रतिकैः खगोलशास्त्रज्ञैर्ग्रहाः पञ्चविधाः साक्षात्कृताः सन्ति । ग्रहः (Planet), उपग्रहः (Satellite), अन्तर्ग्रहः (Interior Planet), बहिर्ग्रहः (Exterior Planet), लघुग्रहः (Asteroide) च ।

विविधशकुनानां विवरणं, तच्छुभाशुभफलविधानं, वास्तुप्रासादनिर्माण-शुभाशुभफलविधानञ्च वैस्तर्येण सोपपत्तिकं विहितमस्ति ।

होरास्कन्धे (फलितस्कन्धे) मानवादीनां जान्मकालिकग्रहाणां राशिगतस्थिति-युति-दृष्टि-योगाद्यनुसारेण, अतीत-वर्तमान-अनागत-समयान्समनुरुध्य शुभाशुभकर्मफलादीनां संविधानं, एतद्विषयकसूक्ष्मतमविवरणोन्मुखं परिवर्णनञ्चादभ्रतया कृतमवगम्यते । स्कन्धेऽस्मिन् जातक-ताजिक-जैमिनिसूत्र-भृगुसंहिता - नाडीग्रन्थ - केरलमत - प्रश्नशास्त्र - पाशक (रमल) विद्या-स्वरशास्त्र-सामुद्रिकशास्त्रादिविविधशाखानां फलित (होरा) सम्बन्धिनीनामशेषतया सन्निवेशो भवति ।

जातकशास्त्रम्—

अस्मिन् जातकस्य जन्मराशिकुण्डल्योः त्रिनवद्वादशाद्यंशकुण्डलीनां च द्वादशराशिभावान्यतमराशिभावगतनवग्रहाणां स्थितियुतिदृष्टियोगाद्यनुसारेण त्रैकालिकशुभाशुभफलाऽदीनां विधानानि भवन्ति ।

ताजिकशास्त्रम्—

अस्मिन् जातकस्य कुण्डल्यनुसारितात्कालिकगोचरग्रहस्थित्याद्यनुसारेण वार्षिकं, मासिकं, साप्ताहिकं, दैनिकं वा फलविधानं भवति । शास्त्रमिदं सम्भवतः भारतीयैर्यवनेभ्यः समधिगतं प्रतिभाति ।

जैमिनिसूत्राणि (उपदेशसूत्राणि)—

अध्यायचतुष्टये ९३१ संख्याकैर्गद्यात्मकसूत्रैस्समनुबद्धोऽयं ग्रन्थः विविध-टीकाभि समलङ्कृतः जातकस्य त्रैकालिकफलादेशफलकोऽस्ति ।

भृगुसंहिता—

ग्रन्थोऽयं बृहत्परिमाणः सम्प्रति प्रसिद्धिपदमुच्चैस्समलङ्कुर्वन् भारते विराजते । अमुना ग्रन्थराजेन न केवलं जन्मकुण्डल्यनुसारेण जातकस्य वर्तमानजन्मनस्त्रैकालिककर्मफलादीनां समाख्यानं विधीयते; अपितु तस्यातीतानागतजन्मनोरपि शुभाशुभकर्मणां, तत्फलादीनाञ्च संविधानं, प्रामुख्येणातीतजन्मप्रभूताशुभकार्यफलविनाशनक्षमाणां मन्त्रादीनां विधानञ्च क्रियत इति महानस्य विशेषः प्रतिभाति । ग्रन्थराजेऽस्मिन् प्रायः सकल-

मानवानां जन्मकुण्डलीनां तत्फलादेशादीनाञ्च विशालतम[1] संग्रहो भवितुमर्हति ।

नाडीग्रन्थः—

दक्षिणभारते विशेषतया प्रसिद्धोऽयं ग्रन्थः भृगुसंहितोपमः, विशालकलेवरः सप्ततिभागेषु विभक्तश्च विविधस्थानीयानां विभिन्नज्योतिर्विदां सविधे भागशः समुपलभ्यते ।[2]

केरलमतम्—

केरलदेशे विशेषतया प्रसिद्धमिदं, कालत्रयविषयकफलादेशफलकं फलितग्रन्थात्मकं वरीवर्ति ।

प्रश्नशास्त्रम्—

इदं प्रश्नकालिकलग्न-ग्रह-स्थित्यनुसारं फलं समादिशति ।

पाशकशास्त्रम्—

इदं पाशाङ्कितचिह्नादिसूचकफलादेशविधायकत्वेन प्रसिद्धमस्ति ।

---

१. भृगुसंहितायां द्वादशलग्नराशि-जन्मराशि-नवग्रहराशिभेदानुसारेण (By Permutation Combinations) ७,४६,४९,६०० संख्याकाः कुण्डल्य. शंकरबालकृष्णदीक्षितमहोदयस्य गणनया, ४,४७,८९,७६० संख्याकाः कुण्डल्यः केदारदत्तजोशिमहाशयस्य गणनया च भवितुमर्हन्ति । प्रत्येकायाः कुण्डल्याः फलविधानं, स्वल्पतमरूपेष्वपि चत्वारिंशच्छ्लोकेषु भवितुं शक्य प्रतिभाति । इत्थं, ७,४६,४९,६०० × ४० = २,९८,५९,८४,००० संख्याकेषु, ४,४७,८९,७६० × ४० = १,७९,१५,९०,४०० संख्याकेषु वा श्लोकेषु समनुबद्धोऽयं ग्रन्थ, बृहत्तमपरिमाणः सम्प्रति भवितुं, समुपलब्धुं वाऽर्हतीतिविषये प्रेक्षावत्सु जिज्ञासुषु संशीतिर्भवितुमर्हति । अथवाऽस्यां समनुगतसूत्रात्मक (Formula) विधया समस्तकुण्डलीनां, फलादेशादीनां च संक्षेपेण सन्निवेशो भवितुमर्हति ।

प्राचीनेषु फलितज्योतिषग्रन्थेषु भृगुसंहिताया उल्लेखोहि नोपलभ्यत इतिकृत्वाऽस्याः प्राचीनत्वं, प्रमाणत्वञ्च निःसन्दिग्धं न प्रतिभाति ।

२. चिदम्बरंऐय्यरमहोदयेन लिखितो नाडीविषयकप्रबन्धः (The Hindu Zodiac) नाडीग्रन्थविषयकजिज्ञासानिवारणार्थं द्रष्टुं योग्यः प्रतिभाति ।

स्वरशास्त्रम्[1] —

अस्मिन् इडापिङ्गलासुषुम्णेतितिसृणां नाडीनां, चन्द्रसूर्यस्वरयोश्च विवरणं, नाडीगत-पृथिव्यप्तेजोवाय्वेतितत्त्वचतुष्टयान्यतमोदयस्य, तन्निर्दर्शितशुभाशुभकर्मफलादीनां च विवेचनं चोपलभ्यते ।

सामुद्रिकशास्त्रम्[2] —

करतल-पादतल-ललाटादिशरीराङ्गस्थचिह्नानां रेखादीनाञ्च त्रैकालिकसकलकार्यकलापसूचकत्वेनेष्टानिष्टफलनिर्देशकत्वेन च सविस्तरं विवरणं, विवेचनं, तद्विषयकनियमादिप्रख्यापनञ्चास्मिन् विशदतया, सूक्ष्मतया च विहितमभ्युपगम्यते ।

प्रतनतमसमयादारभ्य विक्रमसमयपर्यन्तं भारतीयं संस्कृतज्योतिषं वेदवेदाङ्गपुराणेतिहासस्मृत्यादिषु समुपलब्धैर्ज्योतिर्विषयकसिद्धान्तानां विवरणैस्समुपबृंहितं, स्वतन्त्रतया विकसितेन शास्त्ररूपेण ज्योतिरिव भृशं चकास्तिस्मेत्यत्र न काऽपि संशीतिः प्रतिभाति । पुरातनसमयेऽपि श्रौत-स्मार्त-गृह्य-धर्मकार्याणि ज्योतिषशास्त्रविहितोचितमुहूर्तमनुरुध्य सम्पादितानि, अपूर्वपुण्यफलजनकानि भवन्तिस्म । इत्थं ज्योतिषस्य वेदोपजीवकत्वेन प्रमाणत्वं, मौलिकत्वञ्च सुव्यक्तं भवति ।

यद्यपि विक्रमपूर्वीयपञ्चशतकेषु, वैक्रमप्रथमपञ्चशतकेषु च मेसोपोटेमिया (बॅबिलोन) - ग्रीस (यूनान)-इजिप्त (मिश्र) - अरेबिया - चीन-आदिदेशीयानां गणकानां ज्योतिर्विदां, थेल्स (वि० पू० ६ शतकं), पाइथागोरस (वि० पू० ५ श०), यूडाक्सस (वि० पू० ४ श०), अरिस्टिलिस (वि० पू० ३ श०), टिमोरिस (वि० पू० ३ श०), अरिस्टार्कस (वि० पू० ३ श०), आर्किमिडिस (वि० पू० ३ श०), अपोलो-

---

१. स्वरशास्त्रे प्रतिपादितानामाचाराणां, स्वरतत्त्वसाधनीभूतानां, अनुष्ठानादीनाञ्च हठयोगप्रतिपादितत्वं, त्रैकालिककार्यफलादिप्रतिपादकनाडी-स्वरभौतिकतत्त्वादिविषयकसिद्धान्तानां फलितज्योतिषशास्त्रान्तर्भूतत्वं च सम्प्रतिपद्यते ।

२. एतद्विषयमवलम्ब्य पाश्चात्यविपश्चिद्भिः सामुद्रिकशास्त्रज्ञैः सम्प्रति स्वीयस्वतन्त्रविचाराणां, सामुद्रिकसिद्धान्तानाञ्चोद्भावनं कृतमभ्युपगम्यते ।

नियस (वि० पू० २ श०), एरॉटॉस्थिनिज (वि० पू० २ श०), हिपार्कस (वि० पू० २ श०), स्ट्रेबो (वि० पू० १ श०), टॉलेमी (वै० २ श०) प्रभृतीनां ज्योतिर्विषयकगणितफलितादिसिद्धान्ताः तत्सामयिक-वराहमिहिरादिज्योतिर्विद्भिः परवर्तिभारतीयज्योतिषशास्त्रज्ञैः परिज्ञाता आसन् । पौलिशरोमकादिसिद्धान्ताः भारतीयैर्ज्योतिषाचार्यैस्समुद्भाविता अपि यवनसिद्धान्तविवरणप्रवणा इदमेव तथ्यं व्यक्तीकुर्वन्ति। वराहमिहिरादिग्रन्थप्रणेतृभिस्तेषां बृहज्जातकादिग्रन्थेषु कृताः क्रिय (मेष) - ताबुरि (वृषभ) - जित्तुम (मिथुन) - कुलीर (कर्क) - लेय (सिंह) - पाथेन (कन्या) - जूक (तुला) - कौर्प्य (वृश्चिक) - तौक्षिक (धनु) - आकोकेर (मकर) - हृद्रोग (कुम्भ) - इत्थम् (मीन) - होरा-द्रेष्काण - रिफ्फ-द्यून -पणफर-आपोक्लीम-हिबुक-यामित्र-त्रिकोण-मेषूरण-वेशि-हेलि - (सूर्य) - हेम्न (चन्द्र) - आर (मंगल) - कोण (शनि) - आस्फुजित (शुक्र) - सुनफ़ा - अनफ़ा दुरुधर - केमद्रुमेत्याद्यानां यावनीनां संज्ञानां प्रयोगाः, तेषां भारतीयज्योतिर्विदां न तावद्यवनगणकोद्भावित-ज्योतिर्विषयकसिद्धान्तानुप्रेरितत्वं, अपितु तत्सिद्धान्तादिविषयकं प्रगाढं परिचयं परिसूचयति ।[1]

सिद्धान्तज्योतिषस्य प्रमुखाः ग्रन्थाः —

आर्यसिद्धान्तः[2] (आर्यभटीयम्) – प्रथमार्यभटः (वै० ६ श०), पञ्चसिद्धान्तिका-वराहमिहिरः (वै० ६ श०), ग्रहचारनिबन्धनम्-हरिदत्तः (वै० ७ श०), महाभास्करीयं, लघुभास्करीयञ्च[3]–प्रथमभास्करः

---

१. भारतीय-यवनादिज्योतिर्विदां ज्योतिषसिद्धान्तसाम्यमूलको विभ्रमः पाश्चात्यविपश्चित्सु ह्विटने-थिबो-कोलब्रुक-बर्जेस-आदिसमीक्षकेषु भारतीयज्योतिषशास्त्रस्य मौलिकत्वविषयिणीमन्यथाप्रतिपत्तिं जनयामासेति तेषामेतद्विषयकसमीक्षणात्मकैर्निबन्धैरभिव्यज्यते ।

२. अस्य टीकाः–आर्यभटतन्त्रभाष्यम्–प्रथमभास्करः, आर्यभटप्रकाशव्याख्या–सूर्यदेवयज्वा, भटदीपिकाव्याख्या–परमेश्वरः (परमादीश्वरः), नीलकण्ठीव्याख्या –नीलकण्ठः च ।

३. एतौ ग्रन्थौ मदरास-त्रिवेन्द्रम-आदिनगरस्थहस्तलिखितपुस्तकालयेषु सुरक्षितौ स्तः ।

(वै० ७ श०), ब्राह्मस्फुटसिद्धान्तः[1], खण्डखाद्यकञ्च[2]–ब्रह्मगुप्तः (वै० ७ श०), शिष्यधीवृद्धितन्त्रम् – लल्लाचार्यः (वै० ७ श०), गणितग्रन्थः–पद्मनाभः (प्रथमः) (वै० ९ श०), त्रिंशिका (गणितसारः) – श्रीधरः (वै० ९ श०), गणितसारसंग्रहः–महावीरः (वै० ९ श०), बृहन्मानसकरणम्–मनुः (वै० ९ श०), करणसारः-वित्तेश्वरः (वै० १० श०), महासिद्धान्तः-द्वितीयार्यभटः (वै० १० श०), लघुमानसकरणम्-मुञ्जालाचार्यः (वै० १० श०), लोकानन्दकरणम् – लोकानन्दः (वै० १० श०), करणतिलकम्-विजयनन्दी (वै० ११ श०), भट्टिलकरणम्–भट्टिलः (वै० ११ श०), करणपरतिलकम्–भानुभट्टः (वै० ११ श०), सिद्धान्तशेखरः, धीकोटिदकरणं, गणिततिलकञ्च–श्रीपतिः (वै० ११ श०), राजमृगाङ्कः-भोजराजः (वै० ११ श०), करणकमलमार्तण्डः–दशवलः (वै० १२ श०), करणप्रकाशः–ब्रह्मदेवः (वै० १२ श०), भास्वतीकरणम् (विविधटीकायुतम्)–शतानन्दः (वै० १२ श०), करणोत्तमः–अज्ञातनामा (वै० १२ श०), शेखरः–महेश्वरः (वै० १२ श०), अभिलषितार्थचिन्तामणिः (मानसोल्लासः)–सोमेश्वरः (सर्वज्ञभूपालः) (वै० १२ श०), सिद्धान्तशिरोमणिः (लीलावती, बीजगणितञ्च), लघुभास्करीयम्, वासनाभाष्यम्, करणकुतूहलम्, सर्वतोभद्रयन्त्रञ्च-भास्कराचार्यः (वै० १२ श०), करणग्रन्थः–मल्लिकार्जुनः (वै० १३ श०), करणकण्ठीरवः, सिद्धान्तलघुखमाणिकञ्च–केशवार्कः (वै० १३ श०), ग्रहसिद्धिः (सारणी)-महादेवः (वै० १४ श०), करणग्रन्थः-ड़ल्लुमुडयनः (वै० १४ श०), कामधेनुकरणम्–महादेवः (अपरः) (वै० १४ श०), करणग्रन्थः–वाविलालकोचन्ना (वै० १४ श०), यन्त्रराजः–महेन्द्रसूरिः (वै० १५ श०), ध्रुवभ्रमयन्त्रं, यन्त्ररत्नावली च–पद्मनाभः (अपरः) (वै० १५ श०), यन्त्रचिन्तामणिः-चक्रधरः (वै० १५ श०), गोलदीपिका-परमेश्वरः (वै० १५ श०), भटतुल्यम्–दामोदरः (वै० १५ श०), चान्द्रमानाभिधानतन्त्रम् – गङ्गाधरः (वै० १५ श०), मकरन्दः सारणीग्रन्थः–मकरन्दः (वै० १६ श०),

---

१. अस्य पृथूदकटीका समुपलभ्यते ।

२. अस्य वरुणभटोत्पलकृते टीके समुपलभ्येते । ब्राह्मस्फुटसिद्धान्तस्य, खण्डखाद्यकस्यच अरेबिकभाषायामनुवादः 'अस् सिन्द हिन्द', 'अल् अर्कन्द' इतिनामभ्यां प्रसिद्धोऽस्ति ।

करणग्रन्थः-बालादित्यः (कल्लुः) (वै० १६ श०), ग्रहकौतुकं, ग्रहचालनगणितदीपिका, वर्षग्रहसिद्धिः, तिथिसिद्धिश्च - केशवदैवज्ञः (वै० १६ श०), राशिगोलस्फुटनीतिः-अच्युतः (वै० १६ श०), ग्रहलाघवं, बृहत्तिथिचिन्तामणिः, प्रतोदयन्त्रं, लघुतिथिचिन्तामणिः, पातसारणी च—गणेशदैवज्ञः (वै० १६ श०), वाक्यकरणम्-वररुचिः (वै० १६ श०), सिद्धान्तसुन्दरः-ज्ञानराजः (वै० १६ श०), अनन्तसुधारसः-अनन्तः (वै० १६ श०), ग्रहलाघवोदाहरणं, ग्रहफलोपपत्तिः, पञ्चाङ्गफलं, कुण्डकल्पलता च-दुण्ढिराजः (वै० १६ श०), कल्पद्रुमकरणम्-रामचन्द्रः (वै० १७ श०), सुबोधमञ्जरी-रघुनाथः (वै० १७ श०), सिद्धान्तदर्पणः-नीलकण्ठः (वै० १७ श०), मणिप्रदीपः-रघुनाथः (अपरः) (वै० १७ श०), खेटकसिद्धिः, चन्द्रार्की च-दिनकरः (वै० १७ श०), रामभट्टः (वै० १७ श०), ग्रहचिन्तामणिः-श्रीनाथः (वै० १७ श०), करणग्रन्थः-विष्णुः (वै० १७ श०), सूर्यसिद्धान्तरहस्यम्-राघवः (वै० १७ श०), सूर्यसिद्धान्तमञ्जरी-मथुरानाथः (वै० १७ श०), ग्रहप्रबोधः-नागेशः (वै० १७ श०), सिद्धान्तसार्वभौमः, पाटीसारः, सिद्धान्तशिरोमणेः मरीचिटीका, लीलावत्याः निसृष्टार्थदूतीविवृतिव्याख्या मुनीश्वरः (विश्वरूपः) (वै० १७ श०), मध्यमग्रहसिद्धिः, कालप्रकाशिका, ग्रहकौमुदी च-नृसिंहः (वै० १७ श०), नारायणीबीजम्-नारायणः (वै० १७ श०), सिद्धान्ततत्त्वविवेकः-कमलाकरः (वै० १७ श०), सिद्धान्तचूडामणिः, सिद्धान्तशिरोमणेर्मितभाषिणीटीका च-रङ्गनाथः (वै० १७ श०), सिद्धान्तराजः-नित्यानन्दः (वै० १७ श०), पञ्चाङ्गशिरोमणिः-अज्ञातनामा (वै० १८ श०), करणकौस्तुभः-कृष्णपण्डितः (वै० १८ श०), ग्रहतरङ्गिणी-अज्ञातनामा (वै० १८ श०), पञ्चाङ्गकौतुकम्-रत्नकण्ठः (वै० १८ श०), सिद्धान्तमञ्जरी-अज्ञातनामा (वै० १८ श०), वार्षिकतन्त्रम्-विट्ठ्ण्णः (वै० १८ श०), फत्तेशाहप्रकाशः (करणग्रन्थः)-जटाधरः (वै० १८ श०), गणितकौमुदी-नारायणभट्टगावकरः (वै० १८ श०), सिद्धान्तसंम्राट्, रेखागणितञ्च-जगन्नाथपण्डितः (वै० १८ श०), वैष्णवकरणम्-शंकरः (वै० १९ श०), ग्रहगणितचिन्तामणिः-मणिराम (वै० १९ श०), ब्रह्मसिद्धान्तसारः-भूलाभट्टः (वै० १९ श०), यन्त्रराजघटना, नक्षत्रस्थापनविधिः, ज्योतिःसिद्धान्तसारश्च-मथुरानाथः (अपरः) (वै० १९ श०), सूर्यसिद्धान्त-

सारणी, गोलानन्दः (वेधग्रन्थः) च-चिन्तामणिदीक्षितचिपळूणकरः (वै० १९ श०), खेटकृतिः, तिथिपारिजातश्च-राघवखाण्डेकरः (वै० १९ श०), तिथिपारिजातः-शिवदैवज्ञः (वै० १९ श०), विविधसारण्यः, चन्द्रोदयाङ्कजालः, ग्रहणाङ्कजालश्च-दिनकरः (अपरः) (वै० १९ श०), सिद्धान्तशिरोमणिप्रकाशः-सुबाजीबापू (वै० १९ श०), ज्योतिष-पुराणविरोधमर्दनम्, यन्त्रराजवासनाटीका, गोलानन्दानुभावटीका, मणिकान्तिटीका, प्रश्नोत्तरमालिका च—यज्ञेश्वरशास्त्रिजोशीरोडे (वै० १९ श०), रेखागणितं, त्रिकोणमितिः, चापीयत्रिकोणमितिः, अङ्कगणितं, सायनवादः, तत्त्वविवेकपरीक्षा, प्राचीनज्योतिषाचार्याऽशयवर्णनं, चलनकलनसिद्धान्तबोधकं, अष्टादशविचित्रप्रश्नसङ्ग्रहः, सिद्धान्तग्रन्थोपयोगिटिप्पणं, यन्त्रराजोपयोगिछेद्यकं, लघुशङ्कुछिन्नक्षेत्रगुणः, मानमन्दिरस्थयन्त्रवर्णनं, सिद्धान्तशिरोमणेः टिप्पणञ्च—नृसिंहबापूदेवः (वै० १९-२० श०), गोत्रप्रकाशः-नीलाम्बरशर्मा (वै० २० श०), ज्योतिर्गणितं, केतकीयग्रहगणितं, भूमण्डलीयसूर्यग्रहणगणितं, सौर-आर्य-ब्रह्म-पक्षीयतिथिगणितं, वैजयन्तीसारणीसङ्ग्रहः, केतकीयपरिशिष्टं, केतकीवासनाभाष्यं, शास्त्रशुद्धपञ्चाङ्गायनांशनिर्णयश्च-वेङ्कटेशशास्त्रि-केतकरः (वै० २० श०), सिद्धान्तसारः-विनायकशास्त्रिखानापुरकरः (वै० २० श०), दीर्घवृत्तलक्षणं, विचित्रप्रश्नाः सभङ्गाः, वास्तविकचन्द्र-शृङ्गोन्नतिसाधनं, द्युचरचारः, भाभ्रमरेखानिरूपणं, धराभ्रमः, ग्रहण-करणं, गोलीयरेखागणितं, यन्त्रराजस्य प्रतिभाबोधिकाटीका, लीलावत्याः सोपपत्तिकाव्याख्या, भास्करीयबीजगणितस्य व्याख्या, करणकुतूहल-व्याख्या (वासनाविभूषणं), पञ्चसिद्धान्तिकायाः प्रकाशटीका, सूर्यसिद्धा-न्तस्य सुधावर्षिणीव्याख्या, ग्रहलाघवव्याख्या, ब्राह्मस्फुटसिद्धान्तव्याख्या, द्वितीयार्यभटस्य महासिद्धान्तस्य व्याख्या, गणकतरङ्गिणी च-सुधाकर-द्विवेदः (वै० २० श०), लीलावत्याः बीजगणितस्य च व्याख्या, सिद्धान्त-शिरोमणेः उपपत्तीन्दुशेखरभाष्यञ्च-दुर्गाप्रसादद्विवेदः (वै० २० श०), प्रभाकरसिद्धान्तः-दीनानाथशास्त्रिचुलैटः (वै० २० श०), सर्वानन्द-करणम्-आप्टेगोविन्दसदाशिवः (वै० २० श०), दृक्पञ्चाङ्गनिर्माण-पद्धतिः-गणपतिदेवशास्त्री (वै० २०-२१ श०) इत्येवमादयः।

भास्वतीकरणस्य व्याख्याः —

बालबोधिनीटीका-बलभद्रः (वै० १५ श०), टीका-अनिरुद्धः (वै०

१६ श०), टीका–माधवः (वै० १६ श०), टीका–गङ्गाधरः (वै० १८ श०), भास्वतीकरणपद्धतिः, तत्त्वप्रकाशिका–रामकृष्णः, वृन्दावन-अच्युत-गोपाल-चक्रविप्रदास-रामेश्वर-सदानन्दप्रणीताः व्याख्याः, ऑफ्रेख्टस्य सूचीपत्रेषूल्लिखिताः सन्ति ।

भास्करीयलीलावत्याः टीकाः —

गणितामृतलहरीव्याख्या–रामकृष्णः (वै० १४ श०), गणितामृत-सागरीटीका–गङ्गाधरः (वै० १५ श०), पाटीगणितकौमुदीटीका-नारायणः (वै० १५ श०), बुद्धिविलासिनीटीका–गणेशदैवज्ञः (वै० १६ श०), लीलावतीभूषणटीका–धनेश्वरदैवज्ञः (वै० १७ श०), लीलावतीविवृतिः–मुनीश्वरः (वै० १७ श०), लीलावतीविवरणटीका–महीधरः (वै० १७ श०), मनोरञ्जना–रामकृष्णदेवः, लीलावतीभूषणटीका–रामचन्द्रः, निसृष्टार्थदूतीव्याख्या–विश्वरूपः, गणितामृतकूपिका–सूर्यदासः, उदाहरणम्–चन्द्रेश्वरपट्टनायकः, उदाहरणम्-विश्वेश्वरः, च। अतिरिक्ताः दामोदर-देवी-सहाय - परशुराम - रामदत्त - लक्ष्मीनाथ - वृन्दावन - श्रीधरमैथिलकृता-व्याख्याः, आफ्रेख्टस्य पुस्तकसूचीपत्रे समुल्लिखिताः सन्ति ।

बीजगणितस्य व्याख्याः —

बीजनवाङ्कुराटीका–कृष्णः (वै० १७ श०), बीजप्रबोधटीका–रामकृष्णः (वै० १७-१८ श०), बीजविवृतिकल्पलता–परमसुखः, सोदाहरणटीका-कृपारामः इत्याद्याः ऑफ्रेख्टमहोदयस्य पुस्तकसूचीपत्रेषूल्लिखिता वरीवृतति ।

सिद्धान्तशिरोमणेः व्याख्याः —

सूर्यदास-परमादीश्वर-नृसिंह-रङ्गनाथ-मुनीश्वर-लक्ष्मीदास-विश्वनाथ-राजगिरिप्रवासि-चक्रचूडामणि- जयलक्ष्मण-महेश्वर - मोहनदास-लक्ष्मीनाथ-वाचस्पतिमित्र-हरिहर-आदिप्रणीता व्याख्या ऑफ्रेख्टस्य पुस्तकसूचीपत्रेषूल्लिखिताः सन्ति ।

करणकुतूहलस्य व्याख्याः —

सोढल - नर्मदात्मज- पद्मनाभ - शङ्कर-केशवार्क- हर्षगणि - विश्वनाथ-एकनाथकृताः, ऑफ्रेख्टस्य सूचीपत्रेषूल्लिखिताव्याख्याः परिज्ञायन्ते ।

ग्रहलाघवस्य व्याख्याः —

गङ्गाधर-मल्लारि-विश्वनाथप्रणीता व्याख्या ऑफ्रेख्टेन स्वीये पुस्तक-सूचीपत्र उल्लिखिता विद्यन्ते ।

संहिता (मुहूर्त) स्कन्धीयाः प्रमुखाः ग्रन्थाः, तत्प्रणेतारश्च—

बृहत्संहिता, बृहद्विवाहपटलं, यात्राविचारश्च-वराहमिहिरः (वै० ६ श०), बृहत्संहितायाः टीकाः-भटोत्पल (वै० ११ श०) कृताटीका, महीदास (वै० १७ श०) कृताटीका, महीधर (वै० १७ श०) प्रणीता टीका च ।

रत्नकोशः— लल्लाचार्यः (वै० ७ श०), रत्नमाला, रत्नसारः, रत्नावली च-श्रीपतिः (वै० ११ श०), राजमार्तण्डः, विद्वज्जनवल्लभः, आदित्यप्रतापसिद्धान्तश्च-भोजराजः (वै० ११ श०), प्रतिष्ठाविधिदीपकः, वृत्तशतकमादयः-महेश्वरः (वै० १२ श०), अद्भुतसागरः-बल्लालसेनः (वै० १३ श०), ज्योतिर्विदाभरणम्-कालिदासः (वै० १३ श०), विवाहवृन्दावनम्-केशवार्कः (वै० १३ श०), सिद्धान्तचूडामणिः, रत्नमालाटीका च-माधवः (वै० १४ श०), व्यवहारप्रदीपः-पद्मनाभः (वै० १५ श०), मुहूर्ततत्त्वम्-केशवदैवज्ञः (वै० १६ श०), विवाह-पटलम्-शार्ङ्गधरः (वै० १६ श०), ज्योतिर्निबन्धः-शिवदासः (वै० १६ श०), विवाहपटलम्-पीताम्बरः (वै० १६ श०), ज्योतिषदर्पणः-कञ्चपल्लुः (वै० १७ श०), मुहूर्तमार्तण्डः, स्वोपज्ञटीकायुतः-नारायण-भट्टः (वै० १७ श०), तोडरानन्दः-नीलकण्ठः (वै० १७ श०), मुहूर्त-चिन्तामणिः-रामभट्टः (वै० १७ श०), मुहूर्तचिन्तामणेः टीके-रामभट्ट-कृता स्वोपज्ञप्रमिताक्षराटीका, तद्भ्रातृव्यगोविन्दप्रणीता पीयूषधारा-टीका च ।

मुहूर्तचूडामणिः-शिवदैवज्ञः (वै० १७ श०), मुहूर्तकल्पद्रुमः, स्वोपज्ञ-मञ्जरीटीकायुतः-विठ्ठलदीक्षितः (वै० १७ श०), मुहूर्तमाला-रघुनाथः (वै० १७ श०), मुहूर्तदीपकः-महादेवः (वै० १८ श०), मुहूर्तगणपतिः-गणपतिः (वै० १८ श०), मुहूर्तसिन्धुः-गङ्गाधरशास्त्रिदातारः (वै० १९-२० श०) च ।

मुहूर्तविषयकाः केचन ग्रन्थाः —

मुहूर्तदीपिका-बादरायणः, मुहूर्तराजः-चण्डिका, मुहूर्तसारः-रामः,

मुहूर्तभास्करः–करुणानिधिः, मुहूर्तमञ्जरी, मुहूर्तसङ्ग्रहः, मुहूर्तदर्पणश्चेत्यादयः ।

ज्योतिषविषयकग्रन्थाः —

ज्योतिर्निबन्धः–सूरमहाठशिवराजः, ज्योतिषार्णवः–भूगोलवेङ्कटेशः, ज्योतिषार्थसङ्ग्रहः – नृसिंहसूरिः, ज्योतिषार्णवसारः – हस्तियवनेश्वरः, ज्योतिषदर्पणः, ज्योतिर्विज्ञानं, ज्योतिषचन्द्रार्कः, ज्योतिषचन्द्रिका, ज्योतिषार्कः, ज्योतिषचिन्तामणिः, ज्योतिषरत्नसङ्ग्रहः, ज्योतिर्विवरणं, ज्योतिर्विवेकः, ज्योतिस्तन्त्रं, ज्योतिषरत्नाकरः, ज्योतिषप्रबोधः, ज्योतिषस्तवः, ज्योतिषसर्वसङ्ग्रहः, ज्योतिषसिद्धान्तसङ्ग्रहः, ज्योतिषप्रकाशः, ज्योतिःसारः, ज्योतिःसागरः, बृहज्ज्योतिषसारश्चेत्यादयः ।

दैवज्ञकल्पद्रुमः, दैवज्ञकामधेनुः, दैवज्ञचिन्तामणिः, दैवज्ञमुखमण्डनं, दैवज्ञविलासः, दैवज्ञशिरोमणिः, दैवज्ञमनोहरः, दैवज्ञवल्लभ, दैवज्ञाभरणञ्च ।

संहितादीपकः, संहिताप्रदीपः, संहितासारः, संहितासारावलिश्च ।

लक्ष्मीधरपटलं, गदाधरपटलं, शान्तिपटलं, मौञ्जीपटलं, विवाहपटलं, गोरजपटलं, काश्यपटलञ्च ।

विवाहकौमुदी, उद्वाहतत्त्वं, व्यवहारतत्त्वं, चूडारत्नं, रत्नावली, राजावली, कालविवेकः, कल्पलता, जगन्मोहनः, नरेन्द्रवल्ली, फलप्रदीपः, व्यवहारोच्चयः, सारसागरः, भूपालवल्लभः, सज्जनवल्लभः, मुक्तावली, समयसिद्धान्तः, रत्नोज्ज्वलसंहिता, गणकमण्डनञ्च ।

विधिरत्नम्–कृष्णः, विधानतिलकम्–रङ्गराजः, कालविधानपद्धतिः–त्रिविक्रमः, ग्रहणनिर्णयः–मल्लारिदैवज्ञः, इनकुलराजतेजोनिधिः, वाक्यामृतञ्च–तुलाराजश्च ।

अहिबल - अवकडहा - होडा - प्रस्तारादिबोधकचक्राणि । विविधाः सारण्यः । निरयन - सायन - नाविक - दृक्प्रत्ययीय - दृग्गाणितिकानि विविधानि पञ्चाङ्गानि ।

शकुनविषयकाः प्रमुखाः ग्रन्थाः —

नरपतिजयचर्या – पद्मादित्यदेवनरपतिः (वै० १३ श०), अस्य

ग्रन्थस्य टीकाः हरिवंश-नरहरि-भूधर-रामनाथादिप्रणीताः सन्ति । नरहरि-शाकुनम्-नरहरिः, हरिद्राशाकुनम्-अज्ञातः, वसन्तराजशाकुनम्-वसन्त-राजः, शकुनावलिः, चूडामणिशास्त्रञ्चेत्यादयः ।

स्वप्नशकुनविषयकग्रन्थाः —

विवेकविलासः, भगवतीसूत्रं, स्वप्नशास्त्रं (स्वप्नाध्यायः), स्वप्न-कमलाकरश्च ।[1]

फलितस्कन्धीयप्रमुखाः ग्रन्थास्तत्प्रणेतारश्च—

अपौरुषेयग्रन्थाः —

गौरीजातकं, कालजातकं, शिवजातकं, योगिनीजातकञ्च ।

आर्षग्रन्थाः —

पराशरसंहिता (लघु-बृहत्पाराशरी), भृगुसंहिता, जैमिनीयसूत्राणि (जैमिनीयकारिकाः), भद्रबाहुसंहिता चेत्यादयः ।

बृहज्जातकं, लघुजातकं, होराशास्त्रं (भटोत्पलकृतटीकायुतं) च-वराहमिहिरः (वै० ६ श०), षट्पञ्चाशिका-पृथुयशा (वै० ६ श०), होराशास्त्रम्-नरेन्द्रः (वै० ६ श०), श्रीधरपद्धतिः-श्रीधरः (वै० ८ श०), सारावली-कल्याणवर्मा (वटेश्वरः) (वै० १० श०), आर्या-सप्ततिः-भटोत्पलः (वै० ११ श०), जातकपद्धतिः-श्रीपतिः (वै० ११ श०), वृद्धजातकम्-अज्ञातः (वै० १२ श०), रामकृष्णपद्धतिः-राम-कृष्णः (वै० १२ श०), म्हालुगिपद्धतिः-म्हालुगिः (वै० १३ श०), वल्लयुपद्धतिः-वल्लयुः (वै० १३ श०), जातकार्णवः-सायणाचार्यः (वै० १४ श०), भावनिर्णयः-माधवाचार्यः (वै० १४ श०), ग्रहभावप्रकाशः-पद्मनाभः (वै० १५ श०), जातकपद्धतिः-केशवदैवज्ञः (वै० १६ श०), जातकाभरणम्-ढुण्ढिराजः (वै० १६ श०), जातकपद्धतिः-अनन्तभट्टः (वै० १७ श०), जातकमुक्तावली-शिवदासः (वै० १७ श०), होरा-स्कन्धनिरूपणं, वीरसिंहोदयः, जातकखण्डश्च-विश्वनाथः (वै० १७ श०), जातकसारदीपः, कालप्रकाशिका च—नृसिंहः (वै० १७ श०), जातका-लङ्कारः-गणेशदैवज्ञः (वै० १७ श०), पद्मजातकम्-दिवाकरः (वै०

---

१. अमीषां ग्रन्थानां नामानि ऑफ्रेख्टमहोदयसङ्कलितसूचीपत्रेषूपलभ्यन्ते ।

१७ श०), पद्धतिभूषणं, कल्पलता च-सोमदैवज्ञः (वै० १७ श०), होरारत्नम्-बलभद्रः (वै० १८ श०), होराकौस्तुभः-गोविन्दः (वै० १८ श०), होरासारसुधानिधिः, नरजातकव्याख्या च-नारायणभट्ट-गावकरः (वै० १८ श०), जातकपद्धत्युदाहरणम्-कृष्णदैवज्ञः (वै० १८ श०), प्रश्नमाणिक्यमाला-परमानन्दपाठकः (वै० १९ श०), पद्धति-चन्द्रिका-राघवखाण्डेकरः (वै० १९ श०), साधनसुबोधः-गोविन्दाचार्यः (वै० २० श०), अनन्तफलदर्पणः, आपाभटीयजातकञ्च-अनन्ताचार्यः (वै० २० श०)।

अन्ये केचन जातकग्रन्थाः —

मीनराजजातकम्-मीनराजः, यावनजातकम्-यवनाचार्यः, बेडा-जातकम्-नारचन्द्रसूरिः, जातकरत्नम्-जम्बुनाथः, जातकसारः-नृहरिः, जातकदीपकः-बालमुकुन्दः, जातककल्पलता, जातककलानिधिः, जातक-क्रोडम्, जातकचन्द्रिका, जातकतत्त्वम्, जातकपारिजातः, जातकजीवनम्, जातकरहस्यम्, जातकनिर्णयः, जातकोत्तमः, जातकसारवचनम्, जातक-सङ्ग्रहः, जातकलक्षणम्, जातकशिरोमणिः, स्त्रीजातकञ्च।

होराप्रदीपः-नारायणाचार्यः, होरासेतुः-रघुवीरः, होरामकरन्दः, शम्भुहोराप्रकाशश्च।

भावकुतूहलम्-जीवनाथझा, भावप्रकाशः-जीवनाथदैवज्ञः अहर्भाव-प्रकाशः-पद्मप्रभसूरिश्च।

लग्नचन्द्रिका, लग्नप्रदीपः, लग्नरत्नाकरः, लग्नवाराही, लग्नविवेकः, लग्नसारणीसमुच्चयश्च।

भविष्यफलभास्करः, आयुर्दायनिर्णयः, भाग्यरहस्यं, सिद्धफलित-केसरिः, कर्मविपाकसंहिता, आश्चर्यसंहिता, चमत्कारचिन्तामणिः-राज-श्रीभट्टः, कालविधानपद्धतिः-त्रिविक्रमः, कालचक्रम्-गार्ग्यः, आदित्यादि-बिन्दुफलम्, अष्टवर्गः, कुट्टाकारशिरोमणिश्च-वेङ्काद्रिः, भङ्गीविभङ्गी-करणम्, भारतीयकुण्डलीविज्ञानम्, रश्मिशास्त्रम्, रत्नोद्योतः, रत्न-परीक्षा, रत्नाभरणञ्च।

प्रमुखास्ताजिकग्रन्थाः —

दैवज्ञालङ्कृतिः-तेजसिंहः (वै० १४ श०), ताजिकतन्त्रसारः,

ताजिकमहार्णवश्च–समरसिंहः (वै० १४ श०), ताजिकपद्धतिः–केशवः (वै० १६ श०), ताजिकसारः–हरिभट्टः (वै० १६ श०), ताजकालङ्कारः–सूर्यः (वै० १६ श०), ताजिकभूषणपद्धतिः–गणेशः (वै० १७ श०), ताजिकनीलकण्ठी–नीलकण्ठः (वै० १७ श०), हायनरत्नम्–बलिभद्रः (वै० १८ श०), ताजिककौस्तुभः–बालकृष्णः (वै० १८ श०), ताजिकसुधानिधिः–नारायणभट्टगावकरः (वै० १८ श०), ताजिकदेशनिदानम् (पद्धतिकौस्तुभः)–गोविन्दः (वै० १८ श०), ताजिकसारः–भूगोलवेङ्कटेशः, वामनताजिकम्–वामनः, वैनाकीयद्वादशाध्यायी–विनायकशास्त्रिखानापुरकरः (वै० २० श०), ताजिकतिलकम्, हायनबोधः, वर्षप्रबोधश्चेत्यादयः। केशवप्रणीतताजिकपद्धतिग्रन्थस्य मल्लारि-विश्वनाथादिकृताः टीकाः सन्ति। ताजिकनीलकण्ठीग्रन्थस्य गोविन्दकृता सरला-टीका, माधवकृता टीका, विश्वनाथकृता टीका चोपलभ्यन्ते।

प्रमुखाः नाडीग्रन्थाः —

ध्रुवनाडीग्रन्थः–सत्याचार्यः, चन्द्रकलानाडीग्रन्थः–अच्युतः, कुमारनाडीग्रन्थः, गणेशनाडीग्रन्थः, सुब्रह्मण्यनाडीग्रन्थः, भृगुनाडीग्रन्थः, अगस्त्यकाक्यारनाडीग्रन्थ इत्यादयः।

केरलमतविषयकाः ग्रन्थाः —

केरलीयज्ञानम्, केरलतत्त्वसङ्ग्रहः, केरलतत्त्वप्रश्नसङ्ग्रहः, केरलप्रश्नसङ्ग्रहः, देवकेरलम्, केरलीयप्रश्नरत्नम्, केरलज्ञानप्रश्नचूडामणिश्च।

प्रश्नविषयकाः ग्रन्थाः —

प्रश्नज्ञानम्–भटोत्पलः (वै० ११ श०), प्रश्नतन्त्रम् समरसिंहः (वै० १४ श०), प्रश्नरत्नं, प्रश्नसारसमुद्रश्च–जम्बुनाथः, वैष्णवप्रश्नशास्त्रम्–नारायणदाससिद्धः, प्रश्नसुन्दरी, उदयदीपिका च–मेघविजयगणिः (वै० १८ श०), गणकप्रिया–नारायणभट्टगावकरः (वै० १८ श०) च।

प्रश्ननारदी, प्रश्नभूषणं, प्रश्नकौमुदी, प्रश्नचण्डेश्वरः, प्रश्नज्ञानप्रदीपः, प्रश्नदीपिका, प्रश्नमार्गः, प्रश्नवैष्णवः, प्रश्नविषयः प्रश्नशास्त्रं, प्रश्नशिरोमणिः, प्रश्नाङ्कचूडामणिः, रामसुग्रीवप्रश्नः, चौर्यप्रश्नं, गर्भभारवाह्यं इत्येवमादयः।

पाशक (रमल) विद्यायाः ग्रन्थाः —

पाशकावली-गर्गाचार्यः, पाशकग्रन्थः-भटोत्पलः, पाशकग्रन्थः-श्रीपतिः, पाशकग्रन्थः-भोजराजश्चेत्यादयः ।

रमलमहोदधिः-यवनाचार्यः, रमलप्रकाशः-रामः, रमलचिन्तामणिः-चिन्तामणिः, रमलामृतम्-जयरामः, रमलनवरत्नम्, रमलरहस्यम्, रमल-सिक्ता, रमलशास्त्रञ्च ।

स्वरशास्त्रीयाः ग्रन्थाः —

स्वरशास्त्रं, शिवस्वरोदयः, स्वरार्णवः, स्वरसिंहः, स्वरभैरवः, पवन-विजयस्वरोदयः, पञ्चस्वराः, स्वरशास्त्रसारः, चन्द्रोन्मीलनं, जयपद्धतिः, जयार्णवः, समरसारः-रामवाजपेयी, स्वरतत्त्वचमत्कारः-जीवनाथः, स्वरसागरः-नारायणभट्टगावकरश्चेत्यादयः ।

सामुद्रिकशास्त्रीयाः ग्रन्थाः —

स्कान्दशारीरम्-स्कन्दः, अङ्गविद्याशास्त्रम्-नारदः, सामुद्रिकशास्त्रम्-पूर्वाचार्यः, सामुद्रिकतिलकम्-दुर्लभराजः, भोजसामुद्रिकम् (अङ्गलक्षण-शास्त्रं)-भोजराजः, हस्तकाण्डम्-पार्श्वचन्द्रजैनः, हस्तसञ्जीवनम्-मेघ-विजयगणिः, सामुद्रिकरहस्यम्-अज्ञातः, सामुद्रिकसोपानम्-अज्ञातः, शरीर-सर्वाङ्गलक्षणम् - अज्ञातः, सामुद्रिकचिन्तामणिः - नारायणभट्टगावकरः, हस्तरेखाविज्ञानम् - गोपेशकुमारओझा, सामुद्रिककुञ्जिका - कालिका-प्रसादश्चेत्यादयः ।

ज्योतिषशास्त्रीयग्रन्थानां प्रमुखा व्याख्यातारः —

बलभद्रः (वै० १० श०) टीकाः -खण्डखाद्यटीका, बृहज्जातकटीका, ब्राह्मस्फुटसिद्धान्तव्याख्या (बेरूनिमतानुसारिणी) च ।

पृथूदकस्वामिचतुर्वेदः (वै० १० श०) टीकाः -ब्राह्मसिद्धान्तटीका, खण्डखाद्यटीका च ।

भटोत्पलः (वै० ११ श०) टीकाः -बृहत्संहिताटीका, बृहज्जातक-टीका, लघुजातकटीका, यात्राविचारटीका, खण्डखाद्यटीका, षट्पञ्चाशिका-टीका च ।

वरुणः (वै० ११ श०) टीका - खण्डखाद्यकरणव्याख्या ।

गणेशदैवज्ञः (वै० १६ श०) टीकाः –सिद्धान्तशिरोमणिटीका, लीलावतीटीका, विवाहवृन्दावनटीका, मुहूर्ततत्त्वटीका च।

सूर्यदैवज्ञः (वै० १६ श०) टीकाः –लीलावतीटीका, बीजटीका, श्रीपतिपद्धतिगणितव्याख्या, सिद्धान्तशिरोमणिटीका च।

कृपारामः (वै० १७ श०) टीकाः –सर्वार्थचिन्तामणिटीका, पञ्चपक्षीटीका, मुहूर्ततत्त्वटीका, बीजगणितटीका, मकरन्दटीका, यन्त्रचिन्तामणिटीका च।

विश्वनाथः (वै० १७ श०) टीकाः –गहनार्थप्रकाशिका सूर्यसिद्धान्तस्य टीका, सिद्धान्तशिरोमणिटीका, करणकुतूहलटीका, मकरन्दटीका, ग्रहलाघवटीका, पातसारणीटीका, अनन्तसुधारसटीका, रामविनोदकरणटीका, विष्णुकरणटीका, केशवीयजातकपद्धतिटीका, समातन्त्रप्रकाशिकाटीका, ताजिकनीलकण्ठीटीका च। ऑफ्रेख्टस्य सूचीपत्रानुसारेण एतत्प्रणीताः सोमसिद्धान्तटीका, तिथिचिन्तामणिटीका, चन्द्रमानतन्त्रटीका, बृहज्जातकटीका, श्रीपतिपद्धतिटीका, वसिष्ठसंहिताटीका, बृहत्संहिताटीका च परिज्ञायन्ते।

अन्ये च ज्योतिषग्रन्थटीकाकृतः —

महादेवः (वै० १४ श०), रामकृष्णः (वै० १४ श०), परमेश्वरः (वै० १५ श०), नारायणः (वै० १५ श०), नार्मदः (वै० १५ श०), अनिरुद्धः (वै० १६ श०), लक्ष्मीदासः (वै० १६ श०), माधवः (वै० १६ श०), गोपीनाथः (वै० १६ श०), चिन्तामणिः (वै० १६ श०), गङ्गाधरः (वै० १७ श०), विष्णुः (वै० १७ श०), धनेश्वरदैवज्ञः (वै० १७ श०), महीदासः (वै० १७ श०), मुनीश्वरः (वै० १७ श०), कृष्णदैवज्ञः (वै० १७ श०), नृसिंहः (वै० १७ श०), रङ्गनाथः (वै० १७ श०), शङ्करः (वै० १७ श०), धनराजः (वै० १७ श०), मल्लारिदैवज्ञः (वै० १७ श०), अनन्तदैवज्ञः (वै० १७ श०), गोविन्दः (वै० १७ श०), माधवः (अपरः) (वै० १८ श०), नारायणभट्टगावकरः (वै० १८ श०), यज्ञेश्वरशास्त्रिरोडे (वै० १९ श०), जीवनाथः (वै० २० श०), सुधाकरद्विवेदः (वै० २० श०) इत्येवमादयः।

४. निरुक्तम्

कश्यपप्रजापतिप्रणीतस्य वैदिकशब्दकोशस्य निघण्टोर्व्याख्यानं निरुक्तमस्ति। वैदिकशब्दानां वास्तविकाऽशयावबोधनार्थं भृशं समावश्यकं यथार्थवाच्यार्थज्ञानं निरुक्तव्याख्यातेन निघण्टुना भवतीत्यत अस्य वेदाङ्गेषु नितरां समुपादेयत्वं प्रतिभाति।

पूर्वं यास्कीयनिरुक्ते, तद्भाष्येषु चोल्लिखितानि निरुक्तानि चतुर्दशसंख्याकानि तावदासनिति श्रूयते। तानि चेमानि—

१. औपमन्यवनिरुक्तं, २. औदुम्बरायणनिरुक्तं, ३. वार्ष्यायणिनिरुक्तं, ४. गार्ग्यनिरुक्तं, ५. आग्रायणनिरुक्तं, ६. शाकपूणिनिरुक्तं, ७. और्णवाभनिरुक्तं ८. तैटीकिनिरुक्तं, ९. गालवनिरुक्तं, १०. स्थौलाष्ठीविनिरुक्तं, ११ क्रौष्टुकिनिरुक्तं, १२. कात्थक्यनिरुक्तं, १३. यास्कनिरुक्तं, १४. कौत्सव्यनिरुक्तं च।

सम्प्रति यास्कीयनिरुक्तातिरिक्तानि पूर्वोक्तानि निरुक्तानि,[1] सम्भवतः लोपङ्गतानि नोपलभ्यन्ते। यास्कप्रणीतस्य निरुक्तस्य[2] यथार्थतया वेदार्थज्ञापकत्वेन भृशं महत्त्वं वरीवर्ति।

निघण्टुकोशे नैघण्टुक-नैगम-दैवतेति त्रीणि काण्डान्युपलभ्यन्ते। नैघण्टुके काण्डे पृथिव्यप्तेजोवाय्वादीनां, स्वर्णादीनां, वेगगमनादीनाञ्च

---

१. पण्डितधनराजशास्त्रिणां मतानुसारेण गणेशनिरुक्तं ३६००० सूत्रात्मकं, निरुक्तसूत्रं ५२००० सूत्रात्मकं, अर्थार्णवः ६२००० सूत्रैः संवलितः, शब्दप्रभा १३२००० सूत्रात्मिका चेति विविधा निरुक्तग्रन्था आसन्। सम्प्रति ते ग्रन्था लोपङ्गताः प्रतिभान्ति। सन्दर्भेस्मिन् वररुचिप्रणीतः निरुक्तसमुच्चयग्रन्थोऽपि परिश्रूयते।

निघण्टु-निरुक्तविषयमधिकृत्य पाश्चात्यविपश्चिद्भिः, एल्० रेणु-पी० टाक्सन-पी० पोचाप्रभृतिभिः विवेचनं कृतमभ्युपगम्यते।

२. निरुक्तस्य प्रणयनसमयः, यास्कसमयश्च विक्रमपूर्वीयपञ्चशतवर्षेभ्यः पूर्वमासीदितीतिहासज्ञाः समाख्यापयन्ति।

वाचकशब्दानां तत्पर्यायवाचकशब्दानाञ्च सङ्कलनमस्ति। नैगमे काण्डे सन्दिग्धार्थवाचकानां, कठिनदुरूहाणाञ्च शब्दानां संग्रहस्तावदुपलभ्यते। दैवते काण्डे पार्थिव-आन्तरिक्षीय-स्वर्गीयदेवतावाचकानां शब्दानां सङ्कलनं गर्भीकृतं विद्यते।

निरुक्तव्याख्याने वेदाध्ययनविधिः, छन्दसां विभागः, छन्दसां विनियोगः, उपलक्षितकर्मानुकूलो भूतकालः, उपदर्शितलक्षणादिकञ्च वैस्तर्येण विवृतं वरीवर्ति।

निघण्टोः क्षीरस्वामिना (वै० १२-१३ श०) प्रणीतं भाष्यं, देवराजयज्वना (वै० १४ श०) विरचितं भाष्यञ्च समुपलभ्येते।

निरुक्तस्य बर्बरस्वामि (वै० ५ श०) प्रणीतं भाष्यं, दुर्गाचार्य (वै० ६ श०) कृतं भाष्यं, स्कन्दमहेश्वर (वै० ७ श०) विरचितं भाष्यं, श्रीनिवास (वै० १३ श०) प्रणीतं भाष्यञ्च समुपलभ्यन्ते।

प्रस्तुतेऽस्मिन् सन्दर्भे शक्तिग्राहकत्वेन कोशस्य तावदनितरसाधारणं वैशिष्ट्यं समधिकृत्य किञ्चित् प्रस्तोतुं युक्तं प्रतिभाति।

शब्दसङ्केतपर्यायाऽदीनाञ्च प्रतिपादकाः।
कोशाः कोषा इवाऽभान्ति शब्दरत्नैः प्रपूरिताः॥

इति ग्रन्थकृदभिमतानुसारेण राष्ट्रस्य सर्वाङ्गीणसमृद्धेर्निदानरूपो यथाह्यर्थाकोषस्तथा बुद्धिप्रकर्षस्य, संस्कृतिविकासस्य च परिचायकः परिमापकश्च शब्दरत्नैः सुसमृद्धः कोशः प्रतिभाति। भाषाया अव्यवहृता विस्मृताश्च शब्दाः शब्दकोशद्वारेणैव सुलभतया विज्ञाता भवन्ति। इत्थं शब्दराशिसमुच्चायकानां कोशानां शब्दकोषरूपेण महनीयत्वं प्रतिपदं प्रतिपद्यते।

बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम।

(व्याकरणमहाभाष्यं, पस्पशाह्निकम्)

इति पतञ्जलिसमाख्यातदिशा संस्कृतायाः सुरभारतेः शब्दरत्नराशिः प्रतनसमये विशालतम आसीदित्यभ्युपगम्यते। अतस्तावदेतर्हि समुपलब्धेषु प्राचीनार्वाचीनेषु शब्दकोशेषु समस्तछान्दसलौकिकशब्दानां

सङ्कलनं सम्भवितुं शक्यमिति न निश्चिनुमः। तथाऽप्येतेषु वैदिक-शास्त्रीय-लौकिकसंस्कृतशब्दानां बृहत्संख्याकानां समुच्चयोहि सम्प्रत्यपि सकलासु भारतीयभाषासु संस्कृतभाषायाः समृद्धतमत्वं, अभिधा-लक्षणा-व्यञ्जनावृत्तिभिः समाविष्कृतभावप्रवणत्वञ्च परिद्योतयति।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

इति पद्यपरिगणितेषु समेषु शक्तिग्राहकेषु कोशास्तावत् प्रधानं पदं सञ्जुषन्ते। यतोहि यौगिकशब्दानां व्युत्पत्तिप्रदर्शनविधया व्याकरणं सङ्केतं (शक्ति) विज्ञापयति। किन्तु कोशास्तु रूढ-योगरूढ-सिद्धा-सिद्धरूढयौगिक-लक्षक-पारिभाषिक-विशेष्यनिघ्न-संकीर्ण-नानार्थादिविविध-शब्दानां सङ्केतं (शक्ति) परिज्ञापयितुं प्रभवन्ति। इत्थं संस्कृतशब्दकोशाः समस्तसंस्कृतशब्दानां शक्तिग्राहकत्वेन नितरां प्रामाण्यं (Cementic Importance) समावहन्ति।

संस्कृतशब्दानां नामलिङ्गादिनिदर्शनं, विग्रह-व्युत्पत्त्यादि (Etymology) प्रदर्शनं, समानार्थकपर्यायवाचिशब्दानां (Homonymons and Synonymons) सन्निरूपणं, शब्दार्थसम्बद्धानां वैदिक-दार्शनिक-शास्त्रीय-तान्त्रिक-आगमीय-धार्मिक-सांस्कृतिक - भौगोलिक - ऐतिहासिक-आर्थिक-राजनीतिक-सामाजिकादिविविधसन्दर्भाणां च समाख्यानं नैक-विधानां संस्कृतशब्दकोशानां (Lexicons, Glassaries, Dictionaries, Concordances, Indexes, Orthographical and Epigraphical lexicons etc.) वरेण्यमुद्देश्यमस्तीत्यभ्युपगच्छामः। शब्दपरिशुद्धिसाधुत्वाद्यन्वाख्यानेषु व्याकरणस्य यथा वा परं प्रामाण्यं वरीवर्ति, तथा समस्तशब्दानां सङ्केतार्थपर्यायादिपरिनिरूपणेषु कोशानां नान्तरीकतया भृशं समुपजीव्यत्वं वर्तत इत्यत्र न काऽपि संशीतिः प्रतिभाति।

यद्यपि गैर्वाण्या वाण्यास्तावदसंख्याताः शब्दाः कालकवलीकृताः सन्तः लोपङ्गता अभूवनिति समनुमीयते, तथाऽपि यास्क-भागुरि-आपि-शलि-शाकटायन-कात्यायन-व्याडि-पाणिनि - वाचस्पति-अमरसिंह - शाश्वत-पुरुषोत्तमदेव - वररुचि - धनञ्जय-हलायुध-हेमचन्द्र-मेदिनीकर-केशव-विश्व-

नाथ-राधाकान्तदेव - तारानाथतर्कवाचस्पति - विश्वबन्धुशास्त्रिप्रभृतिभिः समये-समये वैदिकलौकिकसंस्कृतशब्दकोशप्रणयनैः संस्कृतशब्दानां, ज्ञाताज्ञातानां, लुप्तालुप्तानां वा समुज्जीवनं महता प्रयत्नेन संव्यधायि ।

विशेषतया प्राक्तनाः संस्कृतशब्दकोशाः वदनोद्गतकरणार्थं सुलभाः पद्येषु प्रणिबद्धाः समुपलभ्यन्ते । अर्वाक्तनाः कोशाः तत्प्रतीपतयोपनिबद्धाः सन्दृश्यन्ते । एकार्थ-नानार्थ-एकाक्षर-द्व्यक्षर-द्विरूप - त्रिरूप - नाम - लिङ्ग-विग्रह - व्युत्पत्त्यादिप्रतिपादक - अकारानुक्रम - पदानुक्रम - विषयानुक्रमादि-भेदेनेदानीं संस्कृतशब्दकोशा अनेकविधा वरीवृतति ।

प्रमुखाः संस्कृतकोशाः —

प्रतनाः कोशाः —

वैदिकनिघण्टुः-कश्यपप्रजापतिः (वि० पू० ३५०० व० पू०), त्रिकाण्ड-कोशः[1]-भागुरिः (वि० पू० ३१०० व० पू०), शब्दकोशः[2]-आपिशलिः (वि० पू० ३००० व० पू०), शब्दकोशः[3]-शाकटायनः (वि० पू० ३००० व० पू०) शब्दकोशः-व्याडिः (वि० पू० २८०० व० पू०), द्विरूपकोशः-पाणिनिः (वि० पू० २८०० व० पू०), नाममालाकोशः-कात्यायनः (वि० पू० २५०० व० पू०), विश्वप्रकाशः-शब्दार्णवः-वाचस्पतिः (वि० पूर्वकालिकः), संसारावर्तः-विक्रमादित्यः (वै० १ शतकम्), उत्पलिनी-कोशः-व्याडिरपरः (वै० १ श०), त्रिकाण्ड-अमरकोशः[4], एकाक्षर-नाममाला च-अमरसिंहः (वै० ६ श०), अनेकार्थसमुच्चयः-शाश्वतकोशः-शाश्वतः (वै० ६ श०), त्रिकाण्डशेषः (अमरकोशपरिशिष्टं), हारावली-कोशः, वर्णदेशना, एकाक्षरकोशः, द्विरूपकोशः, जकारभेदः, सकारभेदः, द्व्यर्थकोशः, ऊष्मविवेकः, शब्दभेदप्रकाशश्च-पुरुषोत्तमदेवः (वै० ७ श०), एकाक्षरकोशः, एकाक्षरनाममाला, एकाक्षरनिघण्टुः, एकाक्षराभिधानं, ऐन्द्रनिघण्टुः, लिङ्गविशेषविधिः, लिङ्गवृत्तिः, लिङ्गानुशासनञ्च-वररुचि-

---

१. सायणाचार्यकृतधातुवृत्तावुल्लेखः ।

२. भानुजिदीक्षितस्यामरकोशटीकायामुल्लेखः ।

३. केशवस्वामिप्रणीतनानार्थार्णवसंक्षेपकोश उल्लेखः ।

४. अग्निपुराणान्तर्गतः शब्दकोशः, अमरकोशसदृश अमरकोशस्य मूलस्रोतः प्रतिभाति ।

रपरः (वै० ७ श०), नानार्थसङ्ग्रहः*–अजयपालः (वै० ८ श०), शब्दकोशः*–तारपालः (वै० ८ श०), दुर्गकोशः*–दुर्गसिंहः (वै० ८ श०), अनेकार्थनाममाला, नाममालाकोशः, अनेकार्थनिघण्टुः–धनञ्जयः (वै० ९ श०), अनेकार्थसारकोशः*–धरणिदासः (वै० ९ श०), शब्दकोशः*–धर्मः (वै० ९ श०), शब्दकोशः*–मुनिः (वै० ९ श०), रन्तिकोशः*–रन्तिदेवः (वै० १० श०), रभसकोशः*–रभसपालः (वै० १० श०), रुद्रकोशः*-रुद्रः (वै० १० श०), विश्वकोशः*–विश्वरूपः (वै० १० श०), शब्दकोश*-वोपालितः (वै० १० श०), शब्दकोशः*-शुभाङ्गः (वै० १० श०), अभिधानरत्नमाला–हलायुधः (वै० १० श०) इत्यादयः।

प्रतनाप्रतनाः कोशाः —

वैजयन्तीकोशः–यादवप्रकाशः (वै० ११ श०), नाममालाकोशः-भोजराजः (वै०११ श०), लोकप्रकाशकोशः–क्षेमेन्द्रः (वै०११-१२ श०), विश्वप्रकाशकोशः, शब्दभेदप्रकाशकोशश्च–महेश्वरः (वै० १२ श०), त्रिरूपकोशः–कचणबिल्हणकविः (वै० १२ श०), अनेकार्थकोशः–मङ्खकः (वै० १२ श०), नानार्थशब्दरत्नकोशः–कालिदासः (अपरः) (वै० १२-१३ श०), अभिधानचिन्तामणिः, अनेकार्थसङ्ग्रहकोशः, शेषसङ्ग्रहनाममाला, निघण्टुशेषः (वनस्पतिनिघण्टुः), देशीनाममाला (प्राकृतकोशः) च–हेमचन्द्रजैनः (वै० १२-१३ श०), नामावली गोवर्धनकोशः–गोवर्धनः (वै० १२-१३ श०), नानार्थार्णवसंक्षेपकोशः–केशवस्वामी (वै० १३ श०), नानार्थशब्दकोशः (मेदिनीकोशः)–मेदिनीकरः (वै० १३ श०), नानार्थरत्नमाला–अभयपालः (वै० १३ श०), शब्दरत्नदीपकोशः–कल्याणमल्लः (वै० १३ श०), द्विरूपकोशः श्लेषार्थपदसङ्ग्रहः, अमरखण्डनञ्च–श्रीहर्षः (वै० १३ श०), आख्यातचन्द्रिकानिघण्टुः, मल्लकोशः, क्रियानिघण्टुश्च–भट्टमल्लः (वै० १३ श०), अपवर्गनाममालाकोशः-पञ्चवर्गपरिहारनाममाला–जिनभद्रसूरिः (वै० १३ श०), एकाक्षरनूतननाममाला (एकाक्षरनाममालिका)–विश्वम्भरमुनिः (वै० १३ श०), एकाक्षरनाममाला-सुधाकलशः (वै० १४ श०), माध-

---

* एतच्चिह्नाङ्कितानां कोशानामुद्धरणं सर्वानन्द-क्षीरस्वामि-मेदिनीकर-हेमचन्द्र-मल्लिनाथ-महेश्वर-हलायुधप्रभृतिपरवर्तिकोशप्रणेतृभिः, व्याख्यातृभिश्च स्वीयेषु कोशेषु, व्याख्यासु चोपस्थापितं समुपलभ्यते। एषां कोशकृतां समयोहि सम्भावनयाऽत्र निरूपितोऽस्ति।

वीयनामनिघण्टुः, एकाक्षररत्नमाला, एकाक्षरीकोशः, माधवकोशश्च-माधवः (वै० १४ श०), हृदयदीपकनिघण्टुः, धातुकोशश्च-बोपदेवः (वै० १४ श०), अगस्त्यनिघण्टुः-अगस्त्यः (वै० १४ श०), शब्दरत्नाकरकोशः, अनेकार्थतिलकञ्च-महीपः (वै० १५ श०), भूरिप्रयोगकोशः-पद्मनाभदत्तः (वै० १५ श०), शब्दरत्नाकरः-वामनभट्टबाणः (वै० १५ श०), शब्दमालाकोशः-रामेश्वरशर्मा (वै० १५ श०), विश्वलोचनकोशः (मुक्तावली)-श्रीधरसेनः (वै० १५ श०), नानार्थरत्नमालाकोशः, एकाक्षरनिघण्टुश्च-इरुपगदण्डाधिनाथः (भास्करः) (वै० १५ श०), अभिधानतन्त्रकोशः-जटाधरः (वै० १५ श०), वर्णप्रकाशः-कविकर्णपूरः (वै० १६ श०), उणादिनाममाला शुभशीलगणिः (वै० १६ श०), सुन्दरप्रकाशशब्दार्णवः-पद्मसुन्दरः (वै० १६ श०), शब्दभेदप्रकाशः, क्रियानिघण्टुः, अक्षरान्तनिघण्टुः, प्रत्ययमाला च-भट्टोजिदीक्षितः (वै० १६ श०), अनेकार्थकोशः, ऊष्मविवेकः, गदविनोदनिघण्टुः, नानार्थध्वनिमञ्जरी च—गदसिंहः (वै० १६ श०), रूपमञ्जरीनाममाला-रूपचन्द्रः (वै० १७ श०), शीघ्रबोधनाममाला-पुण्डरीकविठ्ठलः (वै० १७ श०), नानार्थमञ्जरीकोशः-राघवाचार्यः (वै० १७ श०), शारदीयाख्यानाममाला-हर्षकीर्तिः (वै० १७ श०), नाममातृकानिघण्टुः-वरदराजः (वै० १७ श०), नामसङ्ग्रहमाला-अप्पयदीक्षितः (वै० १७ श०), नामकोशः-सहजकीर्तिः (वै० १७ श०), पञ्चतत्त्वप्रकाशः-वेणीदत्तः (वै० १७ श०), कल्पद्रुकोशः-केशवः (वै० १७ श०), शब्दरत्नावली-मथुरेशविद्यालङ्कारः (वै० १८ श०), एकवर्णार्थसङ्ग्रहः, द्विरूपध्वनिसङ्ग्रहश्च-भरतसेनः (वै०१८ श०), कोशकल्पतरुः-विश्वनाथः (वै० १८ श०), लक्ष्मीनिवासाभिधानकोशः-शिवरामः (वै० १८ श०) इत्येवमादयः ।

नूतनाः प्रमुखाः कोशाः —

शब्दकल्पद्रुमकोशः-राधाकान्तदेवः, वाचस्पत्यम्-तारानाथतर्कवाचस्पति , शब्दार्थचिन्तामणिः-सुखानन्दनाथः, अभिधानप्रदीपिका-ज्ञानचन्द्रस्वामी च ।

अमरकोशस्य प्रमुखाः टीकाः —

अमरकोशोद्घाटनम्-भट्टक्षीरस्वामी (वै० १२ श०), टीकासर्वस्वम्-सर्वानन्दवन्द्यघाटीयः (वै० १२ श०), कामधेनुव्याख्या[1]-सुभूति-

१. सम्प्रतीयं तिबेटनभाषायां सतीशचन्द्रविद्याभूषणेनानूदितोपलभ्यते ।

चन्द्रः (वै० १२ श०), पदचन्द्रिका-बृहस्पतिः (रायमुकुटमणिः) (वै० १५ श०), सुधा-रामाश्रमीव्याख्या-भानुजिदीक्षितः (वै० १७ श०), अमरकोश पञ्जिका (पदार्थकौमुदी)-नारायणशर्मा (वै० १७ श०), त्रिकाण्डविवेकः-रामनाथ विद्यावाचस्पतिः (वै० १७ श०), मुग्धबोधिनी-भरतमल्लिकः (वै० १८ श०), सारसुन्दरीव्याख्या-मथुरेशविद्यालङ्कारः (वै० १८ श०) इत्याद्याः ।

अतिरिक्ताश्च व्याख्याः[1] —

अमरपदमुकुरव्याख्या-रङ्गाचार्यः, अमरटीकाः-अप्पयदीक्षितः, अमरकोशमाला-परमानन्दः, अमरकोशपञ्जिका-बृहस्पतिः, अमरव्याख्या-मान्यभट्टः, अमरपदपारिजातव्याख्या-मल्लिनाथः, अमरकोशविवेकव्याख्या-महेश्वरः, अमरकोशव्याख्या-राघवेन्द्रः, काशिका-काशिनाथः, क्रियाकलापव्याख्या-आशाधरः, कौमुदीव्याख्या-नयनानन्दरामचन्द्रौ, गुरुबालप्रबोधिनीटीका-भानुदीक्षितः, टीका-लिङ्भट्टः, टीका-रामशर्मा, टीका-लिङ्गमसूरिः, त्रिकाण्डचिन्तामणिः-रघुनाथचक्रवर्ती, पदमञ्जरी-लोकनाथः, प्रदीपव्याख्या-अच्युतोपाध्यायः, प्रदीपमञ्जरी-रामेश्वरः, बालबोधिनीव्याख्या-गोस्वामी, विद्वन्मनोहरा-महादेवतीर्थः, व्याख्यामृतम्-शंकराचार्यः, व्याख्या-मुकुन्दशर्मा, व्याख्या-रामस्वामी, व्याख्या-लक्ष्मणशास्त्री, वैषम्यकौमुदी-रामप्रसादः, शब्दार्थसन्दीपिका-नारायणविद्याविनोदः, श्रीधरीव्याख्या-श्रीधरः, सुबोधिनीव्याख्या-नीलकण्ठश्चेत्याद्याः ।

अभिधानचिन्तामणेः कतिपया व्याख्याः —

स्वोपज्ञ व्याख्या-हेमचन्द्रः (वै० १२-१३ श०), पञ्चवर्गनामसंग्रहः-शुभशीलगणिः (वै० १६ श०), नामसारोद्धारः-वल्लभगणिः (वै० १७ श०), व्युत्पत्तिरत्नाकरटीका-देवसागरगणिः (वै० १७ श०), विवित्तनामसंग्रहः-भानुचन्द्रगणिः (वै० १७ श०), व्याख्या-महेन्द्रसूरिः, व्याख्या-वादि श्रीवल्लभः, अभिधानचिन्तामणिशिलोञ्छः-जिनदेवमुनीश्वरश्चेत्याद्याः ।

---

१. चत्वारिंशदधिकसंख्याकानां चामरकोशस्य व्याख्यानामुल्लेखोहि कोलब्रुक् महोदयेन अमरकोशसंस्करणस्य स्वीये सम्पादकीये संविहितोऽस्ति ।

अन्ये संस्कृत शब्दकोशाः[1]

अनादिकोशः–महादेववेदान्ती, अनेकार्थध्वनिमञ्जरी–महाक्षपणकः, अभिधानप्रदीपिका-ज्ञानचन्द्रस्वामी, अभिधानसमुच्चयः–चिन्तामणिः, अव्ययकोशः–महादेवः, अव्ययसंग्रहनिघण्टुः–शाकल्यभल्लुमल्लः, अव्ययार्णवः–जयभट्टारकः, उक्तिरत्नाकरः–साधुसुन्दरगणिः, उणादिकोशः–रामशर्मा, एकाक्षरकोशः–महाक्षपणकः, एकाक्षरकोशः-महीधरः, एकाक्षरनाममाला–अमरकान्तः, एकाक्षरनाममाला–हिरण्यनाभः, एकाक्षरनिघण्टुः–शान्तवीरदेशिकेन्द्रः, एकाक्षरनिघण्टुः–सदाचार्यः, एकार्थनाममाला–सौभरिः (सौरभी), कविजनशेवधिकोशः–आदिनाथकविः, कविजीवनकोशः-धर्मराजः, कविदर्पणनिघण्टुः–रामचन्द्रः, कविदीपकनिघण्टुः–विक्रमादित्यराजः, कोमलकोशसंग्रहः–तीर्थस्वामी, कोशसंग्रहः–राधाकृष्णः, कोशावंतसः–राघवकविः, गणरत्नमहोदधिः–वर्धमानः, चामुण्डालघुनिघण्टुः–कृष्णराजसार्वभौमः, तद्धितकोशः–भवदेवः, तद्धितकोशः–शिरोमणिः, तन्त्रकोशः–नित्यनाथः, दशदीपनिघण्टुः–वेदान्ताचार्यः, देश्यनिघण्टुः–रामचन्द्रः, द्विरूपकोशः–भरतः, द्व्यक्षरनाममाला–सौभरिः (सौरभी) धातुरत्नाकरः–साधुसुन्दरगणिः, नानार्थपदपेटिका–सुजनः, नाममालाकोशः–अमरदत्तः, नाममाला–दण्डिकविः, नाममाला–साधुः, नामनिधानम्–सर्वज्ञनारायणः, नामसंग्रहनिघण्टुः–भार्गवाचार्यः, निघण्टुसारः–अशोकमल्लः, पदमञ्जरीकोशः–कविवल्लभः, पदमञ्जरी–भल्लटः, पर्यायरत्नमाला–महेश्वरमिश्रः, पर्यायार्णवः-नीलकण्ठमिश्रः, पर्यायपदमञ्जरी-विद्याऽहंवीरमिश्रः, पर्यायशब्दरत्नमाला-धनञ्जयभट्टाचार्यः

---

१. एषु बहुविधानां कोश ग्रन्थानां नामानि अड्यार-मदरास-तन्जावूर-त्रिवेन्द्रम्-मैसूर- पुणें-मुंबई- जयसलमेर-बीकानेर- वटोदरा-होशियारपुर- जम्मू-वाराणसी-कलिकाताऽदिनगरस्थ राजकीय हस्तलिखितपुस्तकालयानां तथा तदतिरिक्तानां पुस्तकालयानां तालपत्रोत्कीर्णित (Engraved) हस्तलिखित (Manuscripts) शिलामुद्रित (Lithographed) टङ्कमुद्रित (Printed) छायाचित्रित (Photostat) पुस्तकानां सूचीपत्रेषु, आक्सफोर्ड नगरस्थ बोड्लेनपुस्तकालयस्य, लन्दननगरीस्थ इंडिया ऑफिस् पुस्तकालयस्य च पुस्तक सूची पत्रेषु, थियोडोर ऑफ्रेख्ट महोदयस्य बृहत्तमसूचीपत्रे च (Catalogus Catalogorum c. c.) समुपलभ्यन्ते ।

बृहद्रत्नाकरः–वामनः, मणिमञ्जरीकोशः-नन्दकविः, मातृकानिघण्टुः–महीदासः मुक्तावली–रङ्गनाथः, राजव्यवहारकोशः–रघुनाथपण्डितः, लिंगभट्टीयकोशः-भानुदीक्षितः, लिंगानुशासनम्–वामनः, लिंगानुशासनम्–शबरस्वामी, वर्णदेशनादेवकीर्तिः, वर्णभैरवः-रामगोपालः, वर्णाभिधानम् (एकाक्षरकोशः)–नन्दभट्टः, वर्णाभिधानम्-यदुनन्दनभट्टः, विद्यारत्नाकरः–धनपतिसूरिः, विश्वकोशः-परमेश्वरभट्टः, विश्वनिघण्टुः–विश्वकविः, विश्वमेदिनीकोशः–सारस्वतमिश्रः, विशेषामृतम्–त्र्यम्बकमिश्रः, वैदिककोशः–भास्करररायः, वैभाषिककोशः-कृष्णकविः, शब्दचन्द्रिका–चक्रपाणिदत्तः, शब्दचिन्तामणिः-व्यासविठ्ठलाचार्यः, शब्दप्रभेदप्रकाशः–शिवदीनः, शब्दरत्नसमन्वयः (शब्दरत्नसमुच्चयः)–शाहजीमहाराजः, शब्दरत्नाकरः–वामनः, शब्दसन्दर्भसिन्धुः–काशीनाथभट्टाचार्यः, शब्दलिंगार्थचन्द्रिका-सुजनः, शब्दशब्दार्थमञ्जूषा–विद्याऽहंवीरमिश्रः, शब्दाब्धितरिः–रामगोविन्दः, श्रीशब्दरत्नाकरः–साधुसुन्दरगणिः, षडर्थनिर्णयकोशः–कविराक्षसः, सरस्वतीविलासः-सरिद्वल्लभमिश्रः, हेममेदिनीसारस्वतमिश्रश्चेत्यादयः ।

इतरे कतिपये कोशाः—

अकरादिशब्दमञ्जरी, अनेकार्थध्वनिमञ्जरी, अनेकार्थनाममाला, अनेकार्थशेषः, अभिधानमञ्जरी, अभिधानसंग्रहकोशः, अभिधानसंग्रहः, उत्पलमाला, एकाक्षरमाला, एकाक्षरमातृकोशः, एकाक्षराभिधानमाला, केशवमाला, कोशसारः, दशगणकारिका, दशबलकारिका, द्वादशकोशसंग्रह, धातुपर्यायमञ्जूषा, धात्वर्थमञ्जूषा, बृहदभिधानचिन्तामणिः, बृहदमरकोशः, भोजनाममालिका, मात्राकोशभारविका, रत्नप्रकाशः, वर्णदीपिका, वर्णभेदविधिः, वर्णविवेकः, वर्णविलासः, शब्दतरङ्गिणी, शब्दप्रभेदनाममाला, शब्दभेदनिर्देशः, शब्दमालाः, शब्दरत्नप्रदीपकोशः, शब्दस्तोममहानिधिः, संस्कृतशब्दार्थकौस्तुभः, हरिनाममाला च ।

केचिदितरे कोशाः—

अनादिकोशः, कविसञ्जीवनीकोशः, गङ्गाधरकोशः, चन्द्रकोशः, चन्द्रनन्दनकोशः, त्रिलिंगनिर्णयोदाहरणकोशः, त्रिविक्रमकोशः, दामोदरकोशः, देशीकोशः, द्वन्द्वादिकोशः, निगमाख्यकोशः, नीलकण्ठकोशः, पञ्चरूपकोशः, पदार्थसारकोशः, बलशर्मकोशः, बीजकोशः, भरतमालाकोशः,

मङ्खकोशः, मन्त्रकोशः, मन्त्रोद्धारकोशः, महेशकोशः, मातृकाकोशः, मातृकाबीजकोशः, मानमञ्जरीकोशः, मुग्धबोधकोशः, मुनिकोशः, रघुनन्दनकोशः, रत्नकोशः, रामाश्रमोद्धारकोशः, वस्तुकोशः, वर्णबीजकोशः, वस्तुविज्ञानरत्नकोशः, वाग्भटकोशः, वाचस्पतिकोशः, विक्रमादित्यकोशः, विश्वरूपकोशः, विश्वलोचनकोशः, वेदान्तरत्नकोशः, वैभाषिककोशः, शब्दरत्नकोशः, शर्मण्यकोशः, श्रीधरकोशः, सगुणवती वर्णबीजकोशः, संख्यारत्नकोशः, सज्जनकोशः, सञ्जीवनीकोशः, साध्यकोश, हरकोशश्च ।

कतिपये निघण्टवः—

अकारादिनिघण्टुः, अगस्त्यनिघण्टुः, अष्टाङ्गनिघण्टुः, उणादिनिघण्टुः, कल्पद्रुमनिघण्टुः, कान्तालीयनिघण्टुः, केलदेवनिघण्टुः, केशवनिघण्टुः, गणनिघण्टुः, गुणविज्ञाननिघण्टुः, गुणसंग्रहनिघण्टुः, जैमिनिनिघण्टुः, दक्षिणामूर्तिनिघण्टुः, द्रव्यगुणनिघण्टुः, द्रव्यरत्नाकरनिघण्टुः, दाल्भ्यनिघण्टुः, धन्वन्तरिनिघण्टुः, नागबुद्धिनिघण्टुः, नामनिघण्टुः, पथ्यापथ्यनिघण्टुः, बीजनिघण्टुः, भावप्रकाशनिघण्टुः, मदनविनोदनिघण्टुः, मदनरत्ननिघण्टुः, मननादिनिघण्टुः, महाराजनिघण्टुः, मातृकानिघण्टुः, योगाक्षरनिघण्टुः, रसशब्दनिघण्टुः, राजनिघण्टुः, राजकोशनिघण्टुः, राजवल्लभनिघण्टुः, वनस्पतिचन्द्रोदयनिघण्टुः, वाग्भटनिघण्टुः, वामननिघण्टुः, विश्वनिघण्टुः, वेदार्थनिघण्टुः, वैद्यकनिघण्टुः, वैद्यामृतनिघण्टुः शब्दरत्ननिघण्टुः, शब्दसारनिघण्टुः, शिवप्रकाशनिघण्टुः, शेषराजनिघण्टुः, षड्दर्शनसिघण्टुः, षण्मुखवृत्तिनिघण्टुः, सारसंग्रहनिघण्टुः, सिद्धमन्त्रनिघण्टुः, सिद्धमूलिकानिघण्टुः, हनुमन्निघण्टुः, हृदयदीपिकानिघण्टुश्च ।

वैदिकशब्दकोशा[1] :—

वेदार्थशब्दकोशः-चमूपतिः, वैदिककोशः-भास्करायः, वैदिकपदार्थपारिजातः, वैदिकपदानुक्रमकोशश्च-विश्वबन्धुशास्त्री (वै० २० श०)

---

१. वैदिकविषयान् समधिकृत्य पाश्चत्यविपश्चिद्भिः रौथ्-भोटलिंक-मोनियरविलियम्स-स्मिथ-ब्लूमफील्ड-विल्सन् - मेक्डानेल-बेनफे-गेलनर - पिशेल-हिलेब्रॉन्ट-ग्रासमन-फोर्शगन-नीसेर-कीथ-प्रभृतिभिः प्रणीताः वैदिक कोशाः (Glossaries, Lexicons, Dictionaries, Concordances, Index, Orthographical and Epigraphical Lexicons etc.) समुपलभ्यन्ते । हंसराज-सूर्यकान्त-मधुसूदनशर्मप्रणीताश्च वैदिक कोषा वर्तन्ते ।

ऐतरेयब्राह्मणारण्यककोशः, कौषीतकीब्राह्मणारण्यककोशश्च - केवलानन्दसरस्वती (वै० २० श), उपनिषद्वाक्यमहाकोशः-गयानन्द शम्भु साधले (वै० २० श), श्रौतकोशः-सम्पादकाः-बापट-दातार-नेनेकाशीकराः (वै० २० श०), धर्मकोशः-सम्पादकः लक्ष्मणशास्त्री (वै० २० श०), मीमांसाकोशः-नारायणशास्त्रिमराठे (वै० २० श०), न्यायकोशः-भीमाचार्यअलकीकरः (वै० २० श०), संस्कृतव्यारणकोशः-अभ्यंकरः (वै० २० श०) इत्यादयः ।

केचन प्रमुखाः संस्कृतासंस्कृतशब्द कोशाः—

संस्कृत-पारसीकपदप्रकाशः-कविकर्णपूरः, संस्कृत-इंग्लिश-शब्दकोशः-बेनफे (प्र० लन्दन० १८६६ ई०), संस्कृत-इंग्लिशशब्दकोशः-रामजसन् (प्र० लन्दन १८७० ई०), प्रेक्टिकल संस्कृत-इंग्लिशशब्दकोशः-आनन्दराम बरुआ (प्र० कलिकाता० १८७७ ई०), संस्कृत-इंग्लिश शब्दकोशः-कॅम्पलर (प्र० ट्रासबर्ग० १८९१ ई०), संस्कृत-इंग्लिशशब्दकोशः-मोनियरविलियम्स (प्र० आक्सफोर्ड १८९९ ई०), संस्कृत-हिन्दीशब्दकोशः - द्वारिकाप्रसाद चतुर्वेदः (प्र० लखनऊ १९१७ ई०), सरस्वतीकोशः-जीवरामोपाध्यायः (प्र० मुरादाबाद १९२३ ई०), प्रेक्टिकल संस्कृत-इंग्लिश शब्दकोशः-वामनशिवराम आप्टे (प्र० मुंबई १९२४ ई०), संस्कृत-हिन्दी शब्दकोशः-विश्वम्भरनाथशर्मा (प्र० मुरादाबाद १९२४ ई०), प्रेक्टिकल संस्कृत इंग्लिशशब्दकोशः-ए० ए० मॅक्डानेल (प्र० लन्दन १९२४ ई०) पद्मचन्द्रकोशः-गणेशदत्तशास्त्री (प्र० लाहौर, १९२५ ई०), संस्कृत-इंग्लिशशब्दकोशः-विद्याधर वामन भिडे (प्र० पुणें १९२६ ई०), रूपनिघण्टुः-रूपलाल वैश्यः (प्र० वाराणसी १९३४ ई०), बुद्धिस्ट हैब्रिड् संस्कृत व्याकरणकोशः-फ्रॅंकलिन् एगर्टन् (प्र० ऑक्सफोर्ड १९५३ ई०,) आधुनिक संस्कृत हिन्दीशब्दकोशः-ऋषीश्वरभट्टः (प्र० आगरा १९५५ ई०), संस्कृत शब्दार्थ कौस्तुभः-द्वारिकाप्रसाद-तारिणीशौ (प्र० प्रयाग १९५७ ई०), संस्कृतकोषसुधा-रामसुन्दरशर्मा, संस्कृत-हिन्दीशब्दकोशः-वामन शिवराम आपटे (प्र० दिल्ली १९६६ ई०), विग्रहकोश (संस्कृत-मराठी)-गोपालशास्त्रिघाटे (प्र० मुंबई १८६७ ई०), संस्कृत-इंग्लिश-मराठीशब्दकोशः-कान्ताकार्जुनः, संस्कृत-गुजरातीशब्दादर्शः-गिरिजाशंकरमेहता (प्र० अहमदाबाद १९३९ ई०), शब्दार्थकल्पतरुः (संस्कृत-तेलुगुशब्दकोशः)-मामिडि वेंकटाचार्यः, संस्कृत-कन्नडशब्दकोशः-सम्पादक-एम्० वी० पी०

शास्त्री, स्टॅन्डर्ड संस्कृत-पञ्जाबी शब्दकोशः-डॉ० तेजसिंहः, चौखम्बा-संस्कृत-हिन्दी बृहत् कोशः-रामकुमाररायश्चेत्यादयः।

केचन असंस्कृत-संस्कृत प्रतिशब्दकोशाः—

पारसीप्रकाशकोशः (पर्शियन-अरेबिक-संस्कृत)—वेदाङ्गरायः, बंगला-संस्कृत शब्दकोशः-ग्रेव्ज हॉगृन् (प्र० लन्दन १८३३ ई०), भोट-संस्कृताभिधानम् (तिबेटन-संस्कृत)—सम्पादकः-डॉ० लोकेशचन्द्रः, अभिधान राजेन्द्रकोशः (अर्धमागधी-प्राकृत-संस्कृत)-विजयराजेन्द्रसूरिः इंग्लिश-संस्कृत शब्दकोशः-मोनियर विलियम्स (प्र० वाराणसी चौखम्बा संस्कृत स्टडीज्), इंग्लिश-संस्कृत शब्दकोशः-वामन शिवराम आप्टे (प्र० मुंबई १९३६ ई०), आदर्शहिन्दी-संस्कृतशब्दकोशः-रामस्वरूप-शास्त्री (प्र० चौ० सं० स्टडीज् वाराणसी १९५७ ई०), श्रीकोशः (हिन्दी-संस्कृत) केदारनाथः, शब्दसागरः-जीवानन्द विद्यासागर इत्येवमादयः।

५. कल्प :

इह जगतीतले प्रेक्षावज्जनुष्मतामार्याणां स्वाभाविकी प्रवृत्तिर्द्विविधा प्रतिभाति। तत्त्वजिज्ञासूनां मनीषिणां तावदुपनिषद्-ब्रह्मसूत्रोपजीवक-सिद्धान्तैरनुप्राणिता प्रवृत्तिः वैदान्तिकसिद्धान्तविमर्शाधीना श्रेयसि प्रभवति। एतत्प्रातीप्येन कर्मफलविषयकजिज्ञासावतां सत्कर्म प्रवृत्तानां वेद-वेदाङ्ग-उपवेदमूलक कर्मसिद्धान्तैरनुप्रेरिताऽभ्युदयानुबन्धिनी प्रवृत्तिः प्रेयसि चानुकूल्येन भवतीत्यभ्युपगच्छामः। प्रेयसि सम्प्रवृत्तानां गृहस्थाश्रमिणां कृते नान्तरीकतया सभावश्यकानां श्रौतस्मार्तादिकर्मकाण्डानां संविधानं वेदेषु तथा विनियोगविधिविधानञ्च वैस्तर्येण ब्राह्मणग्रन्थेषु समुपलभ्यते। उक्त कर्मकाण्डीयविधानानां, विनियोगविध्यादीनाञ्च वर्गीकृतानुगतरूपेणाभिज्ञानार्थं शाङ्खायन-मानव-आपस्तम्ब-बौधायन-कात्यायन-आर्षेय-आङ्गिरसप्रभृतिऋषिप्रवरैः विविधेषु सूत्रेषु कल्पस्यास्य समुद्भावनं कृतं सम्प्रतिपद्यते।

कल्प्यते, कृतिसाध्यत्वेनेष्टसाधनत्वेन च यज्ञाद्यनुष्ठानादीनां विनियोग-विध्यानुकूल्येन विधानं क्रियत अस्मिन्निति कल्प इति शब्दानुशासनानुसारेण चतुर्विधवेदानां षडङ्गान्यतमेषु कल्पसूत्रेषु वेदप्रतिपादितकर्मकाण्डानां, विशेषतया श्रौतकर्मकाण्डानां विस्तृताविस्तृतविधाभ्यां सम्पाद्यमानाया उपक्रमपुरःसरायाः प्रविविक्तायाः क्रमपूर्वकव्यवस्थायाः संविहितविनियोगदृशाऽनुगतरूपेण तावत्परिकल्पनं भवतीतिकृत्वा वेदाङ्ग-कल्पसूत्राणामेतेषां वैदिककर्मकण्डत्वं नूनं प्रावगम्यते। ब्राह्मणग्रन्थेषु विस्तृताविविक्ततया प्रतिपादितानां श्रौतयज्ञादिसम्बद्धविधिविधानानां व्यवस्थितसंक्षिप्तानुगतरूपेण समुच्चयात्मकं परिकल्पनं कल्पसूत्रेषु, विशेषतया श्रौतसूत्रेषु संविहितमस्तीति महानियानमीषां विशेषः प्रतिभाति।

प्रतनतमसमयादारभ्याद्ययावत् समस्तानां भारतीयानां धर्मनीति जीवातूनामार्याणां सम्पूर्णं जीवनं श्रौतस्मार्तादिविधानैरनुशासितं वरीवर्ति। अपौरूषेयाणां, स्वतः प्रमाणानां वेदानां भृशं विशङ्कटतमत्वाद् दुरूहत्वाच्च धर्मकर्मप्रवणान्तःकरणानामार्याणां निखिलश्रौतस्मार्ताद्यनुष्ठानेषु समेषामेषांविधानानां साक्षादनुशासनं भवितुं शक्यं नासीत्। अतो

हि विस्तृताविविक्तविनियोगविधिप्रतिपादकानां ब्राह्मणग्रन्थानां विविक्त-लघ्वनुगतरूपाणि [1]कल्पसूत्राणि तेषामार्याणां श्रौतस्मार्तादिकर्मानुष्ठानादिकं समनुशास्तुं प्रवर्तन्ते ।

उक्तेषु कल्पसूत्रेषु श्रौतसूत्राणि, स्मार्तसूत्राणि, शुल्बसूत्राणि चान्तर्भवन्ति । स्मार्तसूत्रेषु धर्मसूत्राणि, गृह्यसूत्राणि, चान्तर्भूतानि सन्ति ।

श्रौतसूत्राणि--

एतेषु गार्हपत्य-दक्षिणाग्नि-आहवनीयानां त्रयाणामग्नीनां संस्थापना-दीनां विधानं, दर्शपूर्णमास-चातुर्मास्य-सौत्रामणि-अग्निष्टोम-अत्यग्निष्टोम-वाजपेय-सोमादि श्रौतयज्ञानां साङ्गोपाङ्गं विधिविधानं, तद्विषयकसमस्त-नियमादीनाञ्च विवरणं विहितं वरीवर्ति ।

धर्मसूत्राणि (स्मार्तसूत्रान्तर्गतानि)

एषु पञ्चस्मार्तयज्ञानां, ब्रह्मयज्ञ-देवयज्ञ-पितृयज्ञ भूतयज्ञ-नृयज्ञानां विधानं, वर्णाश्रमधर्माणां विवरणं, नित्यनैमित्तिक कर्तव्यानां विधानं, नीतिनिष्ठार्याचाराणां, पालन-संरक्षणात्मकराजव्यवहाराणां, न्याय्य-निर्णयानां, प्रायश्चित्तादीनाञ्चविधानं वैशद्येन कृतमुपलभ्यते ।

गृह्यसूत्राणि (स्मार्तसूत्रान्तर्गतानि)

एतेषु गृह्याग्निविधानं, द्विजानां नित्य-नैमित्तिक-काम्यकर्मणां विविक्तं विवरणं, गर्भाधान–पुंसवन-सीमन्तोन्नयन–जातकर्म-नामकरण–निष्क्रमण-अन्नप्राशन-चूडाकर्म–कर्णवेध–विद्यारम्भ–उपनयन-वेदारम्भ-केशान्त-समा-वर्तन–विवाह-अन्त्येष्टिरूपाणां षोडश संस्काराणां विधानञ्चविहितमस्ति ।

शुल्बसूत्राणि—

अमीषु यज्ञवेदिकुण्डमण्डपादीनां निर्माण-विधानं, एतन्निर्माणेषु समु-पयुक्तानामिष्टिकाऽदीनां स्वरूपलक्षणादिविधानं तथैतद्विषयकसमस्तनिय-मानां विवरणं विहितमभ्युपगम्यते ।

---

१. प्रतननूतनैर्भारतीयविद्वद्भिः कल्पसूत्राणां यथा व्याख्याविवरणानि प्रणीतानि समुपलभ्यन्ते, तथा हि पाश्चात्यविपश्चिद्भिः ड्रेसडन-औएरटेल-फुकुशिमा-कैलेन्ड-विन्टरनिट्अ प्रभृतिभिरप्येनं विषयं समधिकृत्य विविधानि व्याख्यान-विवेचनादीनि समुपस्थापितानि वरीवृतति ।

आर्चशाखासम्बद्धानि सूत्राणि –[1]

आश्वलायन श्रौतसूत्रं, गृह्यसूत्रञ्च ।
शांखायन श्रौतसूत्रं, गृह्यसूत्रं, शुल्बसूत्रञ्च ।
कौशीतक श्रौतसूत्रं, गृह्यसूत्रञ्च ।
शौनक गृह्यसूत्रं ।

कृष्णयजुः शाखासम्बद्धानि सूत्राणि—

मानव श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रं, शुल्बसूत्रञ्च ।
मैत्रायणीय श्रौतसूत्रं, गृह्यसूत्रञ्च ।
काठक श्रौतसूत्रं, गृह्यसूत्रञ्च । वाराह गृह्यसूत्रम् ।
आपस्तम्ब श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रं, शुल्बसूत्रञ्च ।
हिरण्यकेशीयसत्याषाढश्रौतसूत्रं, गृह्यसूत्रञ्च ।
बौधायन श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रम्, शुल्बसूत्रञ्च !
भारद्वाज श्रौतसूत्रं, गृह्यसूत्रञ्च ।
वैखानस श्रौतसूत्रं, गृहसूत्रञ्च ।
तैत्तिरीयकठसूत्रं । वाघूलगृह्यसूत्रं ।

शुक्लयजुः शाखासम्बद्धानि सूत्राणि —

कात्यायन श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रं, शुल्बसूत्रञ्च ।
बैजव श्रौतसूत्रं, गृह्यसूत्रञ्च ।
लौगाक्षिगृह्यसूत्रम् । गोभिलीय गृह्यसूत्रम् । पारस्कर गृह्यसूत्रम् ।
कात्यायनाष्टादश परिशिष्ट सूत्राणि ।

साम्नः शाखासम्बद्धानि सूत्राणि—

आर्षेय श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रं, शुल्बसूत्रञ्च ।
लाट्यायनश्रौतसूत्रं । द्राह्यायण श्रौतसूत्रं, गृह्यसूत्रञ्च ।
जैमिनीयश्रौतसूत्रं, गृहसूत्रञ्च । गौतमधर्मसूत्रं । कौथुमगृह्यसूत्रं ।
कौशिकगृह्यसूत्रं । गोभिलगृह्यसूत्रं । माषकादीनि सूत्राणि ।

आथर्वणशाखासम्बद्धानि सूत्राणि—

आङ्गिरस श्रौतसूत्रं, धर्मसूत्रं, गृहसूत्रं, शुल्बसूत्रञ्च ।
कौशिकगृह्यसूत्रं । वैतानसूत्रं, नक्षत्रकल्पसूत्रं, शान्तिकल्पसूत्रञ्च । ●

---

१. एषां सूत्राणां भाष्य-वृत्ति-व्याख्या-टीकानामुल्लेख वैदिक प्रकरणे पूर्व कृतोऽस्ति ।

६ छन्दः

पद्यमये श्रुत्यादि संस्कृतवाङ्मये श्रुतिसुखानुभूतिजनकानां, नादमधुराणां छन्दसां महत्त्वं अनितरसाधारणं प्रतिपद्यते। एभिश्छन्दोभिराविष्कृतेन, श्रुतिमनोहरेण, नादमधुरेण, लयेनैवास्मिन् संस्कृतवाङ्मये गद्यप्रबन्धापेक्षया पद्यप्रबन्धानां प्रभविष्णुत्वं प्रभूतं प्रतिभाति। समेषामेषां विशेषतया वैदिकच्छन्दसां, काश्यपकात्यायनमाण्डव्यमन्वादिऋषिप्रवरैः प्रतिपादितानां, अक्षरपरिमाणात्मकानां गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुज्जगत्यादीनां यथाशास्त्रत्वप्रख्यापनार्थं तत्र भवान् पिङ्गलमुनिः[1] छन्दः शास्त्रमाविरकार्षीत्। शास्त्रेऽस्मिन् पिङ्गलाचार्येण वैदिक लौकिकोभयविधच्छन्दसां सूत्ररूपेण निरूपणं संव्यधायि। एषः पिङ्गलसूत्रग्रन्थस्तावदष्टोत्तरत्रिशतसंख्याकेषु सूत्रेष्वष्टाध्यायेषुच प्रणिबद्धः छन्दः शास्त्रीयेषु समेषु ग्रन्थेषु प्रतनः समुपजीव्यश्च वरीवर्ति।

वर्ण-मात्रा-गण-यति-लघु-गुर्वादिविषयकनियमव्यवस्थापकं, मेरुपताका-प्रस्तार-नष्ट-उद्दिष्ट-लगक्रिया-मर्कटी - सख्यान - अध्वयोगादिविषयविवरकं, छन्दोलक्षणविधायकं चैतच्छन्दोनुशासनं कवीनां पद्यप्रणयनप्रवणानां कृते नान्तरीकतया समुपयुक्तमभूत्। यथा शिक्षाशास्त्रं उच्चारणनियमनं, व्याकरणशास्त्रं शब्दनियमनं, साहित्यशास्त्रञ्च वाक्यनियमनं विदधति, तथा छन्दः शास्त्रं पद्येषु प्रयुक्तान् मात्राऽक्षरसंख्याविशेषलघुगुरुक्रमादि-निर्देशैरक्षरान् नियमयति।

श्रूतीनां वैशुद्ध्यमवैकल्यं, श्रुतिलालित्य-नाद-सौन्दर्यानुबन्धिलयानुबन्धनञ्च तासु प्रयुक्तानां छन्दसां प्रवर्हमुद्देश्यं प्रतिभाति। छन्दसां यथार्थज्ञानमन्तरा छन्दः सूपनिबद्धानां श्रुतीनां वास्तविकार्थावबोधनं, श्रुतेरानुश्रविकशाब्दिकरूपस्याविकलं विशुद्धं ज्ञानञ्च कथमपि भवितुं न शक्यमित्यत एषां छन्दसां वेदाङ्गेषु पादत्वेनाधिकरणरूपं पदं प्रतिपदं प्रतिपद्यते।

---

१. पिङ्गलमुनिर्विक्रमपूर्वीय सप्तशताधिकद्विसहस्र-संवत्सरेभ्यः पूर्वं समाविरभूदिति भारतीयेतिहासज्ञाः समामनन्ति।

छन्दयति-पृणाति-रोचत इतिच्छन्दः, छन्दयति-आह्लादयतीतिच्छन्दः, छन्द्यन्त अनेनेतिच्छन्दश्चेत्यादिव्युत्पत्त्यनुसारेण पद्यमयेषु वैदिकलौकिक-संस्कृतवाङ्मयेषु सम्प्रयुक्तानां छन्दसां श्रोतुः श्रुतिसुखस्य, वक्तुर्मुखसुखस्य चानुबन्धित्वं छन्दोविशेषज्ञाः सम्मन्वते। अपिच 'छादयति मन्त्रप्रतिपाद्य-यज्ञादीनितिच्छन्द' इति यास्कीयनिरूक्त-व्याख्यानानुसारेण वेदविहित-यज्ञादीनामासुरीप्रवृत्तितः परिरक्षण छन्दसामेषामभीप्सितमुद्देश्यमनन्य-साधारणं प्रतिभाति। 'छादयन्ति ह वा एनं छन्दांसि पापात्कर्मण' इत्युक्तदिशा छान्दसेन कवचेन मन्त्राणां तेजसां समाच्छादनैः पापेभ्यः संरक्षणं भवतीतिकृत्वा वैदिकच्छन्दसां महत्त्वं नितरां प्रतिपद्यते। इत्थंविधानि श्रुतिसंशुद्धि-संरक्षणप्रवणानि नादमाधुर्यसमाविष्कारकाणि वैदिकलौकिकोभयविधच्छन्दांसि छन्दः शास्त्रं नियम-लक्षणविधानैः सवि-स्तरं विवृणोति।

छन्दोज्ञानमिदं भवाद् भगवतो लेभे सुराणां पतिः।
तस्माद्दुश्च्यवनस्ततः सुरगुरुर्माण्डव्यनामाततः॥
माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः।
तस्येदं यशसा गुरोर्भुविधृतं प्राप्यास्मदाद्यैः कृतम्॥

इति पिङ्गलसूत्रस्य यादवप्रकाशप्रणीतभाष्यप्रतिपादनानुसारेण छन्दः-शास्त्रस्याऽद्यप्रवर्तकः परमेश्वरोमहेश्वर आसीत्। तेनेदं शास्त्रं-समधिकृत्य पुरन्दरः समुपदिष्टस्तेनच छन्दोज्ञानमिदं दुश्च्यवनाय, तेन बृहस्पतये, बृहस्पतिना माण्डव्याय, माण्डव्येन सैतवाय, सैतवेन यास्काय, यास्केन पिङ्गलाय, पिङ्गलेन च नः कविभ्यः प्रदत्तमिति छन्दः शास्त्रीय-गुरु-शिष्यपरम्परात्मकं विवरणं समुपलभ्यते।

पिङ्गलपूर्ववर्तिनः, पिङ्गलेन स्वप्रणीते छन्दः-सूत्रग्रन्थे यथास्थानं समुदाहृताः छन्दः शास्त्रस्योद्भावका आचार्याः क्रौस्टुकि-ताण्डि-सैतव-काश्यप-रात-माण्डव्य-यास्कप्रभृतयः समभूवन्निति ज्ञायते। एतेषां छन्दोविषयका ग्रन्थविशेषाः सम्भवतः कालकवलीकृताः सम्प्रति नोप-लभ्यन्ते।

तत्र तावदाचार्यपिङ्गलेन छन्दः सूत्रग्रन्थे वैदिक लौकिकसंस्कृतोभय-विधच्छन्दांसि नियमलक्षणविधानादिभिर्विवृतानि सन्ति। तत्परवर्ति-भिश्च्छन्दोविशेषज्ञैः भरत-जनाश्रय-क्षेमेन्द्र-विरहाङ्क-कालिदास-हेमचन्द्र-

जयदेव-जयकीर्ति-केदारभट्ट-अप्पयदीक्षित-भास्करराय प्रभृतिभिः तैः प्रणीतेषु छन्दः शास्त्रीयग्रन्थेषु विशेषतया लौकिकच्छन्दांसि निरूपितानि सन्दृश्यन्ते।

पैङ्गलछन्दःशास्त्रे छन्दसां द्वैविध्यं प्रतिपादितमस्ति। (१) वैदिकच्छन्दांसि तथा (२) लौकिकच्छन्दांसि।

वैदिकच्छन्दांसि—

वेदचतुष्टये प्रयुक्तानि सप्तच्छन्दांसि वर्ण-प्रधानानि (अक्षरसंख्याप्रधानानि) सभेदोपभेदानिवरीवृवति। तानि चेमानि–(१) गायत्री, (२) उष्णिक्, (३) अनुष्टुप्, (४) बृहती, (५) पङ्क्ति, (६) त्रिष्टुप्, (७) जगतीछन्दश्च।

तत्र गायत्रीछन्दः दशविधम्—

(१) गायत्री, (२) पदपङ्क्तिः, (३) उष्णिग्गर्भा, (४) द्वितीया पदपङ्क्तिः, (५) पादनिचृत्, (६) अतिनिचृत्, (७) यवमध्या, (८) वर्धमाना (९) प्रतिष्ठा, (१०) ह्रसीयसी च।

उष्णिक् छन्दः अष्टविधम्—

(१) उष्णिक्, (२) पुरउष्णिक्, (३) ककुप्, (४) ककुन्यङ्कुशिरा, (५) तनुशिरा, (६) पिपिलिकामध्या, (७) अनुष्टुब्गर्भा, (८) उष्णिगेवकेवला च।

अनुष्टुप्छन्दः अष्टविधम्—

(१) अनुष्टुप्, (२) महापदपङ्क्तिः, (३) कृतिः, (४) पिपिलिकामध्या, (५) काविराट् (६) नष्टरूपी, (७) विराट् (८) विराट् च।

बृहतीछन्दः नवविधम्—

(१) बृहती, (२) पुरस्तात् बृहती, (३) न्यङ्कुसारिणी (उरोबृहतीस्कन्धोग्रीवी), (४) उपरिष्टाद् बृहती, (५) विष्टार बृहती, (६) ऊर्ध्वबृहती, (७) पिपिलिकामध्या, (८) विषमपदा, (९) केवलाबृहती च।

पङ्क्तिच्छन्दः अष्टविधम्—

(१) पङ्क्तिः, (२) विराट् (३) सतोबृहती, (४) विपरीता बृहती,

(५) प्रस्तारपङ्क्तिः, (६) आस्तारपङ्क्तिः, (७) संस्तारपङ्क्तिः (८) विष्टारपङ्क्तिश्च ।

त्रिष्टुप्छन्दः द्वादशविधम्—

(१) त्रिष्टुप्, (२) जागत्, (३) त्रिष्टुप्, (४) अभिसारिणी, (५) विराट् स्थाना, (६) विराट् स्थाना, (७) विराड्रूपा, (८) ज्योतिष्मती, (९) ज्योतिः (१०) महाबृहती, (११) यवमध्या, (१२) पङ्क्त्युत्तरा च ।

जगतीछन्दः चतुर्विधम्—

(१) जगती, (२) महासती बृहती, (३) महापङ्क्तिः (४) महापङ्क्तिश्च ।

अतिजगत्यादि सप्तवर्गाः—

(१) अतिजगती वर्गः, (२) शक्वरीवर्गः, (३) अतिशक्वरीवर्गः, (४) अष्टिवर्गः, (५) अत्यष्टिवर्गः (६) धृतिवर्गः, (७) अतिधृतिवर्गश्च ।

लौकिकच्छन्दांसि—

एतानि द्विविधानि सन्ति । (१) मात्रिकच्छन्दांसि (जातिपदवाच्यानि) तथा (२) वर्णिकच्छन्दांसि (वृत्तपदवाच्यानि) ।

तत्र मात्रिकच्छन्दांसि—

आर्या (द्विपदी)-पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः, उपगीतिः, उद्गीतिः, आर्यागीतिश्चेति नवविधा ।[1]

वैतालीयम् (चतुष्पदी)-वैतालीयं, औपच्छन्दसिकं, अपातलिकं, प्राच्यवृत्तिकं, उदीच्यवृत्तिकं, प्रवृत्तकं, अपरान्तकं, चारुहासिनी, दक्षिणान्तिका, पश्चिमान्तिका, मागधी, उपहासिनि, मात्रासमकं,

---

१. आर्याऽदिपञ्चगीतिषु प्रत्येकायाः षोडशभेदाभवन्ति । इत्थमार्यादिपञ्चगीतीनां सम्भूयाशीति भेदाः वृत्तरत्नाकरस्य द्वितीयाध्यायस्य वैद्यनाथशास्त्रिप्रणीतविषमस्थलटिप्पण्यां प्रदर्शिताः सन्ति ।

उपचित्रा, विश्लोकं, चित्रा, वानवासिका, पादाकुलकं, नटचरणं, नृत्तगतिः, अचलधृतिः, पद्धतिः, द्विपदी, अब्जनालं, कामलेखा, गुणः, शिखा, खञ्जा, अतिरुचिरा, अनङ्गक्रीडाचेत्यादीनि वैतालीयच्छन्दांसि ।

वर्णिकच्छन्दांसि (गणाक्षरच्छन्दांसि)—

इमानि सम-अर्धसम-विषम भेदेन त्रिविधानि वरीवृतति ।

समवर्णिकच्छन्दांसि—

उक्ता, अत्युक्ता, मध्या, प्रतिष्ठा, सुप्रतिष्ठा, गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पंक्ति, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, अष्टि, अत्यष्टि, धृति, अतिधृति, कृति, प्रकृति, आकृति, विकृति, सङ्कृति, अतिकृति, उत्कृति, दण्डकञ्चेत्यादीनि ।

अर्धसमवर्णिकच्छन्दांसि—

कामिनी, शिखी, नितम्बिनी, वारुणी, वतंसिनी, इला, मृगाङ्कमुखी, प्रवर्तकं, वानरी, ललिता, भामिनी, भद्रं, विराट्, केतुमती, प्रबोधिता (वियोगिनी), वेगवती, प्रसन्ना, करिणी, विपरीताख्यानकी, आख्यानकी, उपचित्रं, अपरवक्त्रं, चलमध्या, मालभारिणी (वसन्ततिलका), हरिणप्लुता, विलसितलीला, चूडामणिः, शिखण्डिः, क्षान्तिः, आमलकी, शङ्खनिधिः, विपरीतभामा, पद्मनिधिः, भामा, कौमुदी, मञ्जुसौरभं, पुष्पिताग्रा, यववती, मृगी, मकरावली, षट्पदावली, मितभाषिणी, यमवती, उरुगी, सारसी, षट्पदा, मानिनी, अपरा, कलिकाललिता, हंसी चेत्यादीनि ।

विषमवर्णिकच्छन्दासि—

वक्त्रानुष्टुप्, सुवक्त्रं, पथ्यावक्त्रं, विपरीतपथ्यावक्त्रं, पथ्यावृत्तं, विपरीतपथ्या, चपलावक्त्रं विपुलावक्त्रं, पदचतुरूर्ध्वं, आपीडं, प्रत्यापीडं, सम्पीडं, कलिका, लवली, अमृतधारा, उद्गता, सौरभकं, ललितं, कीर्तिः, सरलं, उपस्थितप्रचुपितं, वर्धमानं, शुद्ध विराड्ऋषभं, विलासः, अपरविलासः, उपजातिः, द्वितीयोपजातिः, वंशमाला, सिंहलुप्तं, प्रकीर्णकं, गाथा, रमा, कुमुदाकरश्चेत्यादीनि ।

समवर्णिकच्छन्दस्सु, दण्डकातिरिक्तेषु निम्नोट्टंकितानिच्छन्दांसि परिगणितान्यन्तर्भूतानिच सन्ति । तानीमानि—

श्री स्त्री-नारी-मृगी-कन्या-सती-पंक्ति-प्रिया-तनुमध्याशशिवदना-सोम-राजी-मधुमती-कुमारललिता-मन्दलेखा-चित्रपदा-माणवक-विद्युन्माला-समानिका-प्रमाणिका-गजगति-भुजगशिभृता-मणिमध्य-भुजंगसंगता-रुक्मवती-मत्ता-त्वरितगति-मनोरमा-इन्द्रवज्रा-उपेन्द्रवज्रा-उपजाति-सुमुखी-शालिनी-वातोर्मी-भ्रमरविलसिता-अनुकूला-रथोद्धता- स्वागता-दोधक-मोटनक-श्येनी-चन्द्रवर्त्म-वंशस्थविल-इन्द्रवंशा-जलोद्धत-गति-भुजंग-प्रयात-तोटक-स्रग्विणी-वैश्वदेवी-प्रमिताक्षरा-द्रुतविलम्बित-मन्दाकिनी-कुसुमविचित्रा-तामरस-मालती-मणिमाला-जलधरमाला-प्रहर्षिणी-रुचिरा-मत्तमयूर-चण्डी-मन्जुभाषिणी- चन्द्रिका-कलहंस- प्रबोधिता-मृगेन्द्रमुख-असम्बाधा-असन्ततिलका-अपराजिता-प्रहरणकलिका- वासन्ती-लोला-नान्दीमुखी-शशिकला-स्रग्-मणिगुणनिकर-मालिनी-विद्युन्माला (अपरा) विपिनतिलक- तूणक- चन्द्रलेखा- चित्रा-चित्रसंज्ञ- ऋषभगजविलसित-चकिता-प्रमाणिका-मदनललिता - वाणिनी-प्रवरललित - अचलधृति-गरुडरुत-शिखरिणी-पृथ्वी-वंशपत्रपतित-मन्दाक्रान्ता-हरिणी -नर्दटक-कोकिलक-हारिणी-भाराक्रान्ता - कुसुमितलतावेल्लिता-नन्दन-नाराच-चित्रलेखा-शार्दूलललित -मेघविस्फूर्जिता-छाया-शार्दूलविक्रीडित-सुरसा-फुल्लदाम-सुवदना-गीतिका-वृत्त-शोभा-स्रग्धरा-सरसी-हंसी - मदिरा-अद्रितनया-मत्ताक्रीड-तन्वी-कौञ्चपदा-भुजंगविजृम्भितादीनि षट्शताधिकानिच्छन्दांसि ।

दण्डकच्छन्दांसि—

अनङ्गशेखर - अब्द- अर्णव - अशोकपुष्पमञ्जरी - उत्कलिका - उद्दाम-कङ्केलि-कामबाण-कुसुमास्तरण - कुसुमस्तबक-केलि-चण्ड-चण्डकाल-चण्ड-वेग-चण्डवृष्टिप्रताप-जीमूत-दम्भोलि-पन्नग-प्रचितक-भुजंग - भुजंगविलास - मत्तमातंग-लीलाकर-मालती-मेघमाला-लीलाविलास-वर्णक - वात - व्याल-शङ्ख-समुद्र-सिंह-सिंहविक्रीड-हंसावल्यादीनि[1] ।

---

१. छन्दसां नामानि चेमानि पैङ्गल छन्दः सूत्र-भरतनाट्यशास्त्र-जयदेवच्छन्द-वृत्त-जातिसमुच्चय-स्वयम्भूच्छन्द-रत्नमञ्जूषा-वृत्त रत्नाकर-छन्दोनुशासन-छन्दोमञ्जरी मन्दारमरन्दचम्पू-कविदर्पण-छन्द कौस्तुभ-आदिविविधग्रन्थेभ्यः सङ्कलितानि सन्ति ।

जयदामा (वृत्तकुसुमोच्चयः) ग्रन्थः श्री वेलणकर सम्पादितः छन्दोविषयक जिज्ञासावतां कृते सन्द्रष्टुं योग्यः प्रतिभाति ।

छन्दः शास्त्रानुसारेण समेषामेषां छन्दसां विकल्प-जातिभेदाद्यनुसारि-परिगणनं महत्तमास्वब्जाधिकासुसंख्यासु भवितुमर्हतीति भाति।[1] किन्तु सम्प्रति प्राप्तसकलविध संस्कृत-वाङ्मयेषु, विशेषतया साहित्य-काव्यादिषु, पद्यमयेषु वैरल्य-प्राचुर्याभ्यां शतसंख्याकानिच्छन्दासि प्रयुक्तानि प्रतीयन्ते।

लौकिकसंस्कृतवाङ्मयेषु तावदनुष्टुप्छन्दः सर्वतः प्राथम्येन वाल्मीकि-मुनिना रामायणे प्रयुक्तं प्रतिभाति। तदनु महाभारतपुराणादिष्वपि चानुष्टुप्छन्दसः प्राधान्यं सन्दृश्यते। ततो हिपरवर्तिभिः कविवरैर्विरचितेषु छन्दोबद्धेषु काव्येषु प्रसङ्गोचितानि विविधानि श्रुतिललितानिच्छन्दांसि प्रयुक्तानि वरीवृतति। इत्थं नादसौन्दर्यमाधुर्यानुबन्धिनां मात्राऽक्षर-नियामकानां छन्दसां विवरणप्रवणमिदं छन्दः शास्त्रं वेदाङ्गेषु[2], संस्कृत-वाङ्मयेषु च नूनमुच्चैः पदं समलङ्करोति।

इदानीं संस्कृतवाङ्मयेषु समुपलब्धानां छन्दः शास्त्रीयग्रन्थानां रचना-स्वरूपं चतुर्विधं प्रतिभाति।

१. सूत्रात्मकम्—

एतत्स्वरूपं पैङ्गलछन्दः सूत्रादिग्रन्थेषु सन्दृश्यते।

२. पद्यात्मकम्—

अदः स्वरूपं अग्निपुराण-भरतनाट्यशास्त्रादिग्रन्थेषु समवलोक्यते।

३. वर्ण्यवृत्तानुसारिस्वरूपम्—

इदं वृत्तरत्नाकर-छन्दोमञ्जर्यादिग्रन्थेषु प्रतिभाति।

४. अक्षरानुसारिस्वरूपम्—

एतत् श्रुतबोधादिग्रन्थेषुतावदवलोक्यते।

---

१. छन्दसां लक्षण-भेदोपभेदादिविषयकं निरूपणं पैङ्गल छन्दः सूत्रग्रन्थे, हलायुध-कृततट्टीकायां, वृत्तरत्नाकरे, भट्टनारायण कृतायां तद्व्याख्यायां, सुवृत्ततिलक-श्रुतबोध-छन्दोमञ्जरी-वृत्तवार्तिक-छन्दोनुशासनादिग्रन्थेषु च समुपलभ्यते।

२. वेदषडङ्गविषयमधिकृत्य कृतं विवरणं नारदपुराणस्य पूर्वभागे, द्वितीयपादे समुपलभ्यते।

छन्दः शास्त्रीयाः प्रमुखाः ग्रन्थाः—

छन्दः-शास्त्रम्[1]-रत्नकुमारः (वि० पू० ३००० व० पू०), छन्दः शास्त्रम्[2]-काश्यपः (वि० पू० ३००० व० पू०), छन्दः शास्त्रम्[3]-क्रौष्टुकिः (वि० पू० ३००० व० पू०), छन्दः-शास्त्रम्[4]-ताण्डी (वि० पू० ३००० व० पू०), छन्दः-शास्त्रम्[5]-रातमाण्डव्यौ (वि० पू० ३००० व० पू०), छन्दः-शास्त्रम्[6]-सैतवः (वि० पू० ३००० व० पू०), छन्दःशास्त्रम्[7]-यास्कः (वि० पू० ३००० व० पू०) ऋक्प्रातिशाख्यस्यान्तिमोभागः-शौनकः (वि० पू० ३००० व० पू०) वैदिकच्छन्दोनुक्रमणिका-कात्यायनः (वि० पू० २७०० व० पू०), छन्दः शास्त्रम् (सूत्रात्मकम्[8])-पिङ्गलः (वि० पू० २७०० वर्ष-पूर्वम्), नाट्यशास्त्रम्-भरतमुनिः (वि० पू० १ श०), स्वयम्भू छन्दः-स्वयम्भूः (वै० ७ श० सम्भावितं), छन्दोविचितिः-जनाश्रयः (व० ७-८ श०), छन्दोनुशासनम्-जयकीर्तिः (वै० १० श०), वृत्तरत्नाकरः[9] केदारभट्टः (वै० ११ श०), सुवृत्ततिलकम्-क्षेमेन्द्रः (वै०

---

१. अस्ययादवप्रकाशभाष्ये समुल्लेख उपलभ्यते ।

२. अस्य पिङ्गलसूत्रग्रन्थे (७।९), कृष्ण शर्मकृतमन्दारमकरन्द चम्पू टीकायाश्चोल्लेखः ।

३. अस्य पिङ्गलसूत्रग्रन्थे (३।२९), यास्कीयनिरुक्ते (८।२) चोल्लेख उपलभ्यते ।

४. अस्य पिङ्गलसूत्रग्रन्थे (३।३६), भारते (अनु० प० १६।१) चोल्लेखोऽस्ति ।

५. अस्य पिङ्गलसूत्रग्रन्थे (७।३५) समुल्लेखो वर्तते ।

६. अस्य पिङ्गलसूत्रग्रन्थे (५।१८) उल्लेख उपलभ्यते ।

७. अस्य पिङ्गलसूत्रग्रन्थे (३।३०), भारते (शान्तिप० ३४३।७२) चोल्लेखो वरोवर्ति ।

८. अस्य चतुर्दश संख्या का व्याख्याः श्रूयन्ते । तासु हलायुध प्रणीता मृतसञ्जीवनी, यादवप्रकाशभाष्यं, प्रेमानुभूती त्याद्याः व्याख्याः सुप्रथन्ते ।

९. अस्य पञ्चविंशत्यधिका व्याख्या अनुश्रूयन्ते । आसु भट्टनारायणप्रणीता व्याख्या विशिष्यत इतिभाति ।

११-१२ श०), वृत्तरत्नावली (श्रुतबोधः)-कालिदासः (अपरः) (वै० १२ श०) छन्दोनुशासनम् हेमचन्द्रः (वै० १२-१३ श०), जयदेवच्छन्दः-जयदेवः (वै० १३ श०), छन्दः प्रशस्तिः श्रीहर्षः (वै० १३ श०), कविदर्पणः-अज्ञातः (वै० १४ श०) छन्दोनुशासनम्-वाग्भटः (वै० १४ श०), वृत्तजातिसमुच्चयः-विरहाङ्कः (वै० १४ श० सम्भावितम्), छन्दोमञ्जरी-दुर्गादासः (वै० १५ श०), वाणीभूषणम्-दामोदरमिश्रः (वै० १५ श०), वाग्वल्लभः-दुःखभञ्जनकविः (वै० १६ श०), वृत्तवार्तिकम्-अप्पयदीक्षितः (वै० १७ श०), वृत्तरत्नावली-वेंकटेशः (वै० १७ श०), छन्दः कौस्तुभः-भास्करायः (वै० १७ श० सम्भावितम्), छन्दोमञ्जरी-गङ्गादासः (वै० १८ श०), वृत्तमुक्तावली, मन्दारमरन्दचम्पूः-कृष्णकविः (वै० १९ श०), वृत्तिवार्तिकम्-रामपाणिवादः (वै० १९ श०), वृत्तमौक्तिकम्-चन्द्रशेखरः (वै० २० श०), श्रुतबोधः-व्रजरत्नभट्टाचार्यः (वै० २० श०), छन्दः कौमुदी-खिस्तेनारायणशास्त्री (वै० २० श०) चेत्यादयः ।

अन्ये केचन छन्दोग्रन्थाः —

छन्दश्चन्द्रिका, छन्दः प्रभाकरः, छन्दः संग्रहः, छन्दः सारः, छन्दोदीपिका, छन्दोमन्दाकिनी, छन्दोरत्नाकरः, छन्दोऽलङ्कारः, छन्दोविद्वन्मण्डनम्, छन्दोवृत्तिः, छन्दोविंशतिका, छन्दोविवेचनम्, जगद्विजयच्छन्दः, जयदामा (छन्दोग्रन्थसंग्रहः श्री वेलणकरेण सम्पादितः), पिङ्गपीयूषम्, वृत्तचन्द्रिका, वृत्तद्युमणिः, वृत्तमणिकोशः, वृत्तालङ्कारः, सर्वसमावृतप्रभावः, प्राकृतपैङ्गलञ्चेत्यादयः ।

पण्डित धनराजशास्त्रि-महोदयानां ग्रन्थसूचीपत्रानुसारेण, विष्णुसूत्रम्, छन्दोर्णवः, छन्दोरहस्यम्, छन्दः प्रभाकरः, छन्दः प्रवेशः, छन्दोरत्नाकरश्चेत्यादयः छन्दोग्रन्थाः सन्तीति ज्ञायते ।

उपवेदाः

१. आयुर्वेदः
२. धनुर्वेदः
३. गान्धर्ववेदः
४. अर्थवेदः

उपवेदाः

आधिदैविकाऽध्यात्मिकपारमार्थिकप्रमेयाणां, भारतीयार्यजीवनस्य प्रवर्हपवित्रोद्देश्यभूतानां सविस्तरं विवरणत्तावद्वैदिकसंहिताब्राह्मणोपनिषत्सु विशेषतया समुपलभ्यते। अमीषूपवेदेषु लौकिकाऽधिभौतिक जीवनस्य सकलविधसुखसाधनविधानां, तद्विषयकसिद्धान्तानां प्रतिपादनं, विवेचनञ्चाभ्युपगम्यते। अतोहि तेषां समेषामुपवेदानां भारतीयार्यजीवने समुपजीवकप्रमाणत्वेन नितरां महत्त्वं वरीवर्ति।

वेदेषु लौकिकमाधिभौतिकञ्च ज्ञानं सूत्ररूपेण निहितमस्ति। उपवेदेषु लौकिकजीवनप्रमेयविवरकाणां तावदाधिभौतिकसिद्धान्तानां परिवर्णनं समुपलभ्यते। एषु प्रतिपादितानां समेषां विषयाणां सैद्धान्तिकत्वं, प्रायोगिकत्वञ्चाभ्युपगम्येते।

तत्र चत्वार उपवेदाः—

(१) आयुर्वेदः	ऋग्वेदस्याथर्ववेदस्य चोपवेदः[१]।
(२) धनुर्वेदः	यजुर्वेदस्योपवेदः।
(३) गान्धर्ववेदः	सामवेदस्योपवेदः।
(४) अर्थवेदः[२]	अथर्ववेदस्योपवेदः[3]।

●

---

१. शौनको हि चरणव्यूह ग्रन्थे तावदायुर्वेदस्य ऋग्वेदोपवेदत्वं प्रतिपादयति। आयुर्वेदीया ग्रन्था अस्याथर्ववेदोपवेदत्वं प्रकटीकुर्वन्ति! अतोहि ग्रन्थप्रणेताऽत्रायुर्वेदस्य ऋगथर्ववेदयोरुपवेदत्वमुररीक्रियते।

२. अर्थवेदे अर्थशास्त्र-राजनीतिशास्त्र-युद्धशास्त्र-शिल्पशास्त्रादीनामन्तर्भावो भवति।

३. मतान्तरे, अथर्ववेदस्योपवेदः तन्त्रवेदः (तन्त्रशास्त्रम्) प्रतिपादितोऽस्ति। अत्र विषये तत्त्वान्वेषकैरनुसन्धित्सुभिस्तत्त्वं गवेषितव्यम्।

१. आयुर्वेदः (चिकित्साशास्त्रम्)

हिताहितं सुखंदुःखं आयुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तं, आयुर्वेदः स उच्यते ॥

(चरकसंहिता १/४१)

चिकित्सासिद्धान्तप्रतिपादकस्यायुर्वेदस्य ऋगथर्ववेदान्यतरोपवेदत्वं महर्षिभिर्निर्णीतमस्तीत्यतस्तावदस्य संस्कृतवाङ्मयेषु प्रतनत्वं निस्सदिग्धतया प्रमाणीभवति । अनाद्यपौरुषेयेषु वेदेषु, विशेषतया ऋगथर्ववेदयोस्तथा वेदसम्बद्धार्षग्रन्थेषु पार्थिव-औद्भिद्-रासायनिक-जलीय-सौर्य-वायवीय-मानसिकादिविविधचिकित्साविधानां मणि-मन्त्र-तन्त्र-औषधादीनां गदप्रतीकारक-निवारक-विनाशकचिकित्सोपायादीनाञ्च सान्दर्भिकं विवरणं समुपलभ्यते ।[1] तदनु पुराणेतिहासागमादिषु चायुर्वेदीयसिद्धान्तानां महामायूरी-मातङ्गी-मधु-चाक्षुष्मती-सञ्जीवन्यादिविविधविद्यानां च परिवर्णनं, प्रासङ्गिकतया विहितमभ्युपगम्यते ।[2] इत्थंमायुर्वेदीयचिकित्सासिद्धान्तानां बीजं वेदेषु, पुराणेतिहासागमाकरग्रन्थेषु च सन्निहितमस्तीत्यतोहि चिकित्साशास्त्रात्मकस्यायुर्वेदस्य समूलत्वं, प्रतनत्वञ्चाविप्रतिपन्नतया, भ्रमातीततया च व्यक्तीभवति ।[3]

---

१. आर्चसंहितायां १।१६, १।१७, १।१९, १।५०, १।८९, १।१९१, २।१५, २।२३, १०।१३७, १०।१६३। अथर्वसंहितायां १।३, १।११, २।३१, २।३२, ४।९३, ५।२३, ६।१४, ६।२५, ६।८३, ६।९२, ६।१०९, ६।१२७, ६।१३६, ७।१२२, ९।९३, १९।३५ ।

२. पुराणेषु, विशेषतयाऽग्निपुराणे (२७९,२९२ अध्याययोः) इमं विषयमवलम्ब्य सविस्तरं विवरणं समुपलभ्यते ।

३. वेदवर्णितानायुर्वेदविषयान्समधिकृत्य पाश्चात्यविपश्चिद्भिः ब्लूमफील्ड-हिलब्रान्ट-कैलेन्ड-कार्डियर जोली-ब्रोलिंग-झीमर प्रभृतिभिः, भारतीयविद्वद्भिश्च विहितं विवेचनादिकं ज्ञातुं नितरां योग्यं प्रतिभाति ।

आयुः-जीवितं, अनेन-ज्ञानेन, विद्यते-ज्ञायते-विन्दते-लभ्यते, न रिष्यतीत्यायुर्वेद इति काश्यपसंहिता-विमानस्थानसमाख्यातव्युत्पत्त्यनुसारेण, आयुरस्मिन्विद्यत अनेन वाऽयुर्विन्दति-प्राप्नोतीत्यायुर्वेद-इति सुश्रुतसंहितायां प्रतिपादितायुर्वेदव्याख्यानानुसारेण च मानवस्य शरीरेन्द्रियसत्त्वात्मसंयोगरूपस्यायुषः प्रापकत्वेन, ज्ञापकत्वेन चायुर्वेदस्य तावदतितरां महत्त्वं वरीवर्ति। स्वास्थ्यसंरक्षकत्वेन, सकलविधव्याधिविनाशकत्वेन चायुर्वेदीयचिकित्साविधानां, तदुपजीव्यसिद्धान्तानामिह मानवजीवने सम्प्रतिपत्तुं नितरां वरेण्यत्वं प्रतिभाति।

धर्मार्थकाममोक्षाणामारोग्यं मूलसाधनम्। (च० सं० अ० १) इति वचनानुसारेण आध्यात्मिकाऽधिदैविकाऽधिभौतिकादिदुःखानां, समस्तबाधनालक्षणानां, सर्वथाऽप्रियाणामत्यन्ताभावरूपमारोग्यं चतुर्विधपुरुषार्थानां निदानं, निधानं समस्तविभवानां, सर्वोहिजनः सर्वदा समीहते। तत्र विशेषतयाऽधिभौतिकतापसाधनीभूतानां समेषां रोगाणां निवृत्तिसाधनानि चिकित्सात्मकानि, प्रत्यक्षक्रियासिद्धान्तविषयकसपरिकरनिरूपणप्रवण आयुर्वेदः सविस्तरं विवृणोति। चतुर्विधपुरुषार्थसाधकोद्योगप्रपञ्चः पाञ्चभौतिकमानवशरीरस्य स्वास्थ्यमन्तरा कथमपि यथावत्प्रवर्तयितुं न शक्यत इतिकृत्वा नैरुज्यजनकभैषज्यप्रधानं चिकित्साविधानं चिकित्साशास्त्रात्मकायुर्वेदस्यास्य प्रवहं प्रयोजनं प्रतिभाति।

मृत्युर्बुद्धिमताऽपोह्यो यावद् बुद्धिबलोदयम्।

इति श्रीमद्भागवतवचनानुसारेणापि चिकित्सक-चिकित्स्यादीनां भृशं समभिलषितं मृत्युमपोहकमायुर्वर्धकं समुचितचिकित्साविधानं शास्त्रमिदं करोति।

'आयुर्वेदमेवाग्रेऽसृजत्ततो विश्वानि भूतानि' इति काश्यपसंहितोक्तदिशाऽयुर्वेदस्यादिप्रवर्तकोविधाताऽसीत्। तेनोपदिष्टो दक्षप्रजापतिरस्य शास्त्रस्य प्रथमो वक्ताऽभूत्। तस्य शिष्यावश्विनीकुमारौ सुरभिषग्वरावास्ताम्। अश्विनीकुमाराभ्यां समुपदिष्टः पुरन्दर अस्य महान् मनीषी चाभूत्। तस्य शिष्याः कश्यप-भारद्वाज-धन्वन्तरि-वसिष्ठ-वामदेव-अगस्ति-अत्रि-भृगु-पुलस्त्य-आङ्गिरस-अथर्व-च्यवन-असित-निमि-गौतमादयो- ऋषि-

प्रवराः सम्बभूवुः । अमीभिः प्रणीता आयुर्वेदीय संहितासूत्रतन्त्रादि ग्रन्थाः[1] सम्प्रति समुपलब्धा अनुपलब्धा वा नैकविधाः परिश्रूयन्ते ।

इन्द्रशिष्यो धन्वन्तरिः (दिवोदासः) शल्यतन्त्रस्य समुपबृंहक आचार्यस्समभूत् । तस्य सप्तशिष्यवराः सुश्रुत-औपधेनव-वैतरण-उरभ्र-पौष्कलावत-करवीर्य-गोपुररक्षिताः शल्यतन्त्रसिद्धान्तप्रतिपादका अभूवन् । इन्द्रशिष्योनिमिस्तच्छिष्यः करालश्च शालाक्यतन्त्रस्य व्याख्यातारौ समभूताम् । इन्द्रशिष्यो भरद्वाजः कायचिकित्सातन्त्रस्य, वाजीकरण-तन्त्रस्य च समुपबृंहणमकरोत् । अस्य शिष्यस्तावदात्रयेपुनर्वसुः (कृष्णा-त्रेयः), तस्य च षट्शिष्यवरा अग्निवेश-भेल (भेड)-जातुकर्ण-पराशर-हारीत-क्षारपाणयः कायचिकित्सातन्त्रस्य व्याख्यातारो बभूवुः ।

इन्द्रशिष्य अथर्व ऋषिः प्रवर्हतया भूतविद्यातन्त्रस्य वक्ता समभूत् । इन्द्रशिष्यः कश्यपः प्रामुख्येण कौमारभृत्यतन्त्रस्यागदतन्त्रस्यानुषङ्गिक-तया स्त्रीरोगचिकित्सातन्त्रस्य च व्याख्याताऽभूत् । अमुष्य शिष्याः प्रशिष्याश्च सनक-लाट्यायन-आलम्बायन-जीवकादयः समभूवन् । इन्द्र-शिष्या अगस्त्य-वसिष्ठ-भृगु-कपिञ्जलादय रसायनतन्त्रविशेषज्ञाः सम्बभूवुः । एभिः शक्रशिष्यैरायुर्वेदपारङ्गतैर्मुनिप्रवरैः प्रणीतेषु बहुविधेषु संहिता-सूत्र-तन्त्रादिग्रन्थेषु चिकित्साशास्त्रीयान्यतमाङ्गस्य सविशेषं, समेषामङ्गान्त-राणां सामान्यञ्च निरूपणं संविहितमभ्युपगम्यते ।

---

१. आयुर्वेदीयाः प्रतनतमाः संहिताः–

अश्विनी कुमारसंहिता (१२००० श्लोकैः संवलिता), ब्रह्मसंहिता (२४००० श्लोकात्मिका), मेष संहिता (१६००० श्लोकैः संवलिता), पुष्कलसंहिता (३२००० श्लोकैः संहिता) इत्याद्याः । सूत्राणि–धन्वन्तरि-सूत्रम्, मानसूत्रम्, इन्द्रसूत्रम्, जाबालिसूत्रम्, सौभरिसूत्रम्, दाल्भ्य सूत्रम्, देवलसूत्रञ्च ।

शास्त्रीयग्रन्थाः–काश्यपसूपशास्त्रम्, धातुवादः, आग्नीध्रसूत्रराजः, कुर्णकप्रभा, रूपार्णवः, रसार्णवश्च ।

इमे ग्रन्थाः प्राचीनायुर्वेदीयसिद्धान्तप्रतिपादकाः पुरातनचिकित्सासिद्धान्ताना-माकररूपाः प्रतिपद्यन्ते ।

चरकसंहितायामुल्लिखिता आयुर्वेदसिद्धान्तप्रतिपादकाः प्रतना ऋषि-प्रवरा विक्रमपूर्वकालिका निम्नोट्टङ्किता आसन्। ते चैते—

वामकः, मौद्गल्यः शरलोमा, हिरण्याक्षकुशिकः, भद्रकाप्यः, कांकायनः, भिक्ष्वात्रेयः, कुमारशिराभारद्वाजः, शाकुन्तेयः, पूर्णाक्षमौद्गल्यः, हिरण्याक्ष-कौशिकः, वार्योविदः, निमिः, वडिशधाभार्गवः, भृगुः, कौशिकः, काप्यः, शौनकः, पुलस्त्यः, असितः, गौतमः, वडिशः, भद्रशौनकः, अङ्गिरा, अत्रिः, वसिष्ठः, कश्यपः, अगस्त्यः, वामदेवः, धन्वन्तरिः, कुशसांकृत्यायनः, पुनर्वस्वात्रेयः, मैत्रेयः, भारद्वाजश्चेत्यादयः।

मारीचकाश्यपोपदिष्टायां, तच्छिष्यवृद्धजीवकप्रणीतायां, तद्वंशोद्भूत-वात्स्यप्रतिसंस्कृतायाञ्च काश्यपसंहितायां निर्दिष्टा आयुर्वेदाचार्याः निम्नोट्टङ्किताः परिज्ञायन्ते। ते चामी—

दारुवाहः, भार्गवः, प्रमितिः, वार्योविदः, कृष्णोभारद्वाजः, हिरण्याक्षः, वैदेहोनिमिः (सूत्रस्थाने), धन्वन्तरिः (विमानस्थाने), गार्ग्यः, माठरः, आत्रेयपुनर्वसुः, पाराशर्यः, भेलः (सिद्धिस्थाने), वृद्धकाश्यपः, वैदेहोजनकः, कौत्सः (चिकित्सास्थाने), अनायासोयक्षश्च (कल्पस्थाने)।

'प्रयोजनञ्चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनमिति समाख्यापयन् तत्रभवान् चरकाचार्यः चरकसंहितायां प्रवर्हप्रयोजनद्वय-मायुर्वेदस्य स्वास्थ्यसंरक्षणं, रोगनिवारणञ्चेति प्रतिपादयति। तत्र तावत्स्वास्थ्यसंरक्षणसाधनत्वेन स्वस्थवृत्तस्य सद्वृत्तस्य च महत्त्वं प्राव-गम्यते। स्वस्थवृत्तं हि समुचिताऽहार-निद्रा-संयमनियमरूपेषु त्रिषुस्कन्धे-ष्वधिष्ठितं वैय्यक्तिकरूपेण दैनिकचर्या-ऋतुचर्याऽत्मकं समाम्नातमस्ति। सद्वृत्तंच देशकालसमाजाद्यनुकूलं, सुखशान्तियशः-सम्मानादिजनकं समाचाररूपं परिवर्णितं वरीवर्ति।

'रोगस्तु दोष वैषम्यं दोषसाम्यमरोगता' इति माधवकरवचनानु-सारेण पाञ्चभौतिकमानवशरीरगतवातपित्तकफात्मकत्रिदोषस्य वैषम्यं हि सकलविधान् गदान् समुत्पादयति। समुचितचिकित्सया समधिगतं विष-माणां त्रिदोषाणां साम्यं चिकित्सासिद्धान्तानामायुर्वेदीयानां चरमं परम-मुद्देश्यं प्रमीयते।

प्रज्ञापराधो विषमास्तथार्था हेतुस्तृतीयः परिणामकालः ।
सर्वाऽमयानां त्रिविधा च शान्तिर्ज्ञानार्थकालाः समयोगयुक्ताः ॥

(चरकसंहिता शा० २।४०)

इत्युक्तदिशा दोषवैषम्यमूलकानां समेषामामयानां जनकत्वं, बुद्धि-विभ्रम-अति-मिथ्याविषयसेवन-देशऋतुकालाद्यननुसारिवर्तनानां त्रयाणां समभिहितमभ्युपगम्यते। एषां रोगाणां दैवं-प्रारब्धमपि चतुर्थं कारणं करणत्वेन[1] सम्प्रतिपत्तुं योग्यं प्रतिभाति। एतेषां रोगकारणानां परिहार-पूर्वकं, ज्ञान-विषय-समय-समधिष्ठितं दोषत्रयस्य प्राकृतिकं साम्यं, समस्त-रोगाणामुपशमननिदानं भृशं प्रशस्यते। रोगभेदानां तत्कारणभेदानाञ्च-ज्ञानं, रोगलक्षणज्ञानं, समुचितौषध[2]प्रयोगज्ञानञ्चेति ज्ञानत्रयाव-लम्बिन्याश्चिकित्सायास्त्रैविध्यं सम्प्रतिपद्यते।

१. दैवव्यपाश्रया चिकित्सा—

इयं मणि-मन्त्र-तन्त्र-औषध-हवन-बल्युपहार-स्वस्तिवाचन-प्रायश्चित-उपवासादिभिः परिसाध्या भवति।

२. युक्तिव्यपाश्रया चिकित्सा—

एषा युक्ताहारविहारपथ्यौषधसेवनादिभिः सम्पद्यते।

३. सत्त्वावजया चिकित्सा—

असौ सर्वथाऽहितकरविषयेभ्यः मानसः पूर्णतया निवर्तनेन प्रभवति।

सत्सु विषमदोषेषु, वातपित्तकफेषु रोगाः सञ्चय-प्रकोप-प्रसार-स्थान-संश्रय-व्यक्तता-भेदस्पष्टरूपाभिरवस्थाभिर्विपरिणमन्ते। अमी रोगाः साध्य-

---

१. व्यापारवदसाधारणं कारणं करणमिति नैय्यायिकास्तार्किकाः।

२. सकलविधरोगप्रशामकस्वास्थ्यवर्धकौषधादीनामायुर्वेदोक्तानामन्तर्भवनं निम्नोट्टङ्कितेषु भैषज्यप्रकारेषु भवितुमर्हति। अमी प्रकाराः—चूर्ण-मोदक-वटिका-गुटिका-कूपीपक्वरस - भस्म-अवलेह-लेप-धूम्र - तैल-मधु-घृत-क्षार - अर्क-आसव-अरिष्ट-अभिषव-स्वरस-शीतकषाय-क्वाथ-कल्क-शृत-फाण्टादयः।

कष्टसाध्य-याप्य-असाध्यभेदेन प्रमुखतया चतुर्विधाः परिज्ञायन्ते ।[1] सामान्य विशेषभेदेनायुर्वेदे रोगाणां चिकित्सा द्वैविध्येन समाख्याताऽस्ति । तत्र सामान्यचिकित्सा युक्ताऽहारविहारैर्विहितपथ्यपालनैः समुचितौषधसेवनैश्च सम्पन्ना भवति । इयं रूक्षण-स्नेहन-स्तम्भन-स्वेदन-लङ्घन (शोधन)-बृंहण (शमन) भेदेन षड्विधा समाम्नाताऽस्ति । विशेषचिकित्सा च पञ्चकर्मचिकित्सेति नाम्ना व्यपदिश्यते । तत्र पञ्चकर्माणि, वमन-विरेचन-आस्थापन-अनुवासन-शिरोविरेचनानि प्रतिपादितानि विद्यन्ते ।

प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्चयद्भवेत् ।
समासतस्तदुभयं भूयोज्ञानविवर्धनम् ।। (सु० शा० ६)

आयुर्वेदीयचिकित्साशास्त्रं प्रत्यक्षविषयीभूतमानवशरीररचना (Anatomy) विषयकं, समस्तशरीरावयवाङ्गोपाङ्गकार्यकलापविषयकं च विवरणं वैशद्येन समुपस्थापयति । शल्यचिकित्साविवेचनप्रधानेषु सुश्रुत-संहिताऽदिग्रन्थेषु मानवशरीरविषयकं साङ्गोपाङ्गं विवेचनं विहितमुपलभ्यते । तदनुसारेण तावन्मानवशरीरं, त्वक् (Skin)-कला (Membrane)-पेशी (Muscle)-स्नायु (Ligament-Fibrous-Tissue)-सिरा (Vein)-धमनी (Artery)-रसायनी (Lymphatic Vessel)-नाडी (Nerve)-स्रोतस् (Tubes)-रक्त (Blood)-लसीका (Lymph)-वसा (Fat)-मेद (Myelin)-अस्थि (Bone)-शुक्र (Semen)-मस्तिष्क (Brain, Cerebrum)-अनुमस्तिष्क (Cerebellum)-सुषुम्नाशीर्षक (Medulla oblongata)-सुषुम्ना काण्ड (Medulla Spinalis)-फुफ्फुस (Lungs)-हृदय (Heart)-आमाशय (Abdomen)-अन्त्र-पक्वाशय (Intestines-Colon)-यकृत (Hepatis-Liver)-पित्ताशय (Gall bladder)-प्लीहा (Spleen)-अग्न्याशय-क्लोम (Pancreas)-वृक्क (Kidneys)-

---

१. चरकसुश्रुतादिग्रन्थप्रणेतॄणां समयतआरभ्य वैक्रमत्रयोदश शतकपर्यन्तं रोगाणां नैदानिकं परीक्षणं प्रयक्षानुमानशास्त्रवचनप्रमाणैर्भवति स्म । एतदनु यवनमोहम्मदीयानां शासनसमये शासकीयसम्पर्कप्रभावादिभिस्तेषां परीक्षणविश्लेषणादिकं नाडीगतिज्ञानेन, मलमूत्रादिपरीक्षणैश्च सम्पद्यते स्मेति शार्ङ्गधरपद्धत्यादिषु परवर्तिग्रन्थेषु विहितैर्विवरणैरवगम्यते ।

मूत्रस्रोतम् (Ureters)-बस्ति (Bladder)-गर्भाशय (Uterus)-बीजकोष (Ovaries)-बीजस्रोतस (Fallapian Tubes)-शिश्न (Penis)-मुष्क (Testicles)-कोष (Cells)-सप्तधातु (चर्म-मांस-मेद-मज्जा-स्नायु-अस्थि-शुक्र)-पञ्चज्ञानेन्द्रिय (कर्ण-नेत्र-त्वक्-घ्राण-रसना)-पञ्चकर्मेन्द्रिय (वाक्-पाणि-पाद-पायु-उपस्थ)-विविधग्रन्थिमर्मादीनां, अङ्ग-प्रत्यङ्गानां सम्यक्समुच्चयात्मकेन रूपेण परिवर्णितमभ्युपगच्छामः । इत्थं विधस्य मानवशरीरस्य सूक्ष्मतमाङ्गप्रत्यङ्गानां रचनाविषयकं प्रत्यक्षमविकलं ज्ञानं समेषां चिकित्सकानां, विशेषतया शल्यचिकित्सकानां कृते रोगप्रशमन-निवारणार्थमनिवार्यतयाऽवश्यकं वरीवर्ति ।

आयुर्वेदात्मकं चिकित्साशास्त्रं विषयभेदनाष्टाङ्गेषु विभक्तीकृतमस्ति । अमून्यङ्गानि तन्त्रात्मकानि निम्नोट्टङ्कितानि सन्ति ।

१. शल्यतन्त्रम्—

धन्वन्तरिणा[1] समुद्भाविते, सुश्रुताद्याचार्यैस्समुपबृंहितेऽस्मिन् शल्यतन्त्रे विशेषतया शल्यचिकित्सायाः सपरिकरं निरूपणं विहितमस्ति । एषा चिकित्सा, तृणकाष्ठकण्टकपाषाणपांशुलोहलोष्ठास्थिबालनखपूयस्राव-दूषितव्रणान्तर्गर्भशल्योद्धरणार्थं, यन्त्रशस्त्रक्षाराग्निप्रयोगैर्व्रणाद्युपशमनार्थं च कुशलशल्यचिकित्सकैः पूर्वं विधीयतेस्म । शरीरस्य स्थानविशेषोद्भूतानां विविधोपद्रवाणां अभिघात-सद्योघात (Injuries in general)-व्रण (Ulcer)-अर्बुद (Tumour, Papilloma, Sarcoma etc.)-विद्रधि (Abscess)-वंक्षण-फलकोषीयव्रघ्न (Various forms of orchitis, Hydrocele etc.)-अन्त्रवृद्धि (Hernia in general)-उदरात्यय (Abdominal Emergencies)-अन्त्रपुच्छशोथ (Appendicitis)-पायुरोग-अर्श-भगन्दर-भ्रंशादि (Piles, Haemorrhoids, Fistula and Prolapse anii)-आमाशय व्रण (Peptic ulcer) पक्वाशयिकविकृति (Defect of Duodenum)-अश्मरी (Calculi in general)-ष्ठीलाग्रन्थिवृद्धि (Enlargement of Prostate)-स्तनग्रीवाजिह्वाऽद्युत्सेध (Swellings of Breast-Neck-Tongue etc.)-अस्थिभङ्ग (Fractures in general)-अस्थिरोग (Dise-

---

१. धन्व-शल्य-शास्त्रं (तन्त्रं), तस्यान्तं-पारं, इयति-गच्छतीति धन्वन्तरिः ।

ases of Bones)-आदीनामुपशमनार्थं शल्यचिकित्सा (Oper ative Treatment) नूनं नितरां प्रशस्यते ।

शल्यकर्मसु प्रयुक्तानि यन्त्राणि तावत्सुश्रुतेन समाम्नातानि चैकोत्तर-शतसंख्याकानि भवन्तिस्म । तानि चेमानि-चतुर्विंशसंख्याकानि स्वस्तिक यन्त्राणि, सन्दंशयन्त्रे, तालयन्त्रे, विंशसंख्याकानि नाडीयन्त्राणि, अष्टा-विंश संख्याकानि शलाका यन्त्राणि, पञ्चविंश संख्याकान्युपयन्त्राणि चेत्थ-मेकोत्तरशतसंख्याकानि शल्ययन्त्राणि । सूत्रस्थाने शल्यकर्माणि ताव-दष्टविधानि प्रतिपादितानि सन्ति । तानि च-१. छेदनं, २ भेदनं, ३. लेखनं, ४. वेधनं, ५. ऐषणं, ६. आहरणं, ७. स्रावणं, ८. सीवनञ्च ।

२. शालाक्यतन्त्रम्—

तन्त्रस्यास्य प्रवर्तकौ निमिस्तच्छिष्यः करालश्चास्ताम् । सम्प्रति शालाक्यतन्त्रमधिकृत्याऽभ्यां प्रणीता ग्रन्थाः नोपलभ्यन्ते । अस्यतन्त्रस्य सिद्धान्तानां विवरणं सुश्रुतसंहितायां, अष्टाङ्गहृदयादिग्रन्थेषु चोपस्थापित-मवलोक्यते । तन्त्रेऽस्मिन् नेत्र-नासिका-कर्ण-मुख (दन्त-रसना-ग्रीवा-कण्ठ ओष्ठद्वय)-मस्तकादीनां सकलविधव्याधीनां तत्सम्बद्धोपद्रवादीनाञ्च परिवर्णनं तन्निवारकोपशामकचिकित्साविधानं शलाकोपयोगप्रधानञ्च विहितमभ्युपगम्यते । अस्यां शालाक्यचिकित्सायां यथाऽवश्यकं, यथोपयोगं चौषधसम्प्रयोगादिकं, शल्यकर्म चापेक्षितं भवतिस्म ।

तत्र तावत्सुश्रुतसंहितायां सुश्रुतेनाश्राविता नेत्ररोगाः वात-पित्त-कफ-रक्तान्यतमजन्याः, सर्वजन्याः, वाह्यकारणजन्याश्च षट्सप्ततिसंख्याकाः परिज्ञायन्ते । चरकाचार्येणतु स्वसंहितायां षष्णवति नेत्ररोगाः, अष्टा-विंशतिकर्णरोगाः, एकविंशन्नासिकारोगाः, एकादश शिरोरोगाः, पञ्चशष्टि-मुखरोगाश्च समाख्याताः सन्ति । दन्त-दन्तमूल-रसना-ओष्ठरोगाणां मुख-रोगेष्वेवान्तर्भावः कृतः प्रतिभाति ।

नेत्ररोगचिकित्सायां विशेषतया आश्च्योतन-अञ्जन-तर्पण-पुटपाक-बिडालकादीनां, शिरोरोगचिकित्सायां नस्य-प्रथमन-शिरोबस्त्यादीनां, नासिकारोगचिकित्सायां नस्य-धूम्रपानादीनां, कर्णरोगचिकित्सायां तैल-प्रधमनादीनाञ्च समुपयोगो हि रोगप्रशामकत्वेन संविहितोऽस्ति ।

३. कायचिकित्सातन्त्रम्—

भारद्वाज-आत्रेयपुनर्वसु-चरकादि ऋषिप्रवरैः प्रतिपादितेऽस्मिन् कायचिकित्सातन्त्रे मानवसर्वाङ्गसंसृतव्याधीनां विविधानां ज्वर-रक्तपित्त-अतिसार-पाण्डु-शूल-शोथ-त्वग्रोग-फिरङ्ग-प्रमेह-यक्ष्माऽदीनां सलक्षणादिकं विवरणं, तदुपशामकौषधचिकित्साविधानञ्च साङ्गोपाङ्गं विहितमुपलभ्यते। कायचिकित्सातन्त्रीयेषु समुपलब्धेषु ग्रन्थेषु चरक संहिता ग्रन्थः परवर्तिभिः कायचिकित्साविषयकग्रन्थपुणेतृभिः समुपजीव्यत्वेन समाद्रियमाणः प्रतनतरः शेखरायते। अस्मिन् प्रामुख्येण कायचिकित्साया अन्यासां चिकित्साविधानामानुषङ्गिकतया प्रतिपादनंकृतमस्ति। नैकविधानां रोगाणां निदान-पूर्वरूप-रूप-उपशय-सम्प्राप्तिविषयकं विज्ञानं रोगविनाशनप्रशमनादीनां निदानत्वेनास्मिन् तन्त्रे संविवृतमस्ति।

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्।
औषधान्नविहाराणामुपयोगः सुखावहः॥

इत्यनुसारेण हेतुव्याध्यन्यतरविपरीतानां, हेतुव्याध्युभयविपरीतानां, हेतुव्याध्यन्यतरविपरीतार्थकारिणां, हेतुव्याध्युभयविपरीतार्थकारिणाञ्चौषधआहार-विहारादीनां संविधानेनायुर्वेदोहि विषम-समचिकित्सयोः रोगोपशमन-स्वास्थ्यसंरक्षणक्षमयोर्भृशं महत्त्वं समाख्यापयति।

इत्थमायुर्वेदीयाष्टविधासु चिकित्सासु कायचिकित्सायाः क्षेत्रं विस्तृततरं प्रतिभाति। तन्त्रेऽस्मिन् परिगणिता व्याधयस्तदुपशमनार्थं चाङ्गीक्रियमाणा भैषज्यप्रयोगविधास्तदानुषङ्गिकपथ्यादिप्रकाराश्च बहुविधाः परिज्ञातुमतितरां समुपयुक्ता वरीवृतति।

४. भूतविद्यातन्त्रम्—

अथर्वऋषिप्रोद्भावितस्य भूतविद्यातन्त्रस्य ग्रन्थाः सम्प्रति स्वतन्त्रतया नोपलभ्यन्ते। अथर्ववेदे भूतविद्यायाः प्रासङ्गिकं विवरणं वरीवर्ति। ततऊर्ध्वं काश्यप संहिताया रेवतीकल्पाध्याये, भूतविज्ञानीय-भूतप्रतिषेधाध्याययोश्च भूतविद्यातन्त्रीयमानसिक गदनिदानचिकित्साऽदिविषयाणां निरूपणं वैशद्येन कृतं विद्यते। तन्त्रेऽस्मिन् रजस्तमोभ्यां समुत्पन्नानां बुद्धि-स्मृतिभ्रंशरूपप्रज्ञापराधफलकानां, उन्माद-अपस्मारादीनां, गन्धर्व-यक्ष-किन्नर-रक्षः-पितृ-पिशाच-नाग-ग्रहाद्यमानुषोपसर्गजन्यानां मानसिक-

रोगाणां (आधीनां) विवरणं, तदुपशामकदैवव्यपाश्रयचिकित्सायाश्च विधानं विहितेस्तः। तत्र मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाऽचाराणां विभ्रमोन्मादस्मृतिनाशापस्माराश्चास्मिन् समभिहिताः संविभाव्यन्ते।

एतासाममानुषीयतत्त्वोपसृष्टबुद्धिसमवेताऽधीनां प्रतीकारकोपशामकचिकित्सोपायेषु शान्तिकर्म-स्वस्तिवाचन-मणि-मन्त्र-तन्त्र-औषध-बलिहरण-प्रायश्चित्त-हवन-जप-ग्रहशान्ति-वास्तुशान्ति-अनुष्ठानादिविविधकार्यप्रपञ्चोहि भृशं विशिष्यते।

५. **कौमारभृत्यतन्त्रम्—**

महर्षिमारीचकश्यपोद्भाविते, प्रमुखतया वृद्धजीवकचरकादिप्रतिपादितेऽस्मिन् कौमारभृत्यतन्त्रे प्रावर्ह्येण गर्भगतभ्रूण-सद्योजात-अर्भक-शिशु-बाल-कुमारसाधारणानां सकलबालरोगाणामुपशमनक्षमचिकित्साविधानं (Pediotrics), तदानुषङ्गिकविधया स्त्रीरोगचिकित्सायाः संविधानं, योनिव्यापत्-तन्त्रस्य (Gynaecology) प्रसूतितन्त्रस्य (Maternity) च विशदं विवरणं समुपपन्नं भवति। काश्यपसंहितायां, चरकसंहितायाः जातिसूत्राध्याये चेमं विषयमधिकृत्य सविस्तरं निरूपणमुपलभ्यते। अस्य तन्त्रस्याधिकारोहि गर्भधारणसमयादारभ्य कुमारोपनयनसमयं यावत् भ्रूणस्यान्तर्वर्त्न्याश्च स्वास्थ्य-पोषण-नैरुज्य-सुखप्रसव-सूतिकारोगपरिहार-मातृधात्रीस्तन्य-शोधन-कुक्कुण-विसर्प-मसूरिका-विस्कोट-पामा-चर्मदल-फक्क-दन्तोद्भवोपद्रव-अक्षिरोग-अजगल्लिकाऽदि बालरोगोपशामकनिवारकौषधादिचिकित्सादिकं सपरिकरं समधिकृत्य प्रवर्तते। अपि च काश्यपसंहितायाः रेवतीकल्पाध्याये, भूम्ना रावणप्रणीत-बालकुमारतन्त्रे[1] (दशग्रीवबालतन्त्रे) विविधानामभौतिकबालोपद्रवादीनां समुद्भाविकानां नन्दा-सुनन्दा-पूतना-मुखमण्डिका-कटपूतना-शकुनिका-शुश्करेवती-अर्यका-सूतिका-निर्ऋतिका-पिलिपिच्छिका-कामुकेति द्वादशमातृकाणां, जातहारिष्याद्यानां, बालग्रहस्कन्दादीनाञ्च बाधाप्रशमनार्थं विहितानां शान्तिकर्म-स्वस्तिवाचन-षष्ठीपूजन-ग्रहशान्ति-अनुष्ठान-आदीनां संविधानं समुपलभ्यते।

---

१. अस्य तन्त्रस्य विवरणं (Bibliotheque Nationale, Paris) नामकग्रन्थे समुपलभ्यते। दशग्रीव बालतन्त्रस्यानुवादः वैक्रमे सप्तमशतके चीनीभाषायां सम्पन्नः प्रकाशितश्चानुश्रूयते।

६. अगदतन्त्रम्—

काश्यप-औषनस-आलम्बायन-आस्तिक-आदि ऋषिप्रवरैः प्रोद्भावितेऽस्मिन् तन्त्रे सकलविधानां विषजन्यव्याधीनां, तदुपशामकौषध-प्रयोगात्मकचिकित्साविधानां सविस्तरं विवरणं समुपलभ्यते। व्याधिजनकं विषमिदं स्थावर-जङ्गमभेदेन द्विविधं निगदितमस्ति। खनिजविषाणि सकलानि स्थावराणि परिज्ञायन्ते। जङ्गमविषाणि तु सर्प-वृश्चिक-शतपदी-गोधा-कीट - लूता - मक्षिका - मूषक - हिंस्रश्वापद - अलर्कादिदंशजन्यानि भवन्ति। जङ्गमविषसंसर्गोहि यथा विशेषतया सन्दंशनेन भवति, तथा स्थावरविषाणामुपसर्गोहि भक्ष्य-पेय-वस्त्र-आभूषण-माल्य-तैल-अञ्जन-शृङ्गारसाधन-शयनपर्यङ्क-पादत्राण-स्नानजल-चन्दन - अनुलेपन - सूचोवेध-विषकन्याऽदिभिर्विषसम्पृक्तकारणैर्भवितुमर्हतीतिकृत्वा सामान्यमानवानां, विशेषतया राज्ञां, राजपुरुषाणां, राजदूतानां, सैनिकादीनाञ्च कृते-प्रागुल्लिखितानां समुपभोग्यपदार्थानां परिसेवनं, सम्प्रयोगः, संग्रहश्च तान् पदार्थान् परिसूक्ष्मतया सम्परीक्ष्यैव विधेय इत्यगदतन्त्रज्ञाः काश्यप-औषनस-लाट्यायन-आलम्बायन-दारुवाह–आस्तिक-चरक-सुश्रुत - आदयस्तैः प्रणीतेषु चिकित्साग्रन्थेषु, समुद्धरणेषु च समादिशन्ति। तथा च महामति-राजनीतिज्ञो विष्णुगुप्तः कौटिल्योऽपि स्वप्रणीतार्थशास्त्रे तावदगद-प्रयोग-ज्ञातृविषज्ञपुरुष-वह्नि-पशु-पक्ष्यादीनां विषपरीक्षणसाधनत्वेन भृशं महत्त्वं समुपादेयत्वञ्च समाशंसति।

तन्त्रेऽस्मिन् विषाणां मरणकारणगुणधर्माः, लघुत्व-रूक्षत्व-आशुत्व-विशदत्व-व्यवायित्व-तीक्ष्णत्व-विकासित्व-सूक्ष्मत्व-उष्णत्व- अनिर्देश्यरसव–त्वेति दशसंख्याकाः समभिहिताः सन्ति।

७. रसायनतन्त्रम्—

वसिष्ठ-अगस्त्य-माण्डव्य-कपिञ्जलप्रभृतिऋषिभिः समुद्भावितेऽस्मिन् तन्त्रे मानवानामायुर्वर्द्धक-स्वास्थ्यरक्षक-बलप्रदायक-जरानिवारक-व्याधि-नाशक-रसायनानां समुपयोगो हि चिकित्सारूपेण संविहितोऽस्ति। आयु-र्वेदीय चरकसंहिता सुश्रुतसंहिता-अष्टाङ्गसंग्रह-अष्टाङ्गहृदय-काश्यपसंहिता ऽदिग्रन्थेषु प्रायोगिकविधया रसायनं द्विविधं समभिधीयते। (१) समा-चाररूपं, (२) भैषज्यरूपञ्च। तत्र समाचाररूपेषु रसायनेषु युक्ताहार-

विहारापथ्यवर्जनसंयमनियममनःसत्त्वादिस्वस्थवृतं, सद्वृत्तञ्चान्तर्भवतः। भैषज्यरूपं रसायनं, आमलक-हरीतकी-पिप्पली-भल्लातक-शिलाजतु-वचा-कञ्चुकी-कुक्कुटी-ताप्य-गुग्गुलु-लशुन-पलाण्डुकल्परूपं, सोमरसादिकञ्च पाञ्चभौतिकमानवशरीरगतसप्तधातूनां परिपोषकं, स्मृति-मेधा-बुद्धि-प्रतिभा-प्रकर्षजनकं, स्वान्तस्य सत्त्वगुणोद्रेकसाधनं, व्याधिविध्वंसकं, आयुर्वर्धकं, जरानिवारकञ्च, सर्वदासेवनीयत्वेनातितरां महत्त्वं समावहतः।

तत्र तावद्रसायनतन्त्राङ्गभूतं रसशास्त्रं वैक्रम षष्ठ शतकादूर्ध्वं विविध-सिद्धैर्नाथैश्च समुपबृंहितमभूत्। तदनुप्रेरितैः नागार्जुन-वृन्दपण्डित-सोम-देव-गोपालकृष्ण-यशोधर-गोविन्दाचार्यसिद्धनित्यनाथ-वाग्भट (अपर)-जय-देव-रामरायादिपरवर्तिभिः रसशास्त्रज्ञैरनेकविधग्रन्थरत्नैरस्य शास्त्रस्य परिमण्डनं संव्यधायि। शास्त्रेऽस्मिन् परिशुद्धसिद्धस्वर्णपारदादिधातूनां, तद्योगादीनाञ्चायुर्वर्द्धकत्वेन परमौषधत्वविधानं सम्प्रतिपत्तौ, सम्प्रयोगे च नितरां विशिष्यते।

८. वाजीकरणतन्त्रम्—

महर्षिभरद्वाजेन समुद्भावितं, कश्यप-चरककुचुमारादिमनीषिभिरन्वा-ख्यातमिदं वाजीकरणतन्त्रं स्वजातिसंरक्षकसन्तानसम्प्राप्त्युपायादीनां मान-वजीवने महत्त्वं प्रतिपादयति। तदर्थं, तदनुकूलाया वाजीकरणचिकित्साया विधानमस्यतन्त्रस्य प्रवहं प्रयोजनं प्रतिभाति। सन्तानसाधनान्यतमस्य पौरुषस्यप्रतिबन्धकानां सकलविधक्लैब्यरोगाणां, विविधप्रमेहाणां, समस्त-रतिजफिरङ्गादिरोगाणाञ्च सविस्तरं विवरणं तन्त्रेऽस्मिन्नुपलभ्यते। उक्त-समस्तव्याधीनां समुपशमनार्थं चिकित्साविधानं अदस्तन्त्रं सपरिकरं विवृणोति। सकलशुक्रदोषनाशकं, शुक्रशोधकवर्धक-स्तम्भकखनिजवानस्प-त्यादिजीवनगणीयौषधादिभिः परिसम्पद्यमानमिदं वाजीकरणमस्मिन् भूम्ना परिवर्णितं विवेचितञ्चाभ्युपगम्यते। वाजीकरणचिकित्सया तन्त्रमिदं न केवलं पुरुषाणां शारीरिकरतिशक्तिविवर्धनमपितु तदनुकूलं चित्तस्वास्थ्य-सम्पादनमपि पूर्णत्वेन विदधाति। एतावताऽपीदं तन्त्रं जितेन्द्रियत्व-ब्रह्म-चर्यादिमहाव्रतानां सिद्धान्तैः समं न विसंवदतीति महानियानस्य विशेषः प्रतिभाति।

आयुर्वेदीयाः कतिपये प्रतनाः संहिता-तन्त्रग्रन्थाः सम्प्रति समुपलब्धा अनुपलब्धा वा निम्नोट्टङ्किताः परिश्रूयन्ते ।

शल्यतन्त्रग्रन्थाः—

औपधेनवतन्त्रं, औरभ्रतन्त्रं, बृहत्सुश्रुततन्त्रं, सुश्रुततन्त्रं, पौष्कलावततन्त्रं, वैतरणतन्त्रं, वृद्धभोजतन्त्रं, भोजतन्त्रं, कृतवीर्यतन्त्रं, करवीर्यतन्त्रं, गोपुररक्षिततन्त्रं, भालुकितन्त्रं, कपिलबलतन्त्रं, सुभूतिगौतमतन्त्रञ्च ।

शालाक्यतन्त्रग्रन्थाः—

निमितन्त्रं, विदेहतन्त्रं, काङ्कायनतन्त्रं, गार्ग्यतत्रं, गालवतन्त्रं, सात्यकितन्त्रं, भद्रशौनकतन्त्रं, शौनकतन्त्रं करालतन्त्रं, चक्षुष्यतन्त्रं, कृष्णात्रेयतन्त्रं, कात्यायनतन्त्रञ्च ।

कायचिकित्सातन्त्रग्रन्थाः—

भारद्वाजसंहिता, आत्रेयसंहिता, विश्वामित्रसंहिता, अत्रिसंहिता, मार्कण्डेयसंहिता, अग्निवेशसंहिता, भेलसंहिता, जतुकर्णसंहिता, पराशरसंहिता, हारीतसंहिता, क्षारपाणिसंहिता, खरनादसंहिता, अरीन्द्रसंहिता, आश्वीनसंहिता, भानुपुत्रसंहिता च ।

भूतविद्यातन्त्रग्रन्थाः—

अथर्वतन्त्रं, चरक-काश्यप-सुश्रुतसंहिताऽदिग्रंथान्तर्गत-विशिष्टस्थानानि, महामायूरीतन्त्रं, भूतविद्यातन्त्रञ्च ।

कौमारभृत्यतन्त्रग्रन्थाः—

वृद्धकाश्यपसंहिता, काश्यपसंहिता (वृद्धजीवकतन्त्रं), सनकसंहिता, उशनःसंहिता, बृहस्पतिसंहिता, दशग्रीवबालतन्त्रं, पार्वतककुमारतन्त्रं, बन्धकतन्त्रञ्च ।

अगदतन्त्रग्रन्थाः—

काश्यपसंहिता, उशनः संहिता, बृहस्पतिसंहिता, लाट्यायनसंहिता, आलम्बायनसंहिता, दारुवाहसंहिता (तन्त्रं), आस्तिकतन्त्रं, तार्क्ष्यतन्त्रं, अगदराजतन्त्रं, विषतन्त्रञ्च ।

रसायनतन्त्रग्रन्थाः--

पातञ्जलतन्त्रं, वसिष्ठतन्त्रं, व्याडितन्त्रं, माण्डव्यतन्त्रं, नागार्जुनतन्त्रं, अगस्त्यतन्त्रं, भृगुतन्त्रं, कपिञ्जलतन्त्रं, कक्षपुटतन्त्रं, आरोग्यमञ्जरीतन्त्रञ्च ।

वाजीकरणतन्त्रग्रन्थाः--

चरकसंहिता (वाजीकरणस्थानं), कुचुमारतन्त्रं, आयुर्वेदीयग्रन्थान्तर्गतानि वाजीकरणस्थानानि च ।

भारतीयसकलचिकित्साविधानामन्वाख्यापकस्यायुर्वेदस्य पुरातनत्वं निःसन्दिग्धतया निर्णीतमस्ति । धन्वन्तरि-निमि-भारद्वाज-अथर्व-वसिष्ठ-कश्यप-अगस्ति-आत्रेय-आदि ऋषिभिः समुद्भावितस्यास्य प्रतनत्वं मौलिकत्वञ्च न केवलोपवेदत्वेनापितु भूस्तर-पुरातत्त्व-भाषाशास्त्रादीनां (Geology, Archaeology, Philology etc.) सोपपत्तिकैस्तर्कमूलकसिद्धान्तैः संसिध्यतीत्यत्र विषये प्राचीनार्वाचीनानां, पाश्चात्यापाश्चात्यविपश्चितां न काऽपि संशीतिर्वरीवर्ति । इत्थं चायुर्वेदस्य प्रोद्भावनं, तदीयचिकित्सासिद्धान्तानामन्वाख्यानञ्च विक्रमपूर्वीयद्विसहस्रवर्षेभ्यः प्रागेवाभूदिति भाति । ऐतिहासिक-भौगोलिक (Historical and Geographical) तथ्यान्वेषणैः, पक्षपातदुराग्रहादिदोषविरहितस्वान्तैरितिहासविशेषज्ञैरायुर्वेदीयचिकित्सापद्धतेः असीरिया-बेबीलोनिया-अरेबिया-पर्शिया-इजिप्त-ग्रीस-आदिदेशेषु क्रैस्तपूर्वशतकेषु समुद्भूत-विकसितचिकित्सापद्धत्यपेक्षया प्राक्तनत्वं निश्चीयते ।

क्रिस्तपूर्वसमयसमुद्भूतैः, चिकित्सासिद्धान्ताविष्कारकैः ग्रीकभिषग्वरैः डेमोकेडिस (Demokedes. 6th Cent. B.C.)-डेमोक्रेट्स (Democretes, 6th Cent B.C.) स्टेसियस (Ctesias, 6th Cent. B.C.)-अपोलोनिडस (Apollonides, 6th Cent. B.C.) थियोफ्रेस्ट्स (Theophrastus, 6th Cent. B.C.)-हेराक्लीडस (Heraclides 5th Cent. B.C.)-हेरोडिकस (Herodicus. 5th Cent. B.C.)-हिपोक्रेटिस (Hippocretes, 5th Cent. B.C.)-यूडाक्सस (Eudoxas, 4th Cent B.C.)-आदिभिः प्रोद्भावितानां पञ्चमहाभूत-त्रिदोष-रोगनिदान भैषज्यप्रयोगविषयकचिकित्सासिद्धान्तानां भारतीया-

(वै० १३ श०), चिकित्सामृतम्-मिल्हणः (वै० १३ श०), शाङ्गर्धरसंहिता-शार्ङ्गधरः (वै० १३ श०), रसेन्द्रसारसंग्रहः-गोपालकृष्णभट्टः (वै० १४ श०), कण्ठप्रकाशः, वैद्यचिन्तामणिश्च-नारायणभट्टः (वै० १४ श०), रसप्रकाशसुधाकरः-यशोधरः (वै० १४ श०), रससारः-गोविन्दाचार्यः (वै० १४ श०), रसेन्द्रचिन्तामणिः-ढुण्ढिनाथः (रामचन्द्रः) (वै० १४ श०), रसरत्नाकरः, रसरत्नमाला, योगसारः, कामरत्नञ्च-सिद्ध-नित्यनाथः (वै० १४ श०), रसेन्द्रकल्पद्रुमः-अज्ञातः (वै० १४ श०), शब्दार्थचन्द्रिका, गुण-पाठः, रसरत्नसमुच्चयश्च-वाग्भटः (अपरः) (वै० १४ श०), आयुर्वेदप्रकाशः, रसेश्वरदर्शनञ्च-माधवाचार्यः (वै० १४ श०), लौहप्रदीपकारकम्-त्रिविक्रमदेवभट्टः (वै० १४ श०), वैद्य-वल्लभः, ज्वरत्रिशतीच-शार्ङ्गधरः (अपरः) (वै० १५ श०), हिकमत-प्रकाशः-महादेवपण्डितः (वै० १५ श०), रसकल्पद्रुमः, रसामृतञ्च-जयदेव-कविराजः (वै० १५ श०), रसराजलक्ष्मीः-रामेश्वरभट्टः (वै० १५ श०), धातुरत्नमाला-देवदत्तः (वै० १५ श०), वीरसिंहावलोकनं, सारग्राहक-कर्मविपाकश्च-तोमरवीरसिंहः (वै० १५ श०), वैद्यसारसंग्रहः-गंगादास-सूरिः (वै० १५ श०), रसभारः, सन्निपातमञ्जरीच-गोविन्दाचार्यः (वै० १५ श०), चिकित्सापरिभाषा, वैद्यवल्लभस्य सिद्धान्त-सञ्चयटीका, ज्वरत्रिशतीटीकाच-नारायणदासः कविराजः (वै० १५ श०), सन्निपात कलिका-रुद्रधरभट्टः (वै० १५ श०), पथ्यापथ्यविनिश्चयः, चक्रदत्तस्य सारसंग्रहटीका च-विश्वनाथसेनः (वै० १५ श०), रत्नसमुच्चयस्य सरलार्थप्रकाशिनी टीका—खरेचिन्तामणिशास्त्री (वै० १५ श०), रसप्रदीपः, रसदर्पणः, बृहद्योगतरङ्गिणी, द्रव्यगुणशतश्लोकीच-त्रिमल्लभट्टः (वै० १६ श०), ज्वरतिमिरभास्करः, रससंकेतकलिकाच-चामुण्डा-पण्डितः (वै० १६ श०), रसकल्पलता, चिकित्साक्रमवल्ली, अजीर्ण-मञ्जरी च-काशीनाथद्विवेदः (वै० १६ श०), रसपद्धतिः-भिषग्वर-बिन्दुः (वै० १६ श०), रसनक्षत्रमालिका-मथानसिंहः (वै० १६ श०), रसकौमुदी-ज्ञानचन्द्रशर्मा (वै० १६ श०), रसरत्नप्रदीपः, रसदीपिका, नाडीपरीक्षा च-रामरायः (वै० १६ श०), रसेन्द्रकल्पद्रुमः, वैद्यरत्नाकर-टीका च—रामकृष्णभट्टः (वै० १६ श०), लक्ष्मणप्रकाशः-हेमाद्रिः (अपरः) (वै० १६ श०), आयुर्वेदसूत्रम्-योगानन्दनाथः (वै० १६ श०), शिशुरक्षारत्नम्-पृथ्वीमल्लः (वै० १६ श०), नाडीपरीक्षा, कुमारतन्त्रं, अर्कप्रकाशः, बालचिकित्साच-रावणवैद्यः (अपरः) (वै० १६ श०),

बालतन्त्रम् (काकचण्डीश्वरतन्त्रम्)-कल्याणवर्मा (वै० १७ श०), स्त्रीविलासः (स्त्रीरोगचिकित्सा)—वैद्यदेवेश्वरः (वै० १७ श०), वैद्यामृतम्-मोरेश्वरभट्टः (वै० १७ श०), भावप्रकाशः, गुणरत्नमालाच-भावमिश्रः (वै० १७ श०), टोडरानन्दः-टोडरमल्लः (वै० १७ श०), योगचिन्तामणिः-हर्षकीर्तिसूरिः (वै० १७ श०), वैद्यजीवनम्, वैद्यावतंसश्च-लोलिम्बराजः (वै० १७ श०), योग संग्रहः, सुखबोधश्च-जगन्नाथः (वै० १७ श०), कनकसिंह प्रकाशनम्-रामकृष्णवैद्यः (वै० १७ श०), रसचिन्तामणिः, रसरत्नाकरः, रसपारिजातश्च-रामचन्द्रदासगुहः (वै० १७ श०), जीवकतन्त्रम्-शुभचन्द्रः (वै० १७ श०), रत्नावली, प्रयोगरत्नाकरश्च-कविकण्ठहरः (वै० १७ श०), प्रयोगचिन्तामणिः-राममाणिक्यसेनः (वै० १७ श०), वैद्यरहस्यपद्धतिः-वंशीधरः (वै० १७ श०), चिकित्सारत्नावली-कविचन्द्रः (वै० १८ श०), चिकित्सामञ्जरी, वैद्यविलासश्च-रघुनाथपण्डितः (वै० १८ श०), चिकित्साऽञ्जनं, वैद्यरहस्यं, वैद्यकुतूहलश्च-विद्यापतिः (वै० १८ श०), लौहसर्वस्वं, लौहपद्धतिश्च-सुरेश्वरः (वै० १८ श०), योगरत्नाकरः, वैद्यवृन्दः, वैद्यामृतं, ज्वरनिर्णयः, ज्वरत्रिशतीटीका च-नारायणशेखरः जैनः (वै० १८ श०), रत्नकौमुदी, सारकौमुदी च-भरतमल्लिकः (वै० १८ श०), प्रयोगामृतं-चिन्तामणिवैद्यः (वै० १८ श०), प्रयोगचिन्तामणिः, कूटमुद्गरः, आयुर्वेदप्रकाशः, पाकावली, अर्कप्रकाशश्च-माधवोपाध्यायः (वै० १८ श०), निदानप्रदीपः-नागनाथः (वै० १८ श०), सारकौमुदी-आनन्दवर्मा (वै० १८ श०), वैद्यमनोत्सवः-नयनसुखः (वै० १८ श०), वैद्यवल्लभः-कविहस्तिरुचिः (वै० १८ श०), वैद्यविनोदः-शंकरभट्टः (वै० १८ श०), कल्पद्रुमसारः-जयरामः (वै० १८ श०), आन्तकतिमिरभास्करः-बलरामः (वै० १८ श०), रत्नमाला, पर्यायमाला द्रव्यगुणः, राजवल्लभश्च-राजवल्लभः (वै० १८ श०), धातुरत्नमाला-देवदत्तः (वै० १८ श०), शारीरपद्मिनी-भास्करभट्टः (वै० १८ श०), शिवकोशः-कर्पूरीयशिवदत्त (वै० १८ श०), राजवल्लभीयद्रव्यगुणाः-नारायणभट्टः (वै० १९ श०), वैद्यकशब्दसिन्धुः-उमेशचन्द्रगुप्तः (वै० १९ श०), आयुर्वेदीयद्रव्याभिधानम्-कुञ्जविहारिलालसेनगुप्तः (वै० १९ श०), अञ्जननिदानम्-अञ्जनाचार्यः (वै० १९ श०), गूढ़प्रकाशिका (उपाकरसारः)-दिनकरः (वै० १९ श०), चिकित्सासागरः-वटेश्वरः (वै० १९

श०), पारदकल्पद्रुमः-अनन्तः (वै० १९ श०), वैद्यकसारसंग्रहः-श्रीकान्तशम्भुः (वै०१९श०), आग्नेयायुर्वेदभाष्यं, भैषज्यरामायणं, मृत्युञ्जयसंहिता, प्रयोगचन्द्रोदयः, भास्करोदयः, राजवल्लभीयद्रव्यगुणविवृतिः आयुर्वेदसंग्रहः, नाडीपरीक्षा, परिभाषा, आरोग्यस्तोत्रञ्च-गंगाधरकविराजः (वै० १९-२० श०), दिव्यरसेन्द्रसारः-धनपतिः (वै० १९-२० श०), प्रयोगामृतं, मधुमती, राजवल्लभीयगुणधर्मटीका च-नारायणदासः (वै० १९-२० श०), भैषज्यरत्नावली-गोविन्ददासः (वै० २० श०), प्रत्यक्षशारीरं, सिद्धांतनिदानञ्च-कविराजगणनाथसेनः (वै० २० श०), रसतरङ्गिणी-सदानन्दघिल्डियालः (वै० २० श०), अभिनवप्रसूतितन्त्रम्-दामोदरशर्मा (वै० २०श०), भैषज्वरत्नावली-विनोदलालसेनः (वै० २० श०), निघण्टुरत्नाकरः-गणेशशास्त्रिदातारः (वै० २० श०), रसायनसारः-श्यामसुन्दराचार्यः (वै० २० श०), सिद्धयोगसंग्रहः, रसामृतं, द्रव्यगुणविज्ञानञ्च-यादवजीत्रिकमीजीवैद्यः (वै० २० श०), रसयोगसारः-हरिप्रपन्नवैद्यसङ्कलकः (वै० २० श०), त्रिदोषसिद्धान्तः, पञ्चमहाभूतविज्ञानञ्च-उपेन्द्रनाथः (वै० २० श०), शारीरविनिश्चयः-ज्यौतिषचन्द्रः (वै० २०श०), स्त्रीरोगविज्ञानं, शालाक्यतन्त्रं, सौश्रुतिः, प्रसूतितन्त्रञ्च-रामनाथद्विवेदः (वै० २० श०), द्रव्यगुणविज्ञानम्-प्रियव्रतशर्मा (वै० २० श०), शल्यतन्त्रसमुच्चयः-वामदेवमिश्रः (वै० २० श०), कौमारभृत्यम्-रघुवीरप्रसादद्विवेदः (वै० २० श०), बृहन्निघण्टुरत्नाकरः-दत्ताराम-चतुर्वेदः (वै० २० श०), स्वस्थवृत्तसमुच्चयः, चिकित्साऽदर्शश्च-राजेश्वरदत्तशास्त्री (वै० २० श०), क्रियाशारीरम्-रणजितरायः (वै० २० श०) शरीरतत्त्वदर्शनम्-हिर्लेकरः (वै० २०श०), वनस्पतिचन्द्रोदयः-चन्द्रराजभण्डारी (वै० २० श०), पदार्थविज्ञानम्-रामरक्षपाठकः (वै० २० श०) अभिनवनेत्रचिकित्साविज्ञानं, प्रत्यक्षौषधिनिर्माणञ्च-विश्वनाथद्विवेदः (वै० २० श०), चिकित्साप्रदीपः-गोखलेविश्वनाथशास्त्री (वै० २१ श०), पदार्थविज्ञानम्-काशीकरः (वै० २१ श०), व्यवहारायुर्वेदः, विषविज्ञानञ्च-युगलकिशोरगुप्तः (वै० २१ श०) चेत्यादयः ।

चरकसंहितायाः प्रमुखाः टीकाः—

चरकन्यासः-भट्टारहरिश्चन्द्रः (वै० ५ श०), निरन्तरपदव्याख्या-जैज्जटः (वाग्भटशिष्यः) (वै० ५-६ श०), चरकपञ्जिका-स्वामिकुमारः

(वै० १० श०), आयुर्वेददीपिका-चक्रपाणिदत्तः (वै० १२ श०), तत्त्वप्रकाशिका-शिवदाससेनः (वै० १६श०), जल्पकल्पतरुः-गंगाधरकविराजः (वै० १९-२० श०), चरकोपस्कार-योगीन्द्रनाथसेनः (वै० २० श०) चेत्याद्याः ।

सुश्रुतसंहितायाः टीकाः—

सुश्रुतटीका-जैज्जटः (वै० ५-६ श०), सुश्रुतव्याख्या-कार्तिककुण्डः (वै० १० श०), सुश्रुतव्याख्या-सुवीराचार्यः (वै० ११ श०), सुश्रुतपञ्जिका-भास्करभट्टः (वै० ११ श०), बृहत्पञ्जिका-गयदासः (वै० ११ श०), सुश्रुतव्याख्या-ब्रह्मदेवः (वै० ११ श०) भानुमतीटीका-चक्रपाणिदत्तः (वै० १२श०), सुश्रुतटीका-गंगाधरसेनः (वै० १२श०), निबन्धसंग्रहटीका-डल्हणः (वै० १३ श०), सुश्रुतव्याख्या-गयीसेनः (वै० १३ श०), सन्दीपनभाष्यम्-हारायणचन्द्रः (वै० २० श०) इत्याद्याः ।

अष्टाङ्गसंग्रहस्य टीकाः--

अष्टाङ्गसंग्रहटीका-जैज्जटः (वै० ५-६ श०), शशिलेखाव्याख्या-इन्दुभट्टः (वै० ६ श०) च ।

अष्टाङ्गहृदयस्य व्याख्याः—

अष्टाङ्गहृदयव्याख्या-जैज्जटः (वै० ५-६ श०), पदार्थचन्द्रिका-चन्द्रनन्दनः (वै० ११ श०), उद्योतटीका-आशाधरजैनः (वै० १३ श०), सर्वाङ्ग सुन्दरटीका-अरुणदत्तः (वै० १३ श०), आयुर्वेदरसायनम्-हेमाद्रिः (वै० १३ श०), तत्त्वबोधटीका-शिवदाससेनः (वै० १६ श०), अष्टाङ्गहृदयव्याख्या-रामनाथः, अष्टाङ्गहृदयदीपिका, हाटकाङ्कः, वाग्भटखण्डनमण्डनञ्च-भट्टनरहरिः सङ्केतमञ्जरी-दामोदरः, अष्टाङ्गहृदयव्याख्या-टोडरमलः, पाञ्चाटीका-अज्ञातः, हृदयप्रबोधिका-अज्ञातः, बालप्रबोधिका-अज्ञातश्चेत्याद्याः[1] ।

---

१. भिषग्वरहरिशास्त्रिपराडकरमहोदयस्याभिमतानुसारेण, अष्टाङ्गहृदयस्य (लघुवाग्भटस्य) विविधासु भाषासु प्रणिबद्धाश्चतुस्त्रिंशत्संख्याका व्याख्याटीकाविवरणटिप्पण्य आसन्नितिश्रूयते ।

माधवनिदानस्य टीकाः—

मधुकोशव्याख्या–विजयरक्षित-श्रीकण्ठौ (वै० १४ श०), आतङ्क-दर्पणः–वाचस्पतिवैद्यः (वै० १५ श०) च।

सिद्धयोगस्य व्याख्या—

कुसुमावली–श्रीकण्ठः (वै० १४ श०)।

चिकित्सासारसंग्रहस्य (चक्रदत्तस्य) टीका—

रत्नप्रभा–निश्चलः (वै० १३ श०)।

द्रव्यगुणसंग्रहस्य व्याख्या—

तत्त्वचन्द्रिका–शिवदाससेनः (वै० १६ श०)।

शार्ङ्गधरसंहितायाः टीकाः—

दीपिका–आढमल्लः (वै० १४ श०), गूढान्तदीपिका–रुद्रधरभट्टः (वै० १५ श०), गूढार्थदीपिका–काशीरामः (वै० १६ श०) च।

आयुर्वेदीयाः प्रमुखाः निघण्टवः—

दाल्भ्यनिघण्टुः-दाल्भ्यऋषिः (वि० पू० १००० व० पू०), धन्वन्तरीय-निघण्टुः-अज्ञातः (वै० ५ श०), पर्यायरत्नमाला-माधवकरः (वै० ८ श०) वैद्यकोशः, शब्दचन्द्रिका च-चक्रपाणिदत्तः (वै० ११ श०), गणनिघण्टुः-चन्द्र नंदनः (वै० ११ श०), शब्दप्रदीपः-सूरपालः (वै० १२ श०), निघण्टु-शेषः-हेमचन्द्रः (वै० १२ श०), गुणसंग्रहनिघण्टुः-सोढलः (वै० १३ श०), शब्दकोशः-अरुणदत्तः (वै० १३ श०), अभिधानरत्नमाला-मल्लिनाथः (वै० १३ श०), शेषराजनिघण्टुः-शेषराजः (वै० १४ श०), सिद्धमन्त्र-निघण्टुः-वैद्यकेशवः (वै० १४ श०), हृदयदीपनिघण्टुः-बोपदेवः (वै० १४ श०), तन्त्रकोशः-नित्यनाथः (वै० १४ श०), पथ्यापथ्यनिघण्टुः-विश्वनाथकविराजः (वै० १४ श०) मदनविनोदनिघण्टुः मदनपालः (वै० १५ श०), राजनिघण्टुः (अभिधान चूडामणिः)–नरहरिः (वै० १५ श०), पथ्यापथ्यनिघण्टुः-विश्वनाथसेनः (वै० १५-१६ श०) द्रव्यरत्नाकरनिघण्टुः-मुद्गलः (अपरः) (वै० १६ श०), रत्नप्रदीप-निघण्टुः-काशीरामः (वै० १६ श०), द्रव्यगुणशतश्लोकीनिघण्टुः-त्रिमल्ल-भट्टः (वै० १६ श०), भावप्रकाशनिघण्टुः-भावमिश्रः (वै० १७ श०)

दक्षिणामूर्तिनिघण्टुः-वेङ्कटेश्वरः (वै० १७ श०), वैद्यामृतनिघण्टुः-मोरेश्वरभट्टः (वै० १७ श०), शिवप्रकाशनिघण्टुः (शिवकोशः) शिवदत्तः (वै० १८ श०), पथ्यापथ्यविबोधकनिघण्टुः-कैयदेवः (वै० १८ श०), वनस्पति चन्द्रोदयनिघण्टुः-शेषनारायणः (वै० १८ श०), पर्यायरत्नमाला-राजवल्लभः (वै० १८ श०), पर्यायमुक्तावली-हेमचन्द्रसेनः (वै० १८ श०), द्रव्यमुक्तावली, पर्यायार्णवश्च-नीलकण्ठमिश्रः (वै० १८ श०), पथ्यापथ्यनिघण्टुः-कविश्रीमुखः (वै० १८ श०), आन्तकतिमिरभास्करः-बलरामवैद्यः (वै० १८ श०), आयुर्वेदीयद्रव्याभिधानम्-कुञ्जविहारिलालः (वै० १९ श०), वैद्यकशब्दसिन्धुः-उमेशचन्द्रगुप्तः (वै० १९ श०), निघण्टुरत्नाकरः-गणेशशास्त्रिदातारः (वै० २० श०) वनस्पतिनिघण्टुसंग्रहः-रुग्नाथेन्द्रः (वै० २० श०), बृहन्निघण्टुरत्नाकरः-दत्तारामचतुर्वेदः वै० २० श०) चेत्यादयः ।

अन्ये निघण्टव—

रसेन्द्ररत्नकोशः-देवेन्द्रोपाध्यायः, पथ्यापथ्यनिघण्टुः-देवपण्डितः, शाकनिघण्टुः-सीतारामशास्त्री, ओषधिनामावली-राधाकृष्णः, द्रव्यगुणादर्शनिघण्टुः-अज्ञातः, अष्टाङ्गहृदयनिघण्टुः-अज्ञातः, षड्रसनिघण्टुः-अज्ञातश्चेत्यादयः ।

पुरातना आयुर्वेदीयाः ग्रन्थाः—

अगदतन्त्रम्-भरद्वाजः, अनुभोगकल्पः-सनत्कुमारः, अष्टकर्मस्थानम्-वररुचिः अश्विनीकुमारसंहिता-अश्विनीकुमारः, आनन्दकन्दः-महाभैरवः, आयुर्वेदमहोदधिः (सुषेणवैद्यकम्)-सुषेणः, आयुर्वेदमहोदधिः-सुखाचार्यः, इन्द्रसूत्रम्-इन्द्रः, उत्पलपरिमलः-योगिवराहविहिरः, गरुडपङ्काक्षरीकल्पः-कश्यपः, चिकित्सारसायनतन्त्रम्-धन्वन्तरिः, चिकित्सासारसंग्रहः-धन्वन्तरिः, जाबालिसूत्रम्-जाबालिमुनिः, जीवनदानग्रन्थः-च्यवनः, दाल्भ्यसूत्रम्-दाल्भ्यऋषिः, देवलसूत्रम्-देवलः, धन्वन्तरिसूत्रम-धन्वन्तरिः, धातुकल्पराजः-धन्वन्तरिः, द्वैधनिर्णयतन्त्रम्-अगस्त्यः, नाडीविज्ञानम्-कणादः, नाडीविज्ञानम्-रावणः, नाभियन्त्रम्-नन्दिकेश्वरः, नेत्रप्रकाशिका-नन्दिकेश्वरः, नेत्ररोगविज्ञानम्-कापालिकः, पुष्कलसंहिता-पुष्कलः, ब्रह्मसंहिता-प्रजापतिः, मेषसंहिता-मेषऋषिः, योगशतकम्-वररुचि,: रसप्रभाकरः-गणेशः, रसार्णवः-मरीचिः, रूपार्णवः-च्यवनः, रोग-

निदानम्- कश्यपः, वनस्पतिविवरणम्-अङ्गिरा, विद्याप्रकाशचिकित्सा-धन्वन्तरिः, वैद्यकस्वरोदयः-धन्वन्तरिः, शब्दकौतूहलम्-मैन्दऋषिः, सूप-शास्त्रम्-कश्यपः, सौभरिसूत्रम्-सौभरिः, स्त्रीचिकित्सासूत्रम्-कश्यप इत्येव-मादयः[1]।

दक्षिणभारते विशेषतया लब्धप्रचाराः केचन चिकित्साग्रन्थाः—

कल्याणकारकम्-उग्रादित्यः, वासवराजीयम्-वासवराजः, सिद्धरसा-यनकल्पः, अष्टाङ्गग्रन्थश्च-समन्तभद्रः, शतश्लोकी-अवधानसरस्वती, वैद्य-चिन्तामणिः-वल्लेभेन्द्रनियोगी, रसप्रदीपिका-मङ्गलगिरिः, परहितसंहिता-श्रीनाथपण्डितः, चमत्कारचिन्तामणिः-गोविंदः, योगरत्नावली-श्रीकण्ठः, चिकित्साऽमृतसागरः-देवदासः, रसवैशेषिकसूत्रम्-भदन्त नागार्जुनः, चिकित्सासारसंग्रहः-विद्याऽचार्यः, तन्त्रयुक्तिविचारः-नीलमेघवैद्यः, धन्वन्तरिविलासः, धन्वन्तरिसारनिधिश्च-तुलाजोराजः इत्यादयः।

अन्ये च कतिपये ग्रन्थाः—

रसोपनिषद्, सर्वरोगचिकित्सारत्नम्, आरोग्यकल्पद्रुमः, चिकित्सा मूलम्, सहस्रयोगाः, धाराकल्पः, हरमेखला, शिवतत्त्वरत्नाकरः, आयुर्वेद-सूत्रम्, भेषजसर्वस्वम्, भेषजकल्पः सन्निपातचन्द्रिका, योगशतकं, सारार्थ-संग्रहः, नाडीज्ञानविनिर्णयः, षड्विधं-नाडीतन्त्रम्, नाडीनक्षत्रमाला, नाडी-ज्ञानम्, नाडीपरीक्षा, श्रीकण्ठनिदानम्, द्रव्यगुण-चतुःश्लोकी, पदार्थ-चंद्रिका, अभिधानचूडामणिः, अष्टाङ्गहृदयनिघण्टु, न्यायवैद्यकम्, स्वस्थवृत्तञ्चेत्यादयः[2]।

इतरे च चिकित्साशास्त्रीयाः ग्रन्था[3] :—

अञ्जननिदानम्-अञ्जनाचार्यः, अजीर्णमञ्जरी-धन्वन्तरिः, अभ्रक-कल्पः-अज्ञातः, अनुपानतरङ्गिणी-अज्ञातः, अनुपानदर्पणः-अज्ञातः, आयुर्वेदीय

---

१. अमीषु बहवोग्रन्थाः श्रीमधुसूदनप्रसादशास्त्रिणा स्वीयग्रन्थसूचिषूल्लिखिता सन्ति।

२. एतेष्वनेकेग्रन्थाः त्रिवेन्द्रम-तञ्जावूर-अड्यार-मदरासस्थित राजकीय हस्त-लिखितपुस्तकालयेषूपलभ्यन्ते। यादवजोमहारास्य ग्रन्थमालायां नाडीविषयक-ग्रन्थाः षट्चत्वारिंशत्संख्याका वर्तन्त इति ज्ञायते।

३. अमीषां ग्रन्थानां नामानि श्री गोडऋ ठाकुर प्रणीतायुर्वेदेतिहांसग्रन्थात् तथा श्रीदुर्गाशंकरकेवलरामशास्त्रिविरचिताऽयुर्वेदेतिहासग्रन्थात् सङ्कलितानि सन्ति।

सुषेण संहिता-सुषेणाचार्यः, अर्कप्रकाशः-रावणाचार्यः, आरोग्यचिन्तामणिः-दामोदरः, कालज्ञानम्-अज्ञातः, कूटमुद्गरः-माधवः, गूढबोधकम्-हेरम्बसेनः, गोरक्षसंहिता-गोरक्षनाथः, गौरोकञ्चलिका-अज्ञातः, चमत्कारचिन्तामणिः-गोविन्दराजः, चिकित्साञ्जनम्-वन्द्योपाध्यायः, चिकित्सारत्नाभरणम्-सदानन्ददाधीचः, चिकित्सारहस्यम्-हारीतः, चिकित्सासारः-गोपालदासः, द्रव्यगुणशतकम्-त्रिमल्लभट्टः, धात्रीमञ्जरी-अज्ञातः, नारायणविलासः-नारायणभूपतिः, नाडीपरीक्षाचिकित्सा-रत्नपाणिशर्मा, नाडीप्रकाशः-शंकरसेनः, पथ्यापथ्यम्-विश्वनाथकविराजः, पथ्यापथ्यनिघण्टुः-कविश्रीमुखः, परिभाषावृत्तिप्रदीपः-गोविन्दसेनः, पारदयोगशास्त्रम्-शिवरामयोगीन्द्रः, प्रयोगचिन्तामणिः-राममाणिक्यसेनः, प्रयोगसारः-अज्ञातः, बालचिकित्सापलटम्-अज्ञातः, बालबोधोदयः-काशीनाथचतुर्वेदी, भैषज्यसारामृतसंहिता-उपेन्द्रः, योगचन्द्रिका-लक्ष्मणः, योगदीपिका नागररणकेशरी, योगमहार्णवः-रामनाथः, योगमहोदधिः-अज्ञातः, योगरत्नमालागंगाधर यतीन्द्रः योगरत्नाकरः-नयनशेखरः, योगशतकम्-श्रीकण्ठदासः, योगसंग्रहः-अज्ञातः, योगसमुच्चयः-माधवः, योगसमुच्चयः-गणपतिव्यासः, रत्नाकरौषधयोगः-अज्ञातः, रसकंकालीयम्-कंकालयोगी, रसकल्पलतामंग्नीरामः, रसकामधेनुः-चूडामणिः, रसकिन्नरः-अज्ञातः, रसकौमुदी-शक्तिवल्लभः, रसकौमुदी-ज्ञानचन्द्रः, रसकौमुदी-माधव, रसज्ञानम्-ज्ञानज्योतिः, रसचण्डाशुः-दत्तात्रेयः, रसचिन्तामणिः-अनन्तदेवः, रसतरङ्गमालिका-जनार्दनभट्टः, रसपारिजातः-वैद्यशिरोमणिः, रसप्रदीपः-प्राणनाथवैद्यः, रसबोधचन्द्रोदयः-अज्ञातः, रसमञ्जरी-शालिनाथः, रसरत्नकौमुदी-अज्ञातः, रसरत्नप्रदीपः-रामराजः, रसरत्नमणिमाला-बाबाभाईवैद्यः, रसराजशंकरः रामकृष्णः, रसराजशिरोमणिः-परशुरामः, रसराजसुन्दरः-दत्तरामः, रस संग्रहसिद्धान्तः-गोविन्दरामः, रससारसंग्रहः-अज्ञातः, रससारामृतम्-रामसेनः, रसाध्यायः-अज्ञातः, रसामृतम्-वैद्येन्द्रपण्डितः, रसायनपरीक्षा-अज्ञातः, रसालङ्कारः-भट्टरामेश्वरः, रसावतारः-माणिक्यचन्द्रजैनः, रसायनप्रकरणम्-मेरुतुंगजैनः, रसायनकल्पद्रुमः-रामकृष्णभट्टः, रसेन्द्ररत्नकोशः-देवेन्द्रोपाध्यायः, रामविनोदः-पद्मरंगः, रोगनिदानम्-धन्वन्तरिः, लोहपद्धतिः सुरेश्वरः, वाणीकरी-वाणीकः, विबोद्धारः-अज्ञातः, वैद्यकल्पद्रुमः-रघुनाथप्रसादः, वैद्यकौस्तुभः-मेवारामः, वैद्यकसारः-रामः, वैद्यचिन्तामणिः-धन्वन्तरिः, वैद्यदर्पणः-प्राणनाथवैद्यः, वैद्यमनोरमा-

कालिदासः, वैद्यरत्नम्-केदारभट्टः, वैद्यवल्लभः-हस्तिरुचिः, वैद्यवृन्दः-नारायणः, वैद्योत्तंसः-राजसुन्दरवैद्यः, वैद्यामृतलहरी-मथुरानाथः, शतयोगाः-अज्ञातः, शरीरनिश्चयाधिकारः-रामदासः, सर्वविजयितन्त्रम्-अज्ञातः, साध्यरोगरत्नावली-श्यामलालः, सिद्धनागार्जुनीयं, सिद्धयोगरत्नावलीच-सिद्धनागार्जुनः, सिद्धान्तमञ्जरी-बोपदेवः, सूतप्रदीपिका-अज्ञातः, हंसराजनिदानम्-हंसराजः, हरितकल्पः-अज्ञातः, हितोपदेशः-कण्ठसूरिजैनः, हितोपदेशः, कण्ठशिवपण्डितः, क्षेमकुतूहलम्-कृष्णशर्मा चेत्यादयः[1]।

•

---

१. प्रकरणेऽस्मिन् चिकित्साशास्त्रीयग्रन्थानां, तत्प्रणेतॄणां, तत्समयादीनाञ्चोल्लेखनविषयान् समधिकृत्य प्रमाणत्वेन, समुपजीव्यत्वेन चाङ्गीकृताः निम्नोदृङ्किताः ग्रन्थावरीवृतति।

आयुर्वेदका इतिहास-गोडल ठाकुरः,
वृद्धत्रयी—गुरुपद हालदारः,
आयुर्वेदका इतिहास-दुर्गाशंकर केवलरामः
आयुर्वेदका इतिहास-कविराजसूरम चन्द्रः
आयुर्वेदका बृहत् इतिहास-अत्रिदेव विद्यालङ्कारः
Indian Medicines-Dr.Johlly.
Catalogus Catalogorum-th. Aufrecht. इत्यादयः।

धनुर्वेदः (शस्त्रास्त्रप्रयोगशास्त्रम्)

व्यष्टि-समष्टि-राष्ट्र-राज्यादीनां संरक्षणसंवर्धनार्थं नितरां समनिवार्यं युद्ध-रणशास्त्रान्तर्गतं-शस्त्रास्त्रप्रयोगविधि-विषयकं विज्ञानं मूलतया धनुर्वेदे संविवृतमस्ति। राज्यसप्ताङ्गान्यतमस्य बलस्यानिरुद्धत्वं, चाविजितत्वं शस्त्रास्त्रप्रयोगविधिविज्ञानाधीनं भवतीतिकृत्वा विजयफलप्राप्तिसाधिकया, कुशलया युद्धनीत्याऽस्योपवेदस्यानितरसाधारणं महत्त्वं वरीवर्ति। धनुर्वेदे, भारतीयप्रतनशस्त्राणां समेषां वाचकः धनुः शब्दोऽस्ति। एतेषु शस्त्रेषु मुक्तानि चक्रादीनि, अमुक्तानि खड्गादीनि, मुक्तामुक्तानि शल्यादीनि, यन्त्रमुक्तानि शरादीनि चान्तर्भवन्ति।

धनुर्वेदस्यास्य मौलिकाः प्रतना ग्रन्थाः सम्प्रत्यनुपलब्धा उपलब्धा वा निम्नोट्टङ्किताः परिज्ञायन्ते। ते चैते—

शिवविरचितोधनुर्वेदः, वसिष्ठप्रणीतो धनुर्वेदः (संहितारूपः), भरद्वाजकृतो धनुर्वेदः, वैशम्पायनप्रणीतोधनुर्वेदः, विश्वामित्रप्रणीतो धनुर्वेदः, वृद्धशार्ङ्गधरकृतो धनुर्वेदः, द्रोणाचार्यप्रणीतो धनुःप्रदीपः परशुरामकृतोधनुश्चन्द्रोदयश्च[1]।

एतदतिरिक्ता युद्धनीतिप्रतिपादका ग्रन्थाः निम्नोल्लिखिता अनुश्रूयन्ते—

युद्धजयार्णवः, युक्तिकल्पतरुः, शुक्रनीतिः, शार्ङ्गधरकृतो वीरचिन्तामणिः समराङ्गणसूत्रधारः नृसिंहभट्टप्रणीतो धनुर्वेदचिन्तामणिः, धनुर्विद्यादीपिकाच।

उपर्युट्टङ्कितेषु धनुर्वेदेषु विश्वामित्रप्रणीतो धनुर्वेदः[2] सान्दर्भिकोपलब्धिविधया भृशं विशिष्यते। धनुर्वेदेऽस्मिन् दीक्षापादः, सङ्ग्रहपादः, सिद्धपादः प्रयोगपादश्चेति चत्वारः पादा विद्यन्ते।

---

१. अमी ग्रन्था वङ्गविश्वकोशकारेण धनराजशास्त्रिणोल्लिखिताः पुराणेषूद्धृताश्च समवगम्यन्ते।

२. अस्य विवरणं श्रीमधुसूदनसरस्वतीप्रणीते प्रस्थानभेदग्रन्थे समुपलभ्यते। धनुर्वेदस्य (धनुर्विद्यायाः) सारगर्भितं वर्णनमग्निपुराणे, २४९-२५२ अध्यायेषु च समुपलभ्यते।

दीक्षापादः—अस्मिन् धनुर्लक्षणं, अधिकारिनिरूपणं, दीक्षा-अभिषेकादीनां विधानञ्चोपलभ्यन्ते ।

सङ्ग्रहपादः—अस्मिन् प्रामुख्येणाचार्यलक्षणं, मन्त्रशस्त्रादिविषयाणां संग्रहविधानञ्च विवृते स्तः ।

सिद्धपादः—अस्मिन् सकलविधशस्त्रास्त्राभ्यासविधिविधानं, मन्त्रदेवता-सिद्धिविधानञ्च वर्णिते स्तः ।

प्रयोगपादः—अस्मिन् मन्त्रदेवताऽर्चनं सिद्धशस्त्रास्त्रा[1]दिप्रयोगादिकञ्च विवृते वरीवृततः ।

---

१. नारायणास्त्र-पाशुपतास्त्र-ब्रह्मास्त्र-ब्रह्मदण्डास्त्र - ब्रह्मशिरसास्त्र-ऐन्द्रास्त्र- वायव्यास्त्र- आग्नेयास्त्र-पार्जन्यास्त्र-पार्वतास्त्र सार्पास्त्र-गारुडास्त्र-सम्मोहनास्त्र-स्तम्भनास्त्रादीनां युद्धप्रसङ्गादिषु परिवर्णनं रामायण-महाभारत-पुराणादिषु विहितमुपलभ्यते । विशेषतया देवीभागवतं सावित्री-मन्त्राधिष्ठितानामस्त्राणां विवरणमभ्युपगम्यते । सवितुः गायत्रीमन्त्रमूलकानि कतिपयप्रमुखास्त्राणि निम्नोट्टङ्कितानि सन्ति ।

ब्रह्मास्त्रम्—

प्रयोगमन्त्रः—ॐ त्यादचोप्रनोयोयोधि, हिमधीस्यवदेर्गोभण्यंरेर्वतुविसत्त, स्वोवर्भुभूरोम् ॥

ब्रह्मास्त्रसिद्धये तावदस्य विलोमाक्षरगायत्रीमन्त्रस्यैकनिखर्वसंख्याक-पुरश्चरणात्मको जपोविहितोऽस्ति ।

पाशुपतास्त्रम्—

प्रयोगमन्त्रः—ॐत्यादचोप्रनोयोयोधि, हिमधीस्यवदेर्गोभ, ण्यंरेर्वतुविसत्त, स्वोवर्भुभूरोम् । श्लीं पशु हुं फट् अमुकशत्रून् हन हन हुं फट् ॥

अस्य सिद्धये पञ्चाब्जसंख्याकपुरश्चरणात्मको जप आवश्यको भवति ।

ब्रह्मदण्डास्त्रम्—

प्रयोगमन्त्रः—ॐ प्रचोदयान्नोयोधियो धीमहि देवस्य भर्गो वरेण्यं सवितुस्तत् अमुकशत्रुं हन हन हुं फट् ॥

अस्य सिद्धयं सप्तकोटिसंख्याको जपः पुरश्चरणात्मकः कर्तव्योऽस्ति ।

ब्रह्मशिरसास्त्रम्—

प्रयोगमन्त्रः—ॐ धियोयोनः प्रचोदयात्, भर्गोदेवस्य धीमहि, तत्सवितुर्वरेण्यं, शत्रून्मे हन हन हुं फट् ॥

अस्य सिद्धये त्रिकोटिसंख्याकः पुरश्चरणात्मको जप आवश्यकोऽस्ति ।

शरकुशादिषु, सिद्धमन्त्रैरुक्तानां तावदस्त्राणामाधानं कृत्वा प्रयोगो भवति । एषां चतुर्णामस्त्राणामुपसंहारार्थं, अनुलोमविधया

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं, भर्गोदेवस्य धीमहि,
धियो यो नः प्रचोदयात् भूर्भुवः स्वरोम् ॥

इति सवितृगायत्रीमन्त्रस्य विवक्षितसंख्याको जपः कर्तव्यत्वेनविहितोऽस्ति ।

गान्धर्ववेदः (सङ्गीतशास्त्रम्)

मूलस्रोतस्तावत्संस्कृतसङ्गीतशास्त्रस्य सामवेदस्तदुपवेदो गन्धर्ववेदश्चास्ति। असौ गान्धर्ववेदः[1] सङ्गीतस्य मुक्तिसाधनत्वं, ब्रह्मचिन्तनप्रवर्तकत्वञ्च सामाख्यापयति। सामगायने सम्प्रयुक्ता माण्डूकीयशिक्षायां परिवर्णिता अभिनिहित-प्राश्लिष्ट-जात्य-क्षैप्र-पादवृत्त-तैरोव्यञ्जन-तिरोविरामेति सप्तस्वराः[2], प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-क्रुष्ट-अतिस्वारेति सप्तस्वरावा[3] गान्धर्वोपवेदीय-तदुपजीवकसङ्गीतशास्त्रीय गायनेषु प्रयुक्तानां षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषाद-इति सप्तस्वराणां मूलरूपाः परिज्ञायन्ते।

उदात्ते निषादगान्धारावनुदात्तऋषभधैवतौ।
स्वरितः प्रभवाह्येतेषड्जमध्यमपञ्चमाः॥

इति प्रतिपादयन् तत्र भवान् पाणिनिर्वैदिकोदात्तानुदात्तस्वरितस्वराणां साङ्गीतिकसप्तस्वरसमुद्भावकत्वं समाख्यापयति। इत्थमुक्तसाङ्गीतिकसप्तस्वराश्रितविशुद्धगायनपद्धतिविधायकस्य संस्कृतसंङ्गीतशास्त्रस्य प्रतनत्वं, समूलत्वञ्च सम्प्रति प्रतिपद्यते।

---

१. पण्डित धनराजशास्त्रिण अभिमतानुसारेण गान्धर्ववेदे चतुर्दशकाण्डानि, लक्षसंख्याका ऋचश्च सन्ति।

२. अभिनिहितः प्राश्लिष्टो जात्यः क्षैप्रश्च पादवृत्तश्च।
तैरोव्यञ्जनः षष्ठः तिरोविरामश्च सप्तमः॥
(माण्डूकीयशिक्षा)

जात्यः क्षैप्रोऽभिनिहितः तैरोव्यञ्जन एव च।
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः॥
(नारदीयशिक्षा ८।१०)

३. प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः।
मन्द्रः क्रुष्टोह्यतिस्वार एतान् कुर्वन्ति सामगाः॥
(नारदीयशिक्षा ८।१२)

सामवेदादिदं गीतं सञ्जग्राह पितामहः । (सं० र० १।२५)

इत्युक्तदिशा सङ्गीतशास्त्रमिदं सर्वतः प्राथम्येन ब्रह्मणा सामवेदात् समासादितम् । तदनु ब्रह्मणः शारदा, तस्या महर्षिनारदस्तस्माच्च कश्यपभरतादयः शास्त्रमेतत् सम्प्राप्नुवन्नित्यनुश्रूयते ।

सदाशिवः शिवा ब्रह्मा भरतः कश्यपोमुनिः ।
मतङ्गो याष्टिको दुर्गाशक्तिः शार्दूलकोहलौ ॥

इत्यादि संगीतरत्नाकरान्तर्गतेषु पद्येषु शार्ङ्गदेवेन सादरं संस्मृतास्तत्पूर्ववर्तिनः सङ्गीताचार्याः सदाशिव-शिवा-ब्रह्म-कश्यप-नन्दिकेश्वर-आञ्जनेय-रावण-वायु-विश्वावसु-नारद-तुम्बर-अर्जुन-रम्भा - भरत-दत्तिल-मतङ्ग-याष्टिक-दुर्गाशक्ति शार्दूल-कोहल-विशाखिल - कम्बलाश्वतर-स्वाति-गुण-बिन्दुराज-क्षेत्रराज-राहल-रुद्रट-लोल्लट - उद्भट-शङ्कुक-अभिनवगुप्त-मातृगुप्त-नान्यभूपाल-भोज - भूवल्लभ - परमर्दि-सोमेश-जगदेक-कीर्तिधरादयः समभूवन्निति ज्ञायते । एभिः प्राङ्भिः समये-समये साङ्गीतिकसिद्धान्तविवरणप्रवणोन्मुखैर्ग्रन्थैः समुपबृंहितमिदं शास्त्रं संस्कृतवाङ्मयेषु नूनं महनीयं पदमुरीकरोति ।

साङ्गीतिकाभिव्यक्तिरूपगायनादिकलापक्षस्य समुद्भवविषयमधिकृत्य भारतीयाभारतीयैः सङ्गीतज्ञैरितिहासविद्भिश्चानेकविधाः सिद्धान्ताः प्रतिपाद्यन्ते । भरत-शार्ङ्गदेव-दामोदरप्रभृतीनां सङ्गीतशास्त्रज्ञानामभिमतानुसारेण शास्त्रीय गायनादीनामाद्यप्रवर्तकौ ब्रह्मा, शिवश्चास्ताम् । तत ऊर्ध्वं नारद-स्वाति-तुम्बुरु-रम्भा-नन्दिकेश्वरादिदेवर्षयः, गन्धर्वा अप्सरसः किन्नराश्च गायनादिकलाप्रवीणाः नितरां सुप्रथन्तेस्म । ओंकारप्रणवस्यापि सङ्गीतस्य मूलोत्सत्वं भारतीयसङ्गीतमनीषिभिः समाम्नातं सविशेषं समवगम्यते ।

षड्जं मयूरोवदति गावोरम्भन्ति चर्षभः ।
अजाविकेषु गान्धारं क्रौञ्चोवदति मध्यमम् ॥
पुष्पसाधारणे काले कोकिला वक्ति पञ्चमम् ।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥

इति नारदीयशिक्षासमाख्यातदिशा षड्जर्षभादिलौकिकानां सप्तस्वराणां नादसाजात्यं समनुरुध्य मानवैर्गायनोन्मुखैः प्रोक्तपशुपक्षिणां नानाविधध्वनीनां, गायने प्रयुक्तानां सप्तस्वराणां मूलत्वमङ्गीकृतमासीत् ।

मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।
गजश्च सप्त षड्जादीन् क्रमादुच्चारयन्त्यमी ॥

(सं० र० १।३।४८)

इति समाख्यापयता शार्ङ्गदेवेन, दामोदरपण्डितेनच सङ्गीतदर्पण-ग्रन्थे सप्तस्वरप्रादुर्भावविषयकमेतन्मतं समनुमोद्यते ।

अभारतीयेषु विपश्चित्सु, अरबदेशीयेतिहासज्ञः अलासिनग्मामहोदयः स्वप्रणीते 'विश्वस्य सङ्गीत'मिति पुस्तके सङ्गीतस्याविर्भावः बुलबुल नामकपक्षितः समभूदिति प्रतिपादयति । आफ्रिकादेशीयमनीषी इफ़ारो, मिश्रदेशीय सङ्गीतज्ञो गवासा, अन्ये च सङ्गीतेतिहासज्ञा रिन्सोबोल्स-हल्टोरिश-आइबोप्रभृतयः श्रुतिमनोहरस्वरात्मकसङ्गीतस्य समुद्भवोहि जलतरङ्गमधुरनिनादेभ्यः पिकमयूरादीनां, विविधविहंगमादीनां काकलीकलरवेभ्यः, कम्पितसमीरणध्वानेभ्यश्च सञ्जात इति समामनन्ति । अतिरिक्तेष्वितिहासविज्ञेषु काहिमोलामो-बन्टोडल-शिकोवाहुचि-जाकोबिल्-ओलकसथोवर-आदिसुधियः प्राकृतिकनिसर्गरमणीयघटनाऽदीनां, रमणीसौन्दर्यानुभूतेश्च सङ्गीतमूलोत्सत्वं समाख्यापयन्ति ।

सं होत्रं स्म पुरा नारी समनं वा व गच्छति ।

इति ऋक्प्रतिपादितदिशा वैदिकवाङ्मयेषु परिवर्णितः समनसङ्गीत-महोत्सवः सङ्गीतशास्त्रीयकलापक्षस्य पुरातनत्वं परिसूचयति । इतिहास-पुराणादिषु, विशेषतया हरिवंशमार्कण्डेयपुराणबृहन्नारदीयपुराणवायुपुराणा-दिषु साङ्गीतिकयोः शास्त्र-कला-पक्षयोर्विवरणं समवगन्तुं योग्यं प्रति-भाति । उड्डीशमहोदयतन्त्रेऽपि विविध भारतीयप्राचीनवाद्यानां वर्णन-मुपलभ्यते ।

इदानीमुपलब्धिविषयेषु मोहेञ्जोदारो-हडप्पाऽदिस्थानगतोत्खनन-प्राप्तेषु पुरातत्त्वेषु (Archaeological Monuments), अजन्ता-वेरूलादिस्थितगुहाऽभ्यन्तर्गतालेख्येषु, शिल्पादिषुच समभिव्यक्तं साङ्गीतिकं वाद्यनृत्यादिमुद्रास्वरूपं भारतीय सङ्गीतसमुद्भवस्य, तद्विकासस्य च विक्रमपूर्वीयद्विसहस्रसंवत्सरपूर्वकालिकत्वं नूनं परिद्योतयति ।

सङ्गीतस्य समुद्भवः प्रथमतः सञ्जात आहोस्विद् भाषाया इत्यत्र विषये पाश्चात्यविपश्चित्सु, सङ्गीतेतिहासज्ञेषु, प्रतनाप्रतनेषु विप्रति-

पत्तिर्दरीदृश्यते। लिवार्ड-हुलपार्डि-ओलिवरक्रिफिल्ड-कार्लिगुड-फ्रिक्रहार्ड-बर्न ह्वाइटप्रभृतयो मनीषिणः जगतीतले भाषाऽविर्भावः प्रथमं, ततः सङ्गीतोद्भवः समभूदिति प्रतिपादयन्ति। जार्जपिक्फोक्स-विलियम-गेयनरवेल्स-डॉक्टरबर्न्सप्रभृतिविद्वांसः सङ्गीताविर्भावः पूर्वं, तदनु भाषाऽविष्कारः समजनीति समारख्यापयन्ति। अमुं विप्रतिन्नं विषयमधिकृत्य काल्पनिकमकाल्पनिकं वा विवरणं जार्जग्रान्ट-लिपोर्डहार्लि-जेम्स एम्-केन्ट-ग्रेरीट्रोरा-वेवोरेनमाइल्स-जाइफोआस्टिन-चिनताईप्रभृतिविवेचकैस्तत्प्रणीतेषु ग्रन्थेषु नैकविधेषु समुपस्थापितं वरीवर्ति[1]।

सम्प्रति समुपलब्धेषु सङ्गीतशास्त्रीयग्रन्थेषु भरतमुनिप्रणीतं नाट्यशास्त्रं प्रतनतमं प्रतिभाति। एतत्पूर्ववर्तिनां कश्यप-शुक्र-याष्टिक-आञ्जनेयादीनां सङ्गीताचार्याणां ग्रन्थाः कालकवलीकृता नाद्योपलभ्यन्ते। नाट्याङ्गत्वेन गीत-वाद्य-नृत्यविषयक सङ्गीतसिद्धान्तान् त्रिष्वध्यायेषु (२८,२९,३० संख्याकेषु) सविस्तरं निरूपयदिदं भरतनाट्यशास्त्रं, परवर्तिनां सङ्गीतशास्त्रीयग्रन्थकृतां कृते समुपजीव्यत्वेन नितरां समाद्रियणमाणं संस्कृतसङ्गीतसाहित्येषु सम्प्रत्यपि शेखरायते। भरतपरवर्तिभिः दत्तिल-विशाखिल-मतङ्ग-नारद नान्यदेव-जगदेकमल्ल-शार्ङ्गदेव-पार्श्वदेव-शारदातनय-अल्लराज-शम्भुराज-मदनपाल-देवेन्द्रभट्ट - विप्रदास-वेमभूपाल कुम्भराज-लोचन-रामामात्य-सोमनाथ-पुण्डरीकविट्ठल-दामोदर - अहोबल-व्यङ्कटमखी-हृदयनारायण-भावभट्ट-श्रीनिवास - सदाशिवदीक्षित-प्रतापसिंह - कृष्णानन्द - भातखण्डेप्रभृतिभिर्विरचितैरनेकविधग्रन्थरत्नैरस्य शास्त्रस्य भृशं समुपबृंहणं समभूत्।

तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते।
धर्मार्थकाममोक्षाणां इदमेवैकसाधनम्॥

(सं० र० १।३०)

इति पद्यानुसारेण पुरातनसमये चतुर्विधपुरुषार्थसाधनमिदं सङ्गीतं मानवजीवने निरतिशयानन्दसन्दोहानुभूतिजनकं, भगवद्भक्तिप्रवणञ्चासीत्।

---

१. एतद्विषयकविस्तृतविवरणाभिज्ञानार्थं श्री उमेशजोशी महोदय प्रणीत 'भारतीय सङ्गीतेतिहास' ग्रन्थोद्रष्टव्यः।

नाहं वसामि वैकुण्ठे योगिनां हृदये न च।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥

इति भगवद्गीतायां, तत्र भगवता प्रभविष्णुना विष्णुना भगवद्भक्तिसाधनत्वेनाङ्गीकृतस्यास्य सङ्गीतस्य, स्वानुरागविषयीभूतस्य परं प्राधान्यं प्रतिपाद्यते ।

शास्त्रेऽस्मिन् सङ्गीतस्यैतस्य द्वैविध्यं प्रतिपादितमस्ति ।

१. मार्गीयं सङ्गीतम्—

द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥

इति सङ्गीतदर्पणे दामोदरेणोदितदिशा ब्रह्मणाऽन्विष्टं-मार्गितं तावदिदंसङ्गीतं मार्गीयपदेन व्यपदिश्यते। गान्धर्ववेदात्मकं स्वर्गीयमिदमपौरुषेयं मार्गसङ्गीतं

अनादिः सम्प्रदायो यः गन्धर्वैस्सम्प्रयुज्यते ।
नियतं श्रेयसो हेतुस्तद् गान्धर्वं जगुर्बुधाः ॥

(सं० र० ४।२)

इति पद्याशयानुसारेण प्राङ्भिर्ऋषिभिर्गन्धर्वादिभिश्च सङ्गीयमानमभ्युदयनिःश्रेयससाधनत्वेनातितरां विशिष्यतेस्म ।

२. देशीयं सङ्गीतम्—

देशे-देशे जनानां यद्रुच्या हृदयरञ्जकम्।
गानं च वादनं नृत्यं तद्देशीत्यभिधीयते ॥

इति पद्योदितदिशा विविधदेशीयानां, रुचिवैचित्र्यवतां जनानामभिरुच्यनुकूलं श्रुतिमनोहरं, सहृदयहृदयाल्हादकं सङ्गीतमिदं प्रभवति। मार्गीयं सङ्गीतं पुरातनसमये देवताऽराधनपरभासीत्; किन्तु देशीयं सङ्गीतं प्रावर्ह्येण लोकाराधनपरं वरीवर्ति। अतस्तावद्देशीयं सङ्गीतमिदानीं यावत् समयानुकूलं जनमानसाभिरुच्यनुसारञ्च परिवर्तितं विकसितञ्च समभूत्, सम्भवति, सम्भविष्यति च।

गीतं वाद्यञ्च नृत्यञ्च त्रयं सङ्गीतमुच्यते ।

इति शाङ्र्गदेवचनानुसारेण तौर्यत्रिके सङ्गीते कण्ठसङ्गीत-वाद्य-वादननृत्यानां परिगणनं भवति। तेष्वपि गीत-वाद्य-नृत्येषु पूर्वपूर्वप्राधान्यं प्रतिपद्यते।

नृत्यं वाद्यानुगं प्रोक्तं, वाद्यं गीतानुवृत्ति च।
अतो गीतप्रधानत्वादत्रादावभिधीयते॥
(सं० र० १।१।२४)

इत्यनेन शाङ्र्गदेवः गीतस्यैव प्राधान्यं प्रतिपादयति। गीतपदन्तावत्सकलविधं कण्ठसङ्गीतं समभिदधाति।

कण्ठसङ्गीते साङ्गीतिकग्रन्थप्रणेतृणामाचार्याणामभिमतानुसारेण नाद-श्रुति-स्वर-ग्राम-वर्ण-गमक-मूर्च्छना-जाति-राग-मेल-तान-आदिगायनाङ्गानां सपरिकरं विवरणं विहितं वरीवर्ति।

तत्र नादः—

नकारं प्राणनामानं दकारमनलं विदुः।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते॥
(सं० र० १।३।६)

समस्तसंगीतप्रपञ्चोऽयं नादमधिकृत्यैव प्रवर्तते। यथा प्राणमन्तरा प्राणी, तथा ऋते नादात् सङ्गीतमपि जीवातुरहितंसत् सत्तां न संस्पृशति। नादमधुरमेव सङ्गीयमानं गीतं अमन्दानन्दसन्दोहं सरसमानसेभ्यः प्रयच्छति। योगिभिः प्राङ्भिर्मार्गसङ्गीतज्ञैश्च हृदयावच्छिन्नदहराकाशोद्भूतानाहतरूपेण नादोऽयं समनुभूयतेस्म। अर्वाङ्भिः संगीतज्ञैरयमनिलाहतरूपेण मन्द्र-मध्य-तारात्मकः संश्रूयते।

श्रुतयः—

श्रुतयः स्युः स्वराभिन्नाः श्रावणत्वेन हेतुना।
कर्णस्पर्शात् श्रुतिर्ज्ञेया स्थित्या सैव स्वरोच्यते॥

स्वरूपमात्रश्रवणान्नादोऽनुरणनं विना।
श्रुतिरित्युच्यते, भेदास्तस्याः द्वाविंशतिर्मता॥
(सङ्गीतदर्पणः)

कोमल-तीव्र-तर-तम-आदिभेदेन स्वरांशरूपाः, श्रुतिगोचरीभूताः श्रुतयः द्वाविंशसंख्याकाः समाख्याताः सन्ति।

तत्र द्वाविंशश्रुतयः सजातयः—

१. तीव्रा (दीप्ता)	१२. प्रीतिः (मृद्वी)
२. कुमुद्वती (आयता)	१३. मार्जनी (मध्या)
३. मन्दा (मृद्वी)	१४. क्षितिः (मृद्वी)
४. छन्दोवती (मध्या)	१५. रक्ता (मध्या)
५. दयावती (करुणा)	१६. सन्दीपनी (आयता)
६ रञ्जनी (मध्या)	१७. आलापिनी (करुणा)
७. रतिका (मृद्वी)	१८. मदन्ती (करुणा)
८. रौद्री (दीप्ता)	१९. रोहिणी (आयता)
९. क्रोधा (आयता)	२०. रम्या (मध्या)
१०. वज्रिका (दीप्ता)	२१. उग्रा (दीप्ता)
११. प्रसारिणी (आयता)	२२. क्षोभिणी (मध्या) च ।

स्वरयोर्नियतसंख्याकाः श्रुतयो भवन्ति । यथा षड्जग्रामे षड्जर्षभयोश्चतस्रः श्रुतयः, ऋषभगान्धारयोस्तिस्रः, गान्धारमध्यमयोर्द्वे, मध्यमपञ्चमयोश्चतस्रः, पञ्चमधैवतयोश्चतस्रः, धैवतनिषादयोस्तिस्रः, निषादषड्जयोश्चद्वे श्रुतयः समनुभूयन्ते । द्वाविंशश्रुतिषु नियतश्रुतयः स्वरस्थानरूपा निम्नोट्टङ्किताः सन्ति । षड्जस्य चतुर्थी छन्दोवती श्रुतिः, ऋषभस्य सप्तमी रतिका, गान्धारस्य नवमी क्रोधा, मध्यमस्य त्रयोदशी मार्जनी, पञ्चमस्य सप्तदशी आलापिनी, धैवतस्य विंशा रम्या, निषादस्य द्वाविंशा क्षोभिणी च । आसां श्रुतीनां श्रुतिविधयाऽभिव्यक्तिसाधनत्वेन वीणायाः, सुषिरवाद्यस्य वा स्थानं वाद्येषु महनीयं प्रतिभाति ।

स्वराः—

श्रुत्यनन्तरभावीयः स्निग्धोऽनुरणात्मकः ।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ॥

(सं० र० १।३।२६)

अपिच—

स्वयं यो राजते नादः सस्स्वरः परिकीर्तितः ॥

(सङ्गीतदर्पणः)

श्रुतिभिराविर्भूताः स्पष्टतया संश्राव्या अनुस्वाररूपाः, स्वरान्तरसाहाय्यं विनाऽपि समनुरञ्जकाः स्वराः सप्त संख्याकाः परिगण्यन्ते । ते चेमे—

षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा ।
पञ्चमो धैवतश्चैव सप्तमश्च निषादवान् ॥

(भरतनाट्यशास्त्रम्)

अमी स्वरा वादि-संवादि-अनुवादि-विवादि-भेदेन चतुर्विधाः समाख्याताः सन्ति । यदा षड्जोवादी, मध्यमपञ्चमौ संवादिनौ, ऋषभगान्धारधैवतनिषादा अनुवादिनो भवन्ति । षड्जस्य वादिनः, विवादिस्वरो नास्ति । ऋषभे वादिनि, धैवतः संवादी, षड्जमध्यमपञ्चमनिषादा अनुवादिनः, गान्धारो विवादी च; गान्धारे वादिनि, निषादः संवादी, षड्जमध्यमपञ्चमधैवता अनुवादिनः, ऋषभो विवादी च; मध्यमे वादिनि, षड्जः संवादी, ऋषभगान्धारपञ्चमधैवतनिषादा अनुवादिनः, अविवादीच; पञ्चमे वादिनि, षड्जः संवादी, ऋषभगान्धारमध्यमधैवतनिषादा अनुवादिनः, अविवादीच; धैवते वादिनि, ऋषभः संवादी, षड्जगान्धारमध्यमपञ्चमा अनुवादिनः, निषादो विवादी च; निषादे वादिनि, गान्धारः संवादी, षड्जर्षभमध्यमपञ्चमा अनुवादिनः धैवतो विवादीचेत्थं षड्जग्रामीयस्वराणां पारस्परिकसम्बन्धोहि निर्दिष्टोऽस्ति ।

ग्रामाः—

अथग्रामास्त्रयः प्रोक्ताः स्वरसन्दोहरूपिणः ।
षड्जमध्यमगान्धारसंज्ञाभिस्ते समन्विताः ॥

(संगीतपारिजातः)

स्वरसमूहरूपाः ग्रामाः षड्ज-गान्धार-मध्यम-भेदेन त्रिविधा अन्वाख्याताः सन्ति ।

वर्णालङ्कारः—

गानक्रियोच्यतेवर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च सञ्चारी च चतुर्थकः ॥

(सं० र० १।६।१)

इत्युपक्रम्य शार्ङ्गदेवेन सङ्गीतरत्नाकरे स्थायिनः प्रसन्नादि-प्रसन्नान्त-प्रसन्नाद्यन्त-प्रसन्नमध्य - क्रमरेचित-प्रस्तार - प्रसादेति सप्तालङ्काराः; आरोह्यवरोहिणां विस्तीर्ण-निष्कर्ष-बिन्दु-अभ्युच्चय-हसित-प्रेङ्खित-आक्षिप्त सन्धिप्रच्छादन- उद्गीत-उद्वाहित-त्रिवर्ण-पृथग्वेण्विति पृथक-

पृथग् द्वादशालङ्काराः; सञ्चारिणां मन्द्रादि-मन्द्रमध्यम-मन्द्रान्त-प्रस्तार-प्रसाद-व्यावृत्त-स्कलित-परिवर्तक-आक्षेप- बिन्दु-उद्वाहित-ऊर्मि-सम-प्रेङ्ख-निष्कूजित-श्येन-क्रम-उद्वहित - रञ्जित-सन्निवृत्त-प्रवृत्तक-वेणु-ललितस्वर-हुंकार - ह्लदमान - अवलोकितेति पञ्चविंशालङ्काराश्चान्ये तारमन्द्रप्रसन्न-मन्द्रतारप्रसन्नक-आवर्तक - सम्प्रदान-विधुत-उपलोलक-उल्लासितेति सप्तालङ्काराश्चेत्थं त्रिषष्टिसंख्याका अलङ्काराः[1] परिगणिता अभ्युपगम्यन्ते ।

गमकः—

स्वरस्य कम्पो गमकः भेदाः पञ्चदशस्मृताः ॥

इत्यनुसारेण श्रुतिमधुरः, समनुरञ्जकश्च स्वरस्य कम्पः गमक शब्देन व्यपदिश्यते । अयं पञ्चदशविधोऽस्ति । (१) तिरिपः, (२) स्फुरितः, (३) कम्पितः, (४) लीनः, (५) आन्दोलितः, (६) वलिः, (७) त्रिभिन्नः, (८) कुरुलः (९) आहतः, (१०) उल्लासितः, (११) प्लावितः, (१२) गुम्फितः, (१३) मुद्रितः, (१४) नामितः, (१५) मिश्रितश्च ।

मूर्च्छनाः—

क्रमयुक्ताः स्वराः सप्तमूर्च्छनास्त्वभिसंज्ञिताः ।

(भ० नाट्यशास्त्रम्)

तथा च

क्रमात् स्वराणां सप्तानां आरोहश्चावरोहणम् ।
मूर्च्छनेत्युच्यते ग्रामद्वये ताः सप्तसप्त च ॥

(सं० र० १।४।९)

येन स्वरेण समुच्छ्रायः (समारम्भः) तेनैव स्वरेण यदा समापनं भवति, तदा सा मूर्च्छनेति नाम्ना विज्ञायते । इयं रागस्वरूपस्य पूर्णत्वेन परिचायिका भवति । सङ्गीतशिरोमणि ग्रन्थे पण्डितमण्डल्या स्वराणां प्रकृष्टत्वं समाख्यापयित्र्या मूर्च्छना शब्दस्य व्युत्पत्तिरित्थं प्रतिपाद्यते,

---

१. दक्षिणभारतीय सङ्गीतपद्धत्यां सरलिवरिस-जणृवरिस-दाड्डुवरिस-आदि नामभिरिमेऽलङ्काराः परिज्ञायन्ते । उत्तरभारतीयसङ्गीतपद्धत्यां, सरगम-मींड-मुरकी-गिटकिरी-खटका-जमजमा-बोलतान-आद्यभिधानैरमी तावदलङ्कारा अभिधीयन्ते ।

मोहोच्छ्रायाभिधायीयो मूर्च्छ धातुस्ततो ल्युटि ।
करणार्थे मूर्च्छनेति पदमत्र समुच्छ्रये ॥ इति ।

हरिपालदेवेन स्वप्रणीते सङ्गीतसुधाकरग्रन्थे तुम्बुरोः कोहलस्य च मूर्च्छनास्वरूपविषयकं मतमित्थं प्रकारेण समनूद्यते ।

श्रुतेर्मार्दवमेवस्यान्मूर्च्छनेत्याह तुम्बुरुः ।

अपि च

गायतां शृण्वतां चापि भवेद्रागामृते हृदे ।
मनसो मज्जनं यत्स्यान्मूर्च्छनेत्याहकोहलः ॥ इति ।

भरत-शार्ङ्गदेवादीनामभिमतानुसारेण षड्जग्रामे, मध्यमग्रामे च सप्त मूर्च्छना भवन्ति । षड्जग्रामीयाः सप्तमूर्च्छनाः–(१) उत्तरमन्द्रा, (२) रजनी, (३) उत्तरायता, (४) शुद्धषड्जा, (५) मत्सरीकृता, (६) अश्वक्रान्ता, (७) अभिरुद्गता च । मध्यमग्रामीयाः सप्तमूर्च्छनाः– (१) सौवीरी, (२) हरिणाश्वा, (३) कलोपनता, (४) शुद्धमध्या, (५) मार्गी, (६) पौरवी, (७) हृष्यका च ।

दत्तिल-मतङ्गादिमतानुसारेण मूर्च्छनाः पूर्णाः, षाडविताः, औडुविताः साधारणाश्चेति चतुर्विधाः सन्ति । शार्ङ्गदेव-पण्डितमण्डलीकुम्भराजादि-मतानुसारेण चेमाः शुद्धाः, अन्तरसहिताः काकलीसहिताः, अन्तरकाकली-सहिताश्चेति चतुर्विधाः प्रतिपादिता विद्यन्ते[1] ।

---

१. नारदीयशिक्षायां नारदेनापि मूर्च्छनाप्रकाराविभागाश्चेत्थं परिवर्णिताः सन्ति ।
नान्दीविशाला सुमुखी चित्रा चित्रवती सुखा ॥
बलाया चाथ विज्ञेया देवानां सप्त मूर्च्छनाः ॥ ९ ॥

आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी ॥
मैत्री हि बार्हती चैव पितृणां सप्तमूर्च्छनाः ॥ १० ॥

षड्जेतूत्तरमन्द्रास्याद्वृषभे चाभिरुद्गता ।
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता ॥ ११ ॥

मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे ॥
धैवते चापि विज्ञेया मूर्च्छनातूत्तरायिता ॥ १२ ॥

निषादाद्रजनी विद्यादृषीणां सप्तमूर्च्छनाः ॥ १३ ॥ इति ।

जातयः—

मूर्च्छनाभिरभिव्यक्तीकृतानां समानलक्षणानां रागाणां वैभिन्य-परिचायक-विशिष्टन्यासस्वरप्रधानलक्षणा जातयः सम्प्रतिपद्यन्ते। इमाः शुद्ध विकृतभेदेन द्विविधाः समाम्नाताः सन्ति।

तत्रशुद्धाजातयः-(१) षाड्जी, (२) आर्षभी, (३) गान्धारी, (४) मध्यमा, (५) पञ्चमी, (६) धैवती, (७) नैषादीच।

विकृता जातयः-(१) षड्जकौशिकी, (२) षड्जोदीच्यवा, (३) षड्जमध्यमा (४) गान्धारोदीच्यवा, (५) रक्तगान्धारी, (६) कौशिकी, (७) मध्यमोदीच्यवा, (८) कार्माखी, (९) गान्धार-पञ्चमी, (१०) आन्ध्री, (११) नन्दयन्ती च।

जातीनां त्रयोदशलक्षणानि—

(१) ग्रहस्वरः, (२) अंशस्वरः, (३) तारस्वरः, (४) मन्द्र-स्वरः, (५) न्यासस्वरः, (६) अपन्यासस्वरः, (७) संन्यासस्वरः, (८) विन्यासस्वरः, (९) बहुस्वरः, (१०) अल्पस्वरः, (११) अन्तरमार्ग-स्वरः, (१२) षाडवितस्वरः, (१३) औडुवितस्वरश्च।

रागाः—

स्वरवर्णविशिष्टेन ध्वनिभेदेन वा जनः।
रज्यते येन कथितः स रागः सम्मतः सताम्॥

(मतङ्गः)

इत्यनुसारेण स्वरवर्णविशिष्टः, ध्वनिभेदेन जनानुरञ्जकः विशिष्टस्वर-समूहोरागपदव्यपदेश्यः समाम्नातोऽस्ति।

उक्तञ्च दामोदरेण—

यस्य श्रवणमात्रेण रज्यन्ते सकलाः प्रजाः।
सर्वानुरञ्जनाद्धेतोः तेन राग इति स्मृतः॥

अपि च—

यैस्तु चेतांसि रज्यन्ते जगत् त्रितयवर्तिनाम्।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः॥

(शुभङ्करः)

भरत-कोहल-मतङ्ग-नारद-शार्ङ्गदेवादिप्राचीन-सङ्गीताचार्यैरमी रागाः दशविधाः प्रतिपादिताः सन्ति। ते चैते-(१) पञ्चविधाः ग्राम-रागाः, (२) अष्टविधा उपरागाः, (३) विंशसंख्याकाः शुद्धरागाः, (४) षण्णवतिसंख्याकाः भाषारागाः, (५) विंशसंख्याका विभाषा रागाः (६) चत्वार अन्तरभाषा रागाः, (७) अष्टौ रागाङ्ग रागाः (ग्राम-रागच्छायाऽत्मकाः), (८) एकादशभाषाङ्गरागाः (भाषारागच्छाया-रूपाः) (९) द्वादशक्रियाङ्गरागाः (भावाविष्करणप्रवणप्रयोगक्रियो-त्पन्ना), (१०) त्रय उपाङ्गरागाः (रागाङ्गानां छायाऽत्मकाः) च।

एषु ग्रामराग-शुद्धराग-उपरागाः मार्गरागान्तर्भूताः, भाषा-विभाषा-अन्तरभाषा रागाः भाषारागान्तर्गताः, रागाङ्ग-भाषाङ्ग-क्रियाङ्ग-उपाङ्गरागाः देशीयरागात्मकाश्चाभिमन्यन्ते।

पुरुषराग-स्त्रीराग (रागिणी) विभेदवर्गीकरणादिविषयकनिर्णयार्थं, जिज्ञासूनां कृते शिवमत-कृष्णमत-भरतमत-हनुमन्मत-सोमेश्वरमत-रागार्णवमत-कल्लिनाथमत-इन्द्रप्रस्थमतादीनां परिज्ञानं भृशमावश्यकं प्रतिभाति। परवर्तिसङ्गीतशास्त्रीयग्रन्थेषु रागाः सम्पूर्ण-षाडव-औडुवभेदेन त्रिविधाः परिवर्णिताः सन्ति। सम्पूर्णरागाणामारोहावरोहयोः सप्तस्वराः, षाडवरागाणामारोहावरोहयोः षट्स्वराः, औडुवरागाणामारोहावरोहयोः पञ्चस्वराश्चभवन्ति। अमीषामपि मिश्रितप्रकारानिम्नोद्दङ्किता वरीवृतति।

सम्पूर्णषाडवाः—एषु आरोहे सप्त तथाऽवरोहे षट्स्वरा भवन्ति।
षाडवसम्पूर्णाः—एतेषु आरोहेषट् तथाऽवरोहे सप्तस्वरा भवन्ति।
सम्पूर्णआडुवाः—अमीषु आरोहे सप्त तथाऽवरोहे पञ्च स्वरा भवन्ति।
औडुवसम्पूर्णाः—एषु आरोहे पञ्च तथाऽवरोहे सप्तस्वरा भवन्ति।
षाडवऔडुवाः—एतेषु आरोहेषट् तथाऽवरोहे पञ्च स्वरा भवन्ति।
औडुवषाडवाः—अमीषु आरोहे पञ्च तथाऽवरोहे षट्स्वरा भवन्ति।

मेल-राग-जाति-भेद-वर्गीकरणादिविषयमधिकृत्य विशेषतया नारद-शार्ङ्गदेव-गन्धर्वराज-लोचन-रामामात्य-सोमनाथ-पुण्डरीकविट्ठल-दामोदर-अहोबल-व्यङ्कटमखि-भावभट्ट-श्रीनिवास-कृष्णानन्द-भातखण्डे-प्रभृतिभिः सङ्गीताचार्यैस्तेषामनेकविधग्रन्थेषु वैज्ञानिकविधया विहितं विवरणं, सपरिकरं निरूपणञ्च नितरां समुपादेयं सम्प्रत्यपि प्रतिपद्यते।

मेलाः—

मेलः स्वरसमूहस्याद् रागव्यञ्जनशक्तिमान् ।

(अभिनव रागमञ्जरी)

माधवाचार्य-रामामात्य-व्यंकटमखि-भावभट्टादिभिः सङ्गीतसार-स्वर-मेलकलानिधि-चतुर्दण्डिप्रकाशिका-अनूपसङ्गीतरत्नाकरादि ग्रन्थेषु मेलानां लक्षण-विभेद-वर्गीकरणादिकं सविस्तरं विवृतं-समुपलभ्यते । अमी मेलाः द्विसप्ततिसंख्याकाः परिगणिताः सन्ति । किन्तु सम्प्रति तावदध्ययन-सौकर्यार्थमेते दशविधाः पञ्चदशविधावा परिनिश्चिताः सन्ति ।

तानाः —

द्वौ त्रयोवाऽपि चत्वारः स्युः ताना रञ्जकस्वराः ॥

(सङ्गीतपारिजातः)

तानाः स्युर्मूर्च्छनाः शुद्धाः षाडवौडुवितीकृताः ।

(सं० र० १।४।२७)

तत्र तानाः शुद्ध-कूटभेदेन द्विविधा वर्णिताः सन्ति । शुद्धताना अपि सम्पूर्णासम्पूर्णभेदेन द्विविधा भवन्ति । सप्तभिः स्वरैः सम्पूर्णाः तानाः प्रतन्यन्ते । असम्पूर्णाः तानाः एकस्वराः, द्विस्वराः, त्रिस्वराः, चतुःस्वराः, पञ्चस्वराः (औडुविताः), षट्स्वराः (षाडविताः) चेतिभेदेन षड्विधाः समाख्याता अभ्युपगम्यन्ते । कूटतानाश्च व्युत्क्रमोच्चारितस्वराः समभिधीयन्ते । चतुरकल्लिनाथस्य परिगणनाऽनुसारेण शुद्धतानाः ३२२५८२ संख्याकाः, कूटतानाश्च ३१७९२७ संख्या का भवन्ति । इत्थं सकलतया सर्वे तानाः ६४०५०९ संख्यायां परिगण्यन्ते ।

नायकोगायकश्चैव कलावांश्च तृतीयकः ।
गन्धर्वः पण्डितश्चैव शास्त्रकारश्च शिक्षकः ॥

इति स्वोपज्ञपद्यानुसारेण सङ्गीतज्ञा आचार्या वाग्गेयकाराः सप्तविधा वर्णिताः सन्ति । तत्र नायकः प्रत्ननूत्नसङ्गीतज्ञः, गायकः पारम्परिक-सङ्गीतेषु कुशलः, कलावान् गानक्रियासिद्धः, गन्धर्वः मार्गीयसङ्गीतज्ञः, पण्डितोहि सङ्गीतशास्त्रमर्मज्ञः, शास्त्रकारः साङ्गीतिकग्रन्थप्रणयने प्रवीणः, शिक्षकश्च सङ्गीतप्रशिक्षणे निपुणोभवति ।

देशीयं सङ्गीतं, समय-शासन-जनाभिरुच्यन्यतमपरिवर्तनानुसारेण परिवर्तितं समभूत्। भारतीय सङ्गीतेतिहासज्ञैः भारतीयदेशीयसङ्गीतस्य परिवर्तनसमयः स्थूलतया चतुर्धा विभज्यते।

(१) आर्यसमयः (वैदिककालादारभ्य वैक्रमदशमशतकान्तपर्यन्तम्)

(२) मोहम्मदीयसमयः (वै० एकादशशतकप्रारम्भतः वै० एकोनविंशशतकान्तं यावत्)

(३) आङ्ग्लसमयः (वैक्रमं विंशशतकं सम्पूर्णम्)

(४) भारतीयस्वातन्त्र्यसमयः (वैक्रम एकविंश शतक प्रारम्भानन्तरम्) च।

आर्यसमये, प्रथमं गान्धर्वसङ्गीतं मार्गसङ्गीतञ्चासीत्। ततऊर्ध्वं भजनात्मकध्रुवपदप्रधानसङ्गीतस्य प्राबल्येण प्रवर्तनमभूत्। अन्येष्वपि तात्कालिकेषु प्रबन्धेषु, सङ्गीयमानेषु जनसाधरणैरनुरञ्जकत्वेन भृशं समादृतायाः भगवद्भक्तिप्रवणायाः सङ्गीतशैल्या एव प्राधान्यमासीदिति प्रावगम्यते। एतत्समये समस्तभारते सङ्गीतपद्धत्याः द्वैतं, विसम्वादित्वञ्च न प्रतिभाति। साङ्गीतिकप्रबन्धेषु कतिपये प्रमुखा निम्नोद्दङ्किता आसन्। ते चामी—

(१) सूड प्रबन्धाः, (२) आलिप्रबन्धाः, (३) विप्रकीर्णप्रबन्धाश्च। तत्र सूडप्रबन्धाः द्विविधाः सन्ति। तेचैते—

(१) शुद्धसूडप्रबन्धाः (एला-करण-ढेङ्की-वर्तनी-झोम्बड-लम्भ-रास-एकतालीरूपेणाष्टविधाः)

(२) सालग सूडप्रबन्धाः (ध्रुव-मठ्य-प्रतिमठ्य निस्सारूक-अड्ड-रास-एकतालीभेदेन सप्तविधाः) च।

आलिप्रबन्धाश्चतुर्विंशविधा विद्यन्ते। ते चेमे—

(१) वर्णः, (२) वर्णस्वरः, (३) गद्यम्, (४) कैवाडः, (५) अङ्कचारिणी (६) कन्दः, (७) तुरङ्गलीलः, (८) गजलीलः, (९) द्विपदी, (१०) चक्रवालः (११) क्रौञ्चपदः, (१२) स्वरार्थः, (१३) ध्वनिकुट्टिनी, (१४) आर्या, (१५) गाथा, (१६) द्विपथः, (१७) कलहंसः, (१८) तोढकः, (१९) घटः, (२०) वृत्तम्, (२१) मातृका, (२२) रागकदम्बः, (२३) पञ्चतालेश्वरः, (२४) तालार्णवश्च।

विप्रकीर्णप्रबन्धाः षट्त्रिंशत् संख्याका वर्तन्ते। ते चैते—

(१) श्रीरङ्गः, (२) श्रीविलासः, (३) पञ्चभङ्गी, (४) पञ्चाननः, (५) उमातिलकं, (६) त्रिपदी, (७) चतुष्पदी, (८) षट्पदी (९) वस्तु, (१०) विजयः, (११) त्रिपथः, (१२) चतुर्मुखः, (१३) सिंहलीलः, (१४) हंसलीलः, (१५) दण्डकः, (१६) झम्पटः, (१७) कन्दुकः, (१८) त्रिभङ्गी, (१९) हरविलासः, (२०) सुदर्शनः, (२१) स्वराङ्कः, (२२) श्रीवर्धनः, (२३) हर्षवर्धनः (२४) वदनं, (२५) चच्चरी, (२६) चर्या, (२७) पद्धडी, (२८) राहडो, (२९) वीरश्रीः, (३०) मङ्गलाचारः, (३१) धवलः, (३२) मङ्गलः, (३३) ओवी, (३४) लोली, (३५) ढोल्लरी, (३६) दन्ती[1] च।

एतेषां प्राचीनप्रबन्धानामङ्गानि स्वर-पाट-ताल-तेन-पद-बिरुदादीनि भवन्ति स्म।

मोहम्मदीय समये, विशेषतया पूर्वार्द्धे (वै० १३५० अब्दपर्यन्तं) भारतीय सङ्गीते मोहम्मदीयशासकानां, गजनवी-घोरीगुलामादीनां शासनप्रभावः स्पष्टतया नोपलक्ष्यते। विविधासु प्रादेशिकासु भाषासु संस्कृतभाषायाञ्चोपनिबद्धाः प्रबन्धाः, ध्रुवपद-भजन-कीर्तनस्तोत्रादि-प्रधानास्तत्समये सङ्गीयन्ते स्म। एतेषु प्राचीनप्रबन्धेषु प्रयुक्तायां गायन-शैल्यां ग्रह-अंश-न्यास-स्वरस्थान-रागालाप-रूपकालाप-ध्रुवा-अन्तरा आभोग-अलङ्कारादीनां विशेषतया सन्निवेशोभवति स्म। एतदनन्तरं अलाउद्दीन खिल्जीप्रभृतिमोहम्मदीयानां शासनप्रभावैः भारतीय सङ्गी-तस्य परिवर्तनं, समारब्धम्। परकीयशासनप्रभावैरनुप्राणितमिदं साङ्गी-तिकं परिवर्तनं, न तथा दक्षिणभारते, यथोत्तरभारते समभूत्। वैक्रमे चतुर्दशशतके तावदलाउद्दीन खिल्जीशासकस्य राजगायकेन अमीरखुसरो नामक सङ्गीतज्ञेन विहितैः खयाल-कव्वाल्यादि-पारसीक-मोहम्मदीय गायनशैलीनां समाविष्करणैस्तत्प्रचारैश्च विशुद्धं प्रतनं भारतीयं सङ्गीतं समाक्रान्तं, सम्मिश्रितञ्चाभूत्। प्राचीनवीणाऽनुकृति सहतार (सतार) वाद्यमपि तेनैवाविष्कृतमनुश्रूयते। तदनु जौनपुरराज्यशासकः सुल्तान हुसैन शर्कीमहोदयः सङ्गीतविशेषज्ञः, वैक्रमे षोडशशतके खयालगायन-

---

१. एतेषां लक्षणादिविषयको विस्तरः सङ्गीतरत्नाकरस्य प्रबन्धाध्याये विहित उपलभ्यते।

शैल्याः परिष्करणं, लोकानुरञ्जकविधया तत्प्रवर्तनञ्च सञ्चकार। अस्मिन्नेव शतके ग्वालियरनरेशोमानसिंहतोमरश्चाधुनिकध्रुवपद-ध्रुपदशैल्याः प्रवर्तनं समकार्षीत्। वैक्रमे अष्टादशशतके शोरीमीयांनामकसङ्गीतज्ञेन टप्पा-ठुमरी-आदि-गायनप्रबन्धप्रकाराणां समाविष्करणं संव्यधायि। इत्थं विधया, उत्तरभारते खयाल-तराना-त्रिवट-चतुरङ्ग-ध्रुपद-टप्पा-होरी-ठुमरी-दादरा-सादरा-गजल-कव्वाली-रेखता-खमसा-बैत-रुबाई-कजरी चैती-रसिया-लेज-भजन-संस्कृतप्रबन्ध-अष्टपदी-पद-दोहा-चौपाई-छप्पयप्रभृतिशास्त्रीय-अर्धशास्त्रीय-पादशास्त्रीय-सङ्गीतप्रकाराः न्यूनाधिकतया पारसीक सङ्गीतप्रभावपरिलब्धप्रभवाः, जनानुरञ्जकाश्च सन्दृश्यन्ते। परकीयशासनस्य सर्वाङ्गीणसंस्पृष्टप्रभावेण भारतीयलक्ष्यलक्षणसङ्गीतस्यैवं विधं महत्परिवर्तनमुत्तरभारते दक्षिणभारते च सम्भवितुं स्वाभाविकमासीत्। किन्तु दक्षिणभारते, विद्याऽरण्य (माधवाचार्य)--रामामात्य-सोमनाथ-पुण्डरीकविट्ठल-सोमनार्य-व्यङ्कटमखि - गोपालनायकप्रभृतयः सङ्गीतज्ञाः महता प्रयासेन, यथाकथञ्चिद् विशुद्धभारतीयसाङ्गीतिक-लक्ष्यलक्षणशास्त्रस्य पुनरुज्जीवनं समकार्षुः। अतोहि सम्प्रत्यपि दक्षिण-भारतीयसङ्गीतं (कर्नाटकसङ्गीतं), उत्तरभारतीय (हिन्दुस्तानी) सङ्गीतापेक्षया समधिकं, भारतीयसङ्गीतशास्त्रानुकूलं, न्यूनञ्च पारसीकसङ्गीतप्रभावाक्रान्तं श्रुतिगोचरीक्रियते।

अङ्ग्लसभये दक्षिणभारत उत्तरभारते च भारतीयसङ्गीतस्य शास्त्रीयं, कलात्मकञ्चस्वरूपं तथैव, यथा मोहम्मदीयशासनसमय आसीत्। लोकसङ्गीतस्य, वृन्दसङ्गीतस्य वाऽङ्ग्लशासनप्रभावेण, आङ्ग्लादिपाश्चात्यसंसर्गेण, क्रिस्तधर्मप्रचारेण वा किञ्चिद्रूपान्तरं समभूत्। एतत्समयस्योत्तरार्धे, चलच्चित्रपटीयं पाश्चात्यसङ्गीतानुकरणप्रवणं सङ्गीतं, वाद्यवृन्दवादनं, रॉक-एण्ड-रोल-ट्विस्ट-डिस्को-आदिपाश्चात्यनृत्यानुकरणञ्च सामाजिक जनमनांसि समनुरञ्जयन्तिस्म।

भारतीयस्वातन्त्र्यसमये भारतीयसुयोग्यशासकाः, सन्नियुक्तसङ्गीत-परमार्शकाश्च सङ्गीतमहोत्सवादिभिः शास्त्रीयसङ्गीतज्ञेभ्यः प्रातिवार्षिकसम्मानदानादिभिः दक्षिणोत्तरोभयविधशास्त्रीयसङ्गीतस्य, वाद्यवादनस्य, नृत्यादीनाञ्चाभिवृद्धिं, अर्धशास्त्रीयसङ्गीतस्य, लोकसङ्गीतस्य च समुन्नयनञ्च विदधति। समयेऽस्मिन् विशेषतया पाश्चात्य-

सङ्गीतानुप्राणितस्य चलच्चित्रपटीयसङ्गीतस्य तावदासेतुहिमाचलमा-वङ्गगुर्जरञ्च समानरूपेण जनसाधारणानुरञ्जकत्वं नितरां विशिष्यते।

वाद्यानि—

तत्र तावद् गायननृत्यादिसहायरूपेण, स्वतन्त्रतया वा वाद्यानां साङ्गीतिकं महत्त्वं भृशं वरीवर्ति। स्वातिनारदसंवाद-भरतनाट्यशास्त्र-सङ्गीतमकरन्द – सङ्गीतरत्नाकर – वाद्यरत्नकोश -- रागविबोध – रस-कौमुदी – रागकल्पद्रुमादिविविधसङ्गीतशास्त्रीयग्रन्थेषु प्राचीनवाद्यानां सविस्तरं परिवर्णनं समुपलभ्यते। सङ्गीतशास्त्रानुसारेण यावन्ति प्रतनानि वाद्यानि द्विधाविभज्यन्ते। (१) रागवाद्यानि, (२) ताल-वाद्यनि च। रागवाद्यान्यपिद्विविधानि वर्णितानि सन्ति। (१) तत-वाद्यानि, (२) सुषिरवाद्यानि च। ततवाद्येषु समस्तवीणाप्रकारा[1] अन्तर्भवन्ति।

सुषिरवाद्येषु, पाव-पाविका-मुरली-मधुकरी-काहला-तुण्डकिनी-चुक्का-शृङ्ग शङ्खादीनि परिगणितानि सन्ति।[2]

---

१. प्राचीनसमये ततवाद्यरूपेण सम्प्रयुज्यमानाया वीणायाः वर्णनं, ऋक्वाजसनेयी-संहितयोः, तैत्तिरीयशतपथब्राह्मणयोः, ऐतरेयारण्यके, वृहदारण्यकोपनिषदि च सान्दर्भिकविधया विहितमुपलभ्यते। सङ्गीतमकरन्द–सङ्गीतरत्नाकर–वाद्य-रत्नकोश-रागविबोध – स्वरमेलकलानिधि –रसकौमुदी–रागकल्पद्रुम–वीणाप्र-पाठक–आदिग्रन्थेषु नैकविधानां वीणानां नामानि द्विषष्टि संख्याकानि समुप-लभ्यन्ते। पण्डिताराध्यग्रन्थे पाल्कुरिकिसोमनाथेनापि वीणायाः द्वाविंशाभि-नवप्रकारा उल्लिखिताः सन्ति। आधुनिकानि ततवाद्यानि–रुद्रवीणा–तडिद्वीणा–विचित्रवीणा – तञ्जौरवीणा–गोटुवाद्यं-दत्तात्रेयवीणा–सामान्य-वीणा-तरफसतार–सरोद–सुरबहार–सुरश्रृंङ्गार – सन्तूरवाद्य – स्वरमण्डल–गिटार–तानपूर–सारङ्गी– दिलरुबा – इसराज ह्वायलिन – मेण्डोलिन - बेंजो आदीनि।

२. आधुनातनानि सुषिरवाद्यानि-मुरली-बांसुरी-तुरतुरी-नागस्वर-मुखवीणा-तूर्य-सुन्दरी-काहल-श्रीचिह्न-शहनाई-तारशहनाई-शंख-श्रृंग-बैन्ड-क्लारिओनेट-ट्रम्पेट-माऊथआर्गन-आर्गन-हार्मोनियम-सँक्सोफोन-आदीनि।

तालवाद्यानि च द्विविधानि वरीवृतति। (१) अवनद्धवाद्यानि, (२) घनवाद्यानि च। अवनद्धवाद्येषु पटह-मर्दल-हुड्क्का-करटा-घट-घडस-ढवस-ढक्का-कुडुक्का-कुडुवा-रुञ्झा-डमरुक-डक्का-मण्डिडक्का-डक्कुली-सेल्लुका-झल्लरी-भाण-त्रिवली-मृदङ्ग-मुरज दुन्दुभि-भेरी-निःसाण-तुम्बक्यादीनि परिगण्यन्ते।[1]

घनवाद्येषु तालवाद्य-कांस्यतालवाद्य-घण्टिका-क्षुद्रघण्टिका-जय-घण्टिका-कम्रा शुक्ति-पट्टवाद्यादीन्यन्तर्भवन्ति।[2]

तालः—

तालस्तल प्रतिष्ठायां इतिधातोर्घञिस्मृतः।
गीतं वाद्य तथा नृत्यं यतस्ताले प्रतिष्ठितम्॥

(सं०र० ५।२)

इति शार्ङ्गदेवप्रतिपादितदिशा तालवाद्यविषयीभूतस्य तालस्य महत्त्वं गीत-वाद्य-नृत्येषु जीवातोरिवानितरसाधारणं प्रतिभाति। तालमन्तरा सङ्गीतस्य नादमाधुर्यं, लयलालित्यं, श्रुतिसौष्ठवञ्च नानुभूयते। तौर्यत्रिकसङ्गीतस्वरूपपरिरक्षणार्थं, लघुगुरुप्लुताद्यक्षरैस्तालाङ्गानि समुद्भूतानि सन्ति। प्राणिषु हृद्स्पन्दनमिव सङ्गीतेषु कालमानात्मकं तालस्पन्दनं सजीवत्वंमभिरामत्वञ्च समावहति।

काल-अङ्ग-क्रिया-मार्ग-जाति-कला-ग्रह-लय-यति-प्रस्तारेतिदशप्राणास्तालस्य समाख्याताः सन्ति। प्रतने समये लब्धप्रचाराणां तालानां परिगणनं नन्दिकेश्वर प्रणीते भरतार्णवग्रन्थे द्वादशोत्तरशत (११२) संख्यायां विहितमस्ति। एतर्हि दक्षिणोत्तरभारते सङ्गीतेषु सम्बद्धाः प्रचलितास्ताला अल्पसंख्याका एव वरीवृतति।

---

१. साम्प्रतिकानिचावनद्धवाद्यानि-ढोल-ढोलक-तबला-डग्गा-मृदङ्ग-पखावज-खञ्जरी-कञ्जीरा-डमरु-कुन्तल-किरिक्कट्टि-जुमिडिका-दासरिका-तप्पट्टा-घट-तुमुक्कु-पम्बै-तबुला-डिंडिम-शुद्ध-मद्धल-उडुक्क-भेरी-नगाडा-चौघडा-ड्रम आदीनि।

२. आधुकानि घनवाद्यानि-घडी-घण्टा-मञ्जीरा-झान्ज-चिपली-घुंघरु-जलतरङ्ग-काष्ठतरङ्ग-धातुतरङ्ग-बुलबुलतरङ्ग-नगाडातरङ्ग-आदीनि।

नर्तनम्

नाट्यं नृत्यं तथा नृत्तं त्रिविधं नर्तनं स्मृतम् ।

सर्वतः प्राथम्येन भगवता चतुराननेन नाट्य-नृत्य-नृत्तात्मकं नर्तनं, तण्डुना नन्दिना नटराजप्रवर्तितं ताण्डवं, भगवत्या पार्वत्या च लास्यं भरतमुनये समुपदिष्टान्यासन्नित्यवगम्यते । तदनु भरतेन नाट्यवेदात्मकमिदं नर्तनशास्त्रं स्वप्रणीते नाट्यशास्त्रग्रन्थे वैस्तर्येण विवृतमुपलभ्यते । ततोहि दत्तिल-राहल-शार्दूल-शार्ङ्गदेव-ज्यायसेनापति-शृङ्गारशेखर-सोमनार्य-कुम्भराज-पुण्डरीकविट्ठल-तुलाजीराज-प्रभृतिसङ्गीतज्ञैस्तैः प्रणीतेषु नर्तनशास्त्रीयग्रन्थेष्विदमधिकृत्य सपरिकरं निरूपणं कृतमस्ति । अमीषु ग्रन्थेषु नर्तनं त्रिविधमाख्यातं विद्यते । (१) नाट्यं, (२) नृत्यं, (३) नृत्तञ्च । नाट्यं हि आङ्गिकवाचिक-आहार्य सात्त्विकेति चतुर्विधाभिनयैर्युतं, रसाभिव्यक्तिजनकं समाख्यातमस्ति । नृत्यं तु केवलाङ्गिकाभिनयैर्भावाभिव्यञ्जकं संख्याहृत्तं वर्तते । नृत्तञ्च चतुर्विधाभिनयरहितं, अङ्ग-प्रत्यङ्ग-उपाङ्गानां विक्षेपात्मकं प्रतिपादितं प्रतिपद्यते । ताण्डवं, लास्यञ्च नृत्यनृत्तान्यतरस्यावान्तरभेदाववगम्येते ।

शार्ङ्गदेवेन ताण्डवमित्थंविधया लक्षितमस्ति ।

करणैरङ्गहारैश्च प्राधान्येन प्रवर्त्तितम् ।
तण्डूक्तमुद्धतप्रायप्रयोगं ताण्डवं मतम् ॥

(सं० र० ७।३१)

लास्यं च शार्ङ्गदेव इत्थं लिलक्षयति ।

लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम् ॥

(सं० र० ७।३२)

नृत्तमपि विषम-विकट-लघु भेदेन त्रिविधमाख्यातमस्ति । शार्ङ्गदेव एतेषां लक्षणानि तावदित्थं निरूपयति ।

विषमं विकटं लघ्वित्यन्ये भेदत्रयं विदुः ।
नृत्तस्य, तत्र विषमं स्यादृजुभ्रमणादिकम् ॥
विरूपवेशावयवव्यापारं विकटं मतम् ।
उपेतं करणैरल्पैरञ्चिताद्यैर्लघुस्मृतम् ॥

(सं० र० ७।३३-३४)

नृत्यादिष्वाङ्गिकाभिनयार्थं समपेक्षितानि अङ्ग-प्रत्यङ्ग--उपाङ्गानि निम्नोट्टङ्कितानि समाख्यातानि सन्ति। तानि चेमानि—

अङ्गानि—शिरः, हस्तौ, वक्षः, पार्श्वे, कटीतटं, पादौ च।
प्रत्यङ्गानि—ग्रीवा, बाहू, पृष्ठं, उदरं, उरू, जङ्घे च।
उपाङ्गानि—दृष्टिः, भ्रूः, पुटं, तारा, कपोलौ, नासिका, अनिलः, अधरः, दन्ताः, जिह्वा, चिबुकं, वदनं, पार्ष्णिः, गुल्फः, कराङ्गुल्यः, पादाङ्गुल्यः, पादतलञ्च।

इत्थं भारतीयं प्रतनं नर्तनं जनानुरञ्जकं सदपि, परमेशभक्तिप्रवणं, सात्त्विकं प्रावर्ह्येणासीत्[1]।

यथा नयति कैलासं नगं गानसरस्वती।
तथा नयति कैलासं न गङ्गा न सरस्वती॥

इति सूक्त्यनुसारेण सरसमानवजीवने सङ्गीतं, तौर्यत्रिकं नितरां महनीयं पदं समधिरोहति। सङ्गीतस्य कला-अभिव्यक्ति-पक्षेण नाद-माधुर्यं, लयनैपुण्यं, अभिनयकौशलञ्च भूम्ना समपेक्ष्यते। चतुःषष्टि-कलाऽन्यतमासु ललितकलासु (Fine Arts) नादब्रह्मानन्दसन्दोहानुभूतिजनकस्य सङ्गीतस्य सार्वकालिकं सार्वभौमञ्च महत्त्वं सम्प्रत्यपि वरीवर्ति। इत्थं श्रुतिसुखदं, नादमधुरं, सहृदयहृदयाल्हादकं, मानवा-मानवानुरञ्जकं सङ्गीतं, सिद्धान्तकलापक्षयोः प्रतिपादकं सङ्गीतशास्त्रं पूर्णत्वेन विवृणोतीति कृत्वा संस्कृतवाङ्मयेषु नूनमुच्चैःपदमलङ्करोति।

सङ्गीतशास्त्रीयाः प्रमुखाः ग्रन्थाः —

औमापतम्[2]-उमापतिः (सम्भावितः) (वि० पू० कालिकः),

---

१. सम्प्रति सन्दृश्यमानाः, परिलब्धप्रचुरप्रचाराः प्रमुखभारतीय नृत्यप्रकारा निम्नोट्टङ्किता विज्ञायन्ते। भरतनाट्यं, मोहिनीआदृञ्च तामिलनाडु प्रदेशे, कुचिपुडी नृत्यं आन्ध्रप्रदेशे, कथाकलिनृत्यं केरलप्रदेशे, ओडिसीनृत्यं उत्कल-प्रदेशे, कथकनृत्यं उत्तरप्रदेशे, मणिपुरीयंनृत्यं आसामप्रदेशे च प्रावर्ह्येण प्रच-लितं सन्दृश्यते। एतदतिरिक्ताः नानाविधा नृत्य-नृत्त-प्रकारा लोकनृत्यात्मकाः प्रदेशविशेषेषु जनानुरञ्जकत्वमापन्नाः समवलोक्यन्ते।

२. अस्मिन्नष्टत्रिंशदध्याया उपलभ्यते।

सङ्गीतशास्त्रम्[1]-कश्यपः (वि० पू० का०), शुक्रमतम्[2]-शुक्राचार्यः (वि० पू० का०), सङ्गीतशास्त्रम्[3]-तुम्बरुः (वि० पू० का०), आञ्जनेयसंहिता[4] (हनुमन्मतम्)-आञ्जनेयः (वि० पू० का०), याष्टिकसंहिता[5]-याष्टिकाचार्यः (वि० पू० का०), गन्धर्वशास्त्रम्[6]-गन्धर्वाचार्यः (वि० पू० का०), नन्दिकेश्वरसंहिता[7]-नन्दिकेश्वरः (वि० पू० का०), सङ्गीतरत्नाकरः-वामदेवऋषिः (वि० पू० का०), सङ्गीतदर्पणः शृङ्गिऋषिः (वि० पू० का०), सङ्गीतप्रदीपः-शौनकः (वि० पू० का०), सङ्गीतप्रभा[8]-सनत्कुमारः (वि० पू० का०), नाट्यशास्त्रम्-भरतमुनिः (वि० पू० १ श०), दत्तिलमतम् (नृत्तलक्षणम्)-दत्तिलः (वि० पू० प्र० श०), कोहलमतम्-कोहलः (वि० पू० १ श०), विशाखिलम्[9]-विशाखिलः (वि० पू० १ श०), रावणीयम्-रावणाचार्यः (वि० पू० १ श०), बृहद्देशीयम्-मतङ्गः (वै० ६ श०), सङ्गीतोपनिषद्सारः-सुधाकलशः (वै० १० श०), पञ्चमसारसंहिता, चत्वारिंशद्रागनिरूपणं, नारदीयशिक्षा, सङ्गीतमकरन्दश्च-नारदः (अपरः) (वै० ११ श०), सरस्वती हृत्दयालङ्कारः (भरतभाष्यम्), ग्रन्थमहार्णवश्च-नान्यदेवः (वै० १२ श०), मानसोल्लासः (अभिलषितार्थचिन्तामणिः) सोमेश्वरः (भूमल्लः) (वै० १२ श०), सङ्गीतचूड़ामणिः जगदेकमल्लः (वै० १२ श०), सङ्गीतसुधाकरः-हरिपालदेवः (वै० १३ श०), सङ्गीत-रत्नावली-सोमदेवराजः (वै० १३ श०), सङ्गीतरत्नाकरः[10]-शार्ङ्गदेवः

---

१. मतङ्गशार्ङ्गधराभ्यामुल्लिखितमस्ति ।

२. इदं शृङ्गारशेखरेणाभिनयभूषणे समुल्लिखितमस्ति ।

३. अस्य सङ्गीतसुधाकरग्रन्थे समुल्लेख उपलभ्यते ।

४ अस्याः पद्मपुराण उल्लेखोऽस्ति ।

५. इयं मतङ्गेनोद्धृताऽस्ति ।

६. इदं यामलाष्टके समुद्धृतम् ।

७. अस्याः सिंहभूपालकृतसङ्गीतरत्नाकरस्य टीकायामुल्लेखोऽस्ति ।

८. सङ्गीतरत्नाकर-सङ्गीतदर्पण-सङ्गीतप्रदीप-सङ्गीतप्रभेति चतुर्णां ग्रन्थानां समुल्लेखः पण्डितधनराजशास्त्रिवङ्गविश्वकोशकारो विदधाति ।

९. मतङ्गनान्यदेवाभ्यां स्वीययोर्ग्रन्थयोः समुद्धृतमुपलभ्यते ।

१०. अस्य कुम्भकर्ण-सिंहभूपाल-हंसभूपाल-कल्लिनाथ-केशवादयः टीकाकृतः सन्ति ।

(वै० १३ श०), गीतरत्नावली, वाद्यरत्नावली, नृत्यरत्नावली च-ज्यायसेनापतिः (वै० १३ श०), षड्रागचन्द्रोदयः-जयदेवः (वै० १३ श०), सङ्गीतसमयसारः पार्श्वदेवः (वै० १३ श०), शारदीयम्-शारदातनयः (वै० १४ श०), शृङ्गारहारः-हम्मीरः (वै० १४ श०), रसतत्त्वसमुच्चयः-अल्लराजः (वै० १४ श०), सङ्गीतसारः-माधवाचार्यः (वै० १४ श०), शम्भुराजीयम्-शम्भुराजः (वै० १४-१५ श०), आनन्दसञ्जीवनम्-मदनपालः (वै० १५ श०), सङ्गीतालोकः-भुवनानन्दः (वै० १५ श०), सङ्गीतमुक्तावली-देवेन्द्रभट्टः (वै० १५ श०), सङ्गीतदीपिका (सङ्गीतचन्द्रिका)-भट्टमाधवः (वै० १५ श०), सङ्गीतचन्द्रः-विप्रदासः (वै० १५ श०), सङ्गीतचिन्तामणिः-वेमभूपालः (वै० १५ श०), सङ्गीतसुधाकरः-सिंहभूपालः (वै० १५ श०), सङ्गीतशिरोमणिः-पण्डितमण्डली (वै० १५ श०), सङ्गीतराजः (सङ्गीतमीमांसा), नृत्यरत्नकोशः, वाद्यरत्नकोशश्च-कुम्भराजः (वै० १५ श०), रागतरङ्गिणी-लोचनकविः (वै० १५ श०), सङ्गीतमुक्तावली-देवण्णभट्ट (वै० १५ श०), स्वरमेलकलानिधिः-रामामात्यः (वै० १६ श०), रागरत्नाकरः-गन्धर्वराजः (वै० १६ श०), रागविबोधः-सोमनाथः (वै० १७ श०), सद्रागचन्द्रोदयः, रागमाला, रागमञ्जरी, नर्तननिर्णयः, रागनारायणः, सङ्गीतवृत्तरत्नाकरः, विठ्ठलीयञ्च-पुण्डरीकविठ्ठलः (वै० १७ श०), स्वररागसुधार्णवः-सोमनार्यः (वै० १७ श०) सङ्गीतदर्पणः-दामोदरपण्डितः (वै० १७ श०), सङ्गीतसुधा रघुनाथगोविन्ददीक्षितौ (वै० १७ श०), संग्रहचूडामणिः-गोविन्दः (वै० १७ श०), सङ्गीतसूर्योदयः-लक्ष्मीनारायणः (वै० १७ श०), सङ्गीतपारिजातः-अहोबलभट्टः (वै० १८ श०), चतुर्दण्डिप्रकाशिका-व्यङ्कटमखी (वै० १८ श०), हृदयकौतुकम्, हृदयप्रकाशश्च-हृदयनारायणदेवः (वै० १८ श०), अनूपविलासः, अनूपाङ्कुशः, अनूपसङ्गीतरत्नाकरश्च-भावभट्टः (वै० १८ श०), रागलक्षणं, चतुर्दण्डिलक्ष्यञ्च-साहजीराजः (वै० १८ श०), सङ्गीतसारामृतं, नाट्यवेदागमश्च-तुलाजीराजः भोसले (वै० १९ श०), रागतत्त्वविबोधः-श्रीनिवासः (वै० १९ श०), रसकौमुदी-श्रीकण्ठः (वै० १९ श०), सङ्गीतसुन्दरः-सदाशिवदीक्षितः (वै० १९ श०) सङ्गीतसारः-प्रतापसिंहदेवः (वै० १९ श०), रागकल्पद्रुमः-कृष्णानन्दव्यासः (वै० १९ श०),

सङ्गीतचन्द्रिका, सङ्गीतकल्पद्रुमाङ्कुरश्च-अप्पातुलसी (वै० २० श०), लक्ष्यसङ्गीतं, अभिनवरागमञ्जरी च – विष्णुनारायणभातखण्डे (वै० २० श०) च।

अतिरिक्ताः केचन ग्रन्थाः—

गीतालङ्कारः-अनन्तनारायणः, नाददीपिका-भट्टाचार्यः, भरतकोशः-रामकृष्णकविः, मेलरागमालिका-महावैद्यनाथशिवः, रागकुतूहलम्-रामकृष्णभट्टः, रागचन्द्रोदयः-विमलः, रागविचारः-श्रीरामः, रागादिस्वरनिर्णयः-रघुनाथदासप्रसादः, श्रुतिभास्करः-भीमदेवः सङ्गीतकल्पतरुः-गणेशदेवः, सङ्गीतचिन्तामणिः (सङ्गीतामृतम्)-कमल लोचनः, सङ्गीतदर्पण-हरिवल्लभः, सङ्गीतदामोदरः-शुभङ्करः, सङ्गीतदीपिका-निम्बभूपालः, सङ्गीतनारायणः पुरुषोत्तममिश्रः, सङ्गीतमकरन्दः-वेदाचार्यः, सङ्गीतसारोद्धारः-हरिभट्टश्च।

अन्येच ग्रन्थाः—

ताननिघण्टुः, मेलाधिकारलक्षणं, रागकौतुकं, रागचन्द्रोदयः, रागप्रस्तारः, रागमाला, रागलक्षणं, रागविवेकः, रागादिध्यानकथनं, रागार्णवः, वादिमत्तगजाङ्कुशं, सङ्गीतकल्पतरुः, सङ्गीतपुष्पाञ्जलिः, सङ्गीतमुद्रा, सङ्गीतरत्नमाला, सङ्गीतराघवं, सङ्गीतविनोदः, सङ्गीतशिरोमणिः, सङ्गीतसर्वार्थसारसंग्रहः, सङ्गीतसागरः, सङ्गीतसारकलिका, सङ्गीतसारावली, सङ्गीतसीकरः, सङ्गीतसुधा, सङ्गीतसोपानं, सप्ताङ्गलक्षणं, स्वरप्रस्तारः, स्वरमञ्जरीचेत्यादयः।

रागवाद्यसङ्गीतविषयकाश्च ग्रन्थाः—

मुरलीप्रकाशः, वाद्यशास्त्रं, विततवाद्यशिक्षा, वीणाप्रपाठकः, वीणावाद्यलक्षणं, सप्तरज्जुनीविपञ्चीसाधना, स्वातिनारदसंवादश्चेत्यादयः।

तालवाद्यविषयकाः ग्रन्थाः—

ताललक्षणम्-तण्डुः, तालदीपिका-टिम्मभूपालः, तालदशप्राणदीपिका-गोविन्दपण्डितः, अष्टोत्तरशतताल लक्षणं, जातिः (तालग्रन्थः), मृदंगसागरः, तालदीपिका, तालप्रकाशः तालप्रस्तारः, तालप्रस्थम्, तालमञ्जरी, तालमार्तण्डः, तालादिलक्षणम्, तालार्णवश्चेत्येवमादयः।

नर्तन (नाट्य) सङ्गीतविषयकाः कतिपयेग्रन्थाः

नाट्यशास्त्रम्-भरतमुनिः (वि० पू० १ श०), भरतार्णवः-नन्दि-

केश्वरः (वि० पू० १ श०), नृत्तलक्षणम्-दत्तिलः (वि० पू० १ श०), भरतवार्तिकम्-राहलः (वै० ५ श०), हस्ताभिनयः-शार्दूलः (वै० ५ श०), नृत्तरत्नावली-ज्यायसेनापतिः (वै० १३ श०), अभिनयभूषणम्-शृङ्गारशेखरः (वै० १४ श०), नाट्यचूडामणिः सोमनार्यः (वै० १४ श०), नृत्यरत्नकोशः-कुम्भराजः (वै० १५ श०), नर्तननिर्णयः, सङ्गीतवृत्तरत्नाकरः, विठ्ठलीयञ्च-पुण्डरीकविठ्ठलः (वै० १७ श०), नाट्यवेदागमः-भोसलेतुलाजीराजा (वै० १९ श०), नृत्यभारती-आचार्यसुधाकरः (वै० २० श०) च ।

अन्ये च ग्रन्थाः—

अभिनवभरतसारसंग्रहः-मम्मडिचिक्कभूपालः, नृत्यरत्नावली-गणपतिदेवसेनः, नृत्याध्यायः-अशोकमल्लः, मतङ्गभरतम्-लक्ष्मणभास्करः, भरतशास्त्रम्-रघुनाथः, भरतसारसंग्रहः-चन्द्रशेखरश्च ।

अपरे च ग्रन्था :—

अभिनयदर्पणः, अभिनयमुकुरः, अभिनयलक्षणम्, अभिनयादिविचारः, अर्जुनभरतम्, आदिभरतम्, दत्तिलकोहलम्, नक्षत्राद्यभिनयलक्षणम्, नृत्यनिरूपणम्, नृत्यसंग्रहः, भरतलक्षणम् भरतशास्त्रसङ्गीतम्, लास्यपुष्पाञ्जलिः, हस्तलक्षणम्, हस्तलक्षणदीपिकाचेत्यादयः[1] ।

---

१. अमीषु बहवोग्रन्थाः तञ्जावूर-अड्यार-मदरास-मैसूर-त्रिवेन्द्रम-बीकानेर-मुंबई-पुणें-वटोदरा-होशियारपुर-जम्मू-वाराणसी-कलिकाता-लन्दन - ऑक्सफोर्ड-बर्लिन लिप्झिक-आदिनगरस्थितराजकीयहस्तलिखित पुस्तकालयेषु सुरक्षिता वरीवृतति ।

अर्थवेदः (अर्थशास्त्रम्-राजनीतिशास्त्रम्)

धर्ममर्थञ्च कामञ्च प्रवर्तयति पाति च ।
अधर्मानर्थविद्वेषान् इदं शास्त्रं निहन्ति च ॥

(कौ० अर्थशास्त्रम् १५।१८०।१)

अर्थशास्त्रन्तावदथर्ववेदस्योपवेद अर्थ वेदोऽस्ति । उपवेदत्वेनास्य प्रतनत्वं निःसन्दिग्धतया प्रतिपद्यते । वेदेषु विशेषतयाऽथर्ववेदे प्रमुखाणां तावदर्थशास्त्रीयविषयाणां सूत्रात्मकं सान्दर्भिकं विवरणं समुपलभ्यते । वेदाङ्गान्यतमेषु धर्मसूत्रेषु प्रावर्ह्येण गौतम-बौधायन-वसिष्ठ-धर्मसूत्रेषु राजधर्माऽदीनां प्रासङ्गिकं परिवर्णनं विहितं वरीवर्ति । महाभारतादीतिहासादिषु, महापुराणादिषु चार्थशास्त्रीयराजनीतिसिद्धान्तानां, राजधर्मादीनां सविस्तरं निरूपणमदभ्रसान्दर्भिकविधया विहितमभ्युपगम्यते । मन्वादिप्रणीतासु स्मृतिषु च राजधर्मादीनां सपरिकरं विवेचनं कृतमस्ति । इत्थं पुरातनसमयेऽपि भारतीयानां राजनीतिविषयकं ज्ञानं परिशुद्धं प्रौढ़तममासीदत्र विषये न काऽपि संशीतिः प्रतिभाति ।

महाभारतस्य शान्तिपर्वगतसन्दर्भानुसारेण सर्वतः प्राथम्येन धर्म-अर्थ-काम-त्रिवर्गशास्त्रं वेधा व्यधायि । तदनन्तरं तत्रभगवान् भवो भवानीपतिर्विरिञ्चिविरचितस्य त्रिवर्गशास्त्रस्य सारभूतं दशसहस्राध्याय-परिमाणं, विशालं वैशालाक्ष नामकं ग्रन्थं व्यरीरचत् । ततऊर्ध्वं सहस्राक्षेण शक्रेण शर्वाणीकान्तप्रणीतस्य वैशालाक्ष ग्रन्थस्य संक्षेपं संविधाय पञ्चसहस्राध्यायेषु समनुबद्धो बाहुदन्तक नामको ग्रन्थः संव्यरचीत्यनु श्रूयते । तदनु तदनुप्राणितैः बृहस्पति[२]-उशना-पिशुन-बुध-वैशम्पायन-कात्यायन-किञ्जल्क-विदुर-युधिष्ठिर-चारायण-मनु-पराशर-काश्यप-कणिक-भरद्वाज-विशालाक्ष-बाहुदन्तीपुत्र -कौणपदन्त - वातव्याधिप्रभृतिभिरर्थशास्त्राचार्यैः, विष्णुगुप्तपूर्वसमयसमुद्भूतैरमुं राजनीतिविषयं समधिकृत्यार्थशास्त्रीय-

---

१. अर्थवेदो हि संहिता-सूत्र रूपाभ्यां सम्प्रति नोपलभ्यत इति वस्तुस्थितिः ।

२. बार्हस्पत्यार्थशास्त्रम्, अर्थचन्द्रोदयः, नीतिप्रभाऽदिग्रन्थाः परिश्रूयन्ते ।

ग्रन्थाः (अर्थशास्त्राणि) प्रणीता आसन्निति वाल्मीकि रामायण-महाभारत मत्स्यपुराण - कौटिलीयार्थशास्त्र - वात्सायनकामसूत्र - चरकसंहिता नीति-वाक्यामृतटीकाऽदिग्रन्थेषु समुपलब्धाभिधानोद्धरणैः परिज्ञायते। ततोहि विष्णुगुप्तः, विक्रमपूर्वीय तृतीयशतकोद्भवः, मौर्य-साम्राज्यस्य संस्थापकः कौटिल्यापर[1] नामधेयो महान् राजनीतिज्ञः स्वपूर्ववर्तिभिरर्थशास्त्राचार्यै-र्विरचितानामर्थशास्त्राणां सारसर्वस्वरूपं सुपरिष्कृतमर्थशास्त्रं विनिर्ममे[2]। सम्प्रति समुपलब्धार्थशास्त्रीयराजनीतिग्रन्थेष्विदं कौटिलीयमर्थशास्त्रं प्रतनतमं परवर्तिनामर्थशास्त्रीयग्रन्थकृतां कृते समुपजीव्यत्वेनातितरां समाद्रियमाणमेतर्ह्यपि राजनीतिज्ञानामेतद्विषयकानुसन्धित्सूनां च कृते प्रमाणत्वेन शेखरायमाणं राराजते। अमुष्मिन्नर्थशास्त्रीय-समस्तविषयाणां सपरिकरं निरूपणमुपलभ्यते।

तत्र तावदाचार्य विष्णुगुप्तोहि स्वप्रणीतार्थशास्त्रे तन्त्रयुक्त्यधिकरण-प्रारम्भे चास्य शास्त्रस्यार्थशास्त्रत्वं प्रतिपादयन् इदमित्थं लिलक्षयति।

मनुष्याणां वृत्तिरर्थः, मनुष्यवतीभूमिरित्यर्थः।
तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति॥

(१५।१८०।१)

चतुर्वर्णाश्रमनिष्ठत्रिवर्गवृद्धिसाधनीभूतस्य, जितेन्द्रियस्य, वृद्धाभि-सम्मतस्य सप्तप्रकृतिमतो राज्ञः कृते कर्तव्यत्वेन समनुष्ठीयमानानां खनिजोद्भिद्रत्नगर्भाया विश्वम्भराया विद्याभूमिहिरण्यपशुधान्य भाण्डोपस्करमित्राद्यन्यतमार्थस्य साक्षात्परम्परया वा समुद्भाविकायाः

---

१. आचार्यविष्णुगुप्तस्य नामानि हेमचन्द्रसूरिणा निम्नोट्टङ्कितानि संस्मृतानि सन्ति।

वात्स्यायनो मल्लनागः कौटिल्यश्चणकात्मजः।
द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽलगुश्च सः॥ इति।

२. येन शास्त्रञ्च शस्त्रञ्च नन्दराजगताचभूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्॥ (कौ० अ० १५।१८०।१)

अपि च — सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम्।
कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्॥ (कौ० अ० १)

परमार्थरूपाया वसुन्धराया लाभपालनोपायाऽदीनां राजनीति-दण्डनीति-वार्तानीति - न्यायशासननीति--कूटनीति--युद्धनीति--परराष्ट्रनीति--इत्यादि-विषयकसिद्धान्तैः समुपबृंहितानां सकलविधानां विधायकस्यास्य शास्त्रस्य, अर्थशास्त्रत्वमविप्रतिपन्नतया व्यक्तो भवति। धर्मार्थकामेषु न्याय्यस्यार्थस्यैव धर्मकामाभिवृद्धि-साधनत्वेनानितरसाधारणं प्राधान्यं प्रतिपादयन्, मुनिसत्तमश्रवणकात्मजः कौटिल्यः समाख्यापयति।

अर्थ एव प्रधान इति कौटिल्यः, अर्थमूलौहि धर्मकामाविति (१।३।६) तथा च कामन्दकोऽपि स्वप्रणीतनीतिसारान्तर्गतेन।

न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम्॥
(१।२०)

इति पद्येन चतुर्विधराजवृत्तानां न्यायानुकूलानां, अर्जन-रक्षण-वर्धन-सत्पात्रप्रतिपत्तिरूपाणां विषयत्वेनार्थस्यैव महत्त्वं निदर्शयति। इत्थं स्वामि-अमात्य-राष्ट्र-दुर्ग-कोष-बल-सुहृद्-रूप सप्ताङ्गराज्यस्याभिवृद्धिसम्पादनार्थं विद्या-विनय-धृति-उत्साह-आदिगुणगणान्वितस्य नयज्ञस्य राज्ञः कृते जनपदात्मिकाया वसुमत्याः समुपार्जनं, पालनञ्च नितरामावश्यकं वरीवर्तीत्यतस्तावदेतद्विषयकनयसिद्धान्तनिरूपणप्रवणमिदं शास्त्रं, अर्थशास्त्रमित्यभिधानस्य चारितार्थ्यं बिभर्तीत्यत्र न कोऽपि विसंवादावकाशः प्रतिभाति।

कौटिलीयमर्थशास्त्रमिदं पञ्चदशाधिकरणेषु, अशीत्युत्तरशतशंख्याकेषु च ग्रन्थेषु समनुबद्धमस्ति। तत्र विनयाधिकारिक-अध्यक्षप्रचार-धर्म स्थायकण्टकशोधन -योगवृत्त-मण्डलयोनि - षाड्गुण्य - व्यसनाधिकारिक-अभियास्यत्कर्म-साङ्ग्रामिक-सङ्घवृत्त - आबलीयस - दुर्गलम्भोपाय - औपनिषदिक-तन्त्र-युक्त्यात्मकानि पञ्चदशाधिकरणानि वरीवृतति।

कौटिलीयार्थशास्त्रस्यान्येषामर्थशास्त्रीयग्रन्थानाञ्च विमर्शनेन प्रतनभारतीयराजनीतौ राज्ञः स्थानं प्रधानतमं प्रतिभाति।

स्थितिकर्ताऽस्य जगतो विष्णुरेव सनातनः।
नहि पालनसामर्थ्यं ऋते सर्वेश्वरं हरिम्॥

इत्युक्तदिशा सर्वेश्वरस्य विष्णुरूपस्य राज्ञ एव प्रजापालनसामर्थ्यं जगतः परिगोप्तृत्वञ्च शास्त्रेऽस्मिन् प्रतिपादितं प्रतिपद्यते । अपिच

राजनीतिर्महालक्ष्मीः राजानारायणः स्वयम् ।

इति नीतिदीपिकोदितदिशा प्रभुशक्तिसम्पन्नस्य राज्ञ यथा वा साक्षान्नारायणरूपत्वं, तथा राजनीतेरप्यनेकरूपत्वान्महालक्ष्मीत्वमन्वाख्यातमस्ति । एवं विधस्य विष्ण्वंशभूतस्य, प्रभुशक्तिमतोनृपतेः प्रभावेणैव सप्ताङ्गराज्यस्य स्थितिरभिवृद्धिश्च पूर्वं प्रभवतःस्म ।

चतुर्वर्णाश्रमोलोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु कर्मसु ॥

(कौ० अ० १।३)

इति प्रतिपादयन् कौटिल्योऽपि धार्मिकस्य, वृद्धाभिसम्मतस्य, प्रभुत्वपरिद्योतकसमुचितदण्डशक्तिसम्पन्नस्यास्य राज्ञः चतुर्वर्णाश्रमनिष्ठत्रिवर्गाभिवृद्धिसाधकत्वेन शासनविधासु श्रेष्ठतमत्वं समनुमोदयति । कौटिल्य प्रभृतिरर्थशास्त्रप्रणेतृभिर्यद्यपि प्रभुशक्तिसम्पन्नस्य दण्डधरस्य राज्ञः सर्वोच्चप्रशासकत्वं स्वीक्रियते, तथाऽपि तस्यनृपतेर्निरङ्कुशत्वं, अधार्मिकत्वमन्यायप्रवणत्वञ्च तैः कथमपि नानुमोद्यते । उक्तञ्च महामतिना कौटिल्येन—

विद्या विनीतो राजाहि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥

(कौ० अ० १।४)

अर्थशास्त्रविहितस्य, कर्तव्यत्वेन समनुष्ठीयमानस्य राज्ञः सकलविधकार्यप्रपञ्चस्य, विद्या-विनय-धृति-दक्षता- उत्साह-शुचिता-दृढता-प्रभावादिगुणगणस्य च महत्त्वं समवगम्य राजतन्त्रीयप्राचीनशासनविधायामेतस्यां धार्मिकस्य, विजितेन्द्रियस्य, वृद्धाभिसम्मतस्य, समुचितदण्डनीतिप्रवणस्य सकलप्रजाजनहितसन्धातुश्च राज्ञः स्वरूपं प्रजायाः शासकसेवकोभयात्मकं सन्दृश्यत इति महानियान्भारतीयराजनीतिशास्त्रस्य विशेषः प्रतिभाति ।

ब्रह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।
जयत्यजितमत्यन्तं शास्त्रानुगतशस्त्रितम् ॥

(कौ० अ० १।८)

इत्यादिपद्यैः कौटिल्यो हि सकलविधप्राशासनिक-न्यायिक-व्यावहारिक-यौद्धिकेषु विशेषतया सन्धि-विग्रह-यान-आसन-द्वैधीभाव-समाश्रयादिषु च कार्यकलापेषु सफलतया सम्पाद्यमानेषु राजसहायकत्वेन मन्त्रिणां, पुरोहितानाममात्यानां चोपधाभिः परीक्षितानां, प्रामाणिकानां, प्रगल्भराजनीतिज्ञानां कृतीनाञ्चावश्यकता वरीवर्तीत्यतस्तावन्मन्त्रिपरिषदः स्थानं प्रशासने गुरुतरं प्रतिपादयति। कर्मारम्भोपायः, पुरुषद्रव्यसम्पद्-देशकाल-विभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गैस्सहितान् मन्त्रान् समधिकृत्य अज्ञातविषयाणां विज्ञानं, विज्ञातानां निश्चयबलाधानं, विप्रतिपन्नानां सन्देहनिराकरणं, आंशिकतया ज्ञातानां विषयाणाञ्च सम्पूर्णतयोपलब्धिश्चेति मन्त्रिपरिषदः कार्याणि मन्त्रणात्मकानि प्रवर्तन्तेस्म ।

परमोच्चकुलोत्पन्नानां, शीलवतां, वेदवेदाङ्गज्ञानां, ज्योतिष-सामुद्रिक-शकुनादिशास्त्रविशेषज्ञानां, दण्डनीत्यभिज्ञानाञ्च पुरोहितानां, राज्ञः हितं पुरा पश्यतां प्रमुखं कार्यं, आधिदैविकाधिभौतिकविविधाऽपद्भ्यः शान्तिकपौष्टिकाऽभिचारिकाद्युपायैः राज्ञः परिरक्षणं भवतिस्म ।

अमात्यानां नितान्तगोपनीयमन्त्रणाऽतिरिक्तानां कार्याणां मन्त्रिपरिषद्सदस्यत्वेन सम्पादनाधिकार आसीत् । अतिरिक्तेषु विभागाध्यक्षेषु सेनापतिदौवारिक-अन्तरवंशिक-प्रशास्तृ-समाहर्तृ-सन्निधातृ-प्रदेष्टृ-नायक-पौर-न्यायाधीश-कार्मान्तिक-सभ्य-दण्डपाल-राष्ट्रान्तःपाल-दुर्गपाल-आदयस्तत्तत्पदेषु कार्यप्रवणा-प्रामाणिताऽदिगुणविशेषैर्नितिरां विशिष्यन्तेस्म ।

परराष्ट्रसम्बद्धकार्यनिर्वहणार्थं राज्ञा प्रयुक्तानां राजदूतानां राजप्रतिनिधित्वेन भृशं महत्त्वं वरीवर्ति । निसृष्टार्थ-परिमितार्थ-शासनहर भेदेन चैते कौटिल्येन त्रिविधाः प्रतिपाद्यन्ते । कौटिल्यसमाख्यात-राजनीतौ गूढपुरुषाणां (गुप्तचराणां) परं प्राधान्यं वरीवर्ति । प्रजानां सुख-दुःखानां, तासां सुखशान्तिविघातकसमाजकण्टकानां दुर्जनानां, राजशासन-विरुद्धाचारविचारवतां कार्याणाञ्च विज्ञानार्थं मन्त्रिपुरोहितामात्यादि-सकल-विभागाध्यक्षादीनां परीक्षणार्थं, शत्रुमित्रोदासीनपरराष्ट्रगत निगूढ कार्याणां परिज्ञानार्थञ्चैषां गूढपुरुषाणां कर्तव्यकार्यं स्वराष्ट्रस्य सम्पदर्थं विपत्प्रतीकारार्थञ्चातितरां प्रशस्यते ।

राज्यस्य सप्ताङ्गान्यतमे राष्ट्रे पुराणि, जनपदानि चान्तर्भवन्ति । तत्र राजधान्यादीनि नगराणि, नागरिकैः, राजकीयजनैश्च संवसितानि विविध-

वाणिज्य कार्यकेन्द्राणि, समुद्योगस्थानानि च भवन्ति। जनपदे हि कृषि-भूमयः, ग्रामाः, नद्यः, गिरयः, वनान्यरण्यानि, खन्याकरादिस्थानानि चान्तर्भूतानि भवन्ति। तत्र समाहरण-प्रशासनादिकार्यसौलभ्यार्थं जनपदे, दशग्रामेषु सङ्ग्रहणं, द्विशतग्रामेषु खार्वटिकं, चतुःशतेषु द्रोणमुखं, अष्टशतेषु च स्थानीयं कार्यालयात्मकं भवति।

एकः शतं योधयति दुर्गस्थोऽस्त्रधरो यदि।
शतं दशसहस्राणि, तस्माद्दुर्गं समाश्रयेत्॥

(शुक्रनीतिः ४।८५९)

इत्यनुसारेण स्वराष्ट्रसंरक्षणार्थं दुर्गाणां महत्त्वं नितरां वरीवर्ति। परचक्राभियानप्रसङ्गेऽल्पीयसाऽपि बलेन तन्निवारणं भवितुमर्हतीतिकृत्वा निर्माणमेषां दुर्गाणां युद्धोपयुक्तानां, विविधप्रकाराणां राज्ञःकृतेऽनिवार्यत्वेन कर्तव्यं भवति। शुक्रनीतिसारे चतुर्थाध्याये दुर्गाणि निम्नोद्दिष्टानि परिवर्णितान्युपलभ्यन्ते। तानि चेमानि (१) ऐरिणं दुर्गं, (२) पारिखं दुर्गं, (३) पारिघं दुर्गं, (४) वनदुर्गं, (५) धन्वदुर्गं, (६) जलदुर्गं, (७) गिरि-दुर्गं, (८) सैन्यदुर्गं, (९) सहायदुर्गञ्च।

बलप्रजारक्षणार्थं यज्ञार्थं कोषसङ्ग्रहः।
दण्डभूभागशुल्कानां आधिक्यात्कोषवर्धनम्॥

(शु०नी०सा० ४।११८-२४)

इत्युक्तदिशा राष्ट्रसंरक्षण-समुन्नतिसाधनेषु कोषस्य महत्त्वं तावद-नितरसाधारणं प्रतिपद्यते। इति हेतोस्तावत्कौटिल्येन कोषसंरक्षण वृद्धि-आय-व्ययादिविषयमधिकृत्य परिसूक्ष्मतया विवेचितं वरीवर्ति। दण्डकर-शुल्कादि-ग्रहणैः कोषवर्धनार्थं समुपयुक्ता राज्ञा विनियुक्ताः समाहर्तृ-सन्नि-धातृ-स्थानिक-गोप-प्रदेष्टृ-अक्षपटलाध्यक्ष-कोषाध्यक्ष-अर्थकारणिक-कार्मिक-गाणनिक्य-साङ्ख्यानक-लेखक-नीवीग्राहक - गोपालक-अपयुक्त - निधानक-प्रतिग्राहक - दायक - मन्त्रि - वैयावृत्यक - आदयः कौटिल्येन परिगणिता अभ्युपगम्यन्ते।

सेना शस्त्रास्त्रसंयुक्ता मनुष्यादिगणात्मिका।
स्वगमाऽन्यगमा चेति द्विधा सैव पृथक्त्रिधा॥

(शु० नी० सा० ४।८६४)

प्रभुशक्ति-स्वातन्त्र्यादिसंरक्षणार्थं उत्कृष्टं बलं हि सप्ताङ्गेषु महत्तमं पदं समलङ्करोति। आभ्यन्तरिककण्टकशोधनार्थं, दुष्टदमनार्थं, बाह्य-सपत्नानां विनाशार्थं, परराष्ट्रपरिभवार्थञ्च विजिगीषुराज्ञः कृतेऽनिवार्यत्वेन समपेक्ष्यमाणं बलं दण्डदायक-युद्धोपयुक्तभेदेन द्विविधमाख्यातमस्ति। तत्र यौद्धिकं बलं, साङ्ग्रामिककर्मसु कुशलं, शत्रुभिरभेद्यञ्च द्वेधा वर्णितं वर्तते। तच्चेदं-(१) चतुरङ्गं बलं, (२) सहायकं बलञ्च। चतुरङ्गबले पदाति-बलं, अश्वसैनिकबलं, गजसैनिकबलं, रथसैनिक (रथि-महारथि-अतिरथि-प्रभृति) बलञ्चान्तर्भवन्ति। सहायकबले च नौका-विष्टि-दैशिक-चरादी-नामन्तर्भावो भवति। एषु बलेष्वपि सारभूतं, वास्तविकं बलं, शरीर-शक्ति-शौर्य-धैर्य-कूटयुद्धकौशल-उत्कृष्टशस्त्राभ्यास-अप्रतिहतास्त्रप्रयोग-प्राविण्यादिरूपं वरीवर्ति। तत्र तावत्कौटिल्येन साङ्ग्रामिकाधिकरणे, शुक्रनीतिसार-कामन्दकीयनीतिसार-युद्धजयार्णव-समराङ्गणसूत्रधार-आदि परवर्ति ग्रन्थेषु च युद्धानुकूलस्कन्धावाराणां, युद्धस्थलानामुपयुक्तानां, युद्धादिभेदानां, कूटयुद्धभेदानां, समस्त शस्त्रास्त्रादीनां, पक्ष-कक्ष-उरस्या-दीनां प्रकृति-विकृति-व्यूह-प्रतिव्यूहादीनां, क्रौञ्च-सेना-मकर-सूची-चक्र-शकट-सर्प-सर्वतोभद्रादि व्यूहानाञ्च विशदं विवरणं विहितमुपलभ्यते।

राजनीतिग्रन्थेषु राज्ञः सुहृदश्चतुर्विधाः समुद्धृताः सन्ति। ते चामी—(१) भजमानः (वंशपरम्पराप्राप्ताः), (२) सहजाः (सम्बन्धिनः), ३) सहार्थाः (समानलाभमूलकाः), (४) कृत्रिमाः (सामदामान्यतरेण सम्पा-दिताः) च। एते सुहृदः राज्ञः विपत्तिसमये सर्वतोभावेन सहायकाः प्रमाणीभवन्ति।

बृम्हयेत्कर्षयेन्मित्रं हीनाधिकबलं क्रमात्।
भेदनीयाः पीडनीयाः कर्षणीयाश्च शत्रवः॥

(शु० नी० सा० ४।२०)

इत्यनुसारेण हीनाधिकबलेषु मित्रराष्ट्रेषु बृम्हणकर्षणाभ्यां शक्ति सन्तुलनं अमित्रराष्ट्रेषु भेदन-पीडन-कर्षणादिभिः कृषबलत्वञ्च सततोत्थान शीलस्य विजिगीषोर्नृपतेः कृते स्वराष्ट्रसंरक्षण-संवर्धनार्थं भृशं समभीप्सितं भवति।

प्रजासुखे सुखं राज्ञः प्रजानाञ्च हितेहितम्।
नात्मप्रियंहितं राज्ञः प्रजानान्तु प्रियं हितम्॥

(कौ० अ० १।१८)

इत्युदितदिशा तत्त्वतः पर्यालोच्यमाने राजनीतिशास्त्रप्रतिपादित धर्मप्रधानशासनविधायः राजतन्त्रात्मकत्वेऽपि प्रजातन्त्रमूलकत्वं स्फुटीभवति। एवं विधं प्रजातन्त्र मूलकं समुत्कृष्टराजतन्त्रात्मकं शासनं, सर्वदा प्रजानां, राष्ट्रस्य च सकलविधाभिवृद्धि-सुख-शान्ति-कल्याण-सम्पादन क्षमं भवितुमर्हतीत्यत्र न काऽपि संशीतिर्वरीवर्ति[1]।

---

१. भारतीयार्थशास्त्रीय राजनीतिसिद्धान्तानां पाश्चात्यराजनीतिसिद्धान्तानाञ्च तुलनात्मकमध्ययनं गवेषणाप्रवणानामनुसन्धित्सूनाञ्च भृशं समुपादेयं सम्प्रतीयते। राज्यस्य (State) उत्पत्ति (Origin)-विकास (Evolution)-प्रकृति (Elements)-प्रभुत्व (Sovereignity)-शासन (Government)-नियम (Law) - आदिविषयान्, स्वतन्त्रता (Liberty)-समानता (Equity)-नागरिकाधिकारकर्तव्य (Rights and Duties)-राष्ट्रियता (Nationality)-राष्ट्रवाद (Nationalism)-राजतन्त्र (Monarchy Tyrrany)-कुलीनतन्त्र (Aristocracy-Oligarchy)-जनतन्त्र (Democracy-Polity) आदिविषयान्, आदर्शवाद (Idealism)-उपयोगितावाद (Utilitarianism)-व्यक्तिवाद (Individualism)-बहुलवाद (Pluralism)-समाजवाद (Socialism)-विकासशीलसमाजवाद (Evolutionary Socialism)-राज्यसमाजवाद (State Socialism)-समूहवाद (Collectivism)-श्रमिकसङ्घवाद (Syndicalism)-गिल्डसमाजवाद (Guild Socialism)-साम्यवाद (Communism) अराजकतावाद (Anarchism) विश्वकुटुम्बवाद (Cosmopolitanism) आदि वादिक-सिद्धान्तांश्च समधिकृत्य प्लेटो (Plato), अरिस्टाटल् (Aristotle) आगस्टाइन (Augustine)-सेन्ट थामस् एक्विनस (St. Thomas Aquinas)-मेकियावली (Machiavelli)-ग्रीन (Green)-ब्लंशले (Bluntschli)-पालजेनेट् (Paulgenet)-जेटेल (Gettell)-गिल क्राइस्ट (Gil christ)-ग्रोशस (Grotius)-हॉब्स (Hobbes)-लॉक् (Locke) रूसो (Rousseau)-हर्बर्ट स्पेन्सर (Herbert Spencer)-मॅकीव्हर (Mc Iver)-दान्ते (Dante)-हालैन्ड (Holland)-गार्नर (Garner)-बर्जेस (Burgess)-लीकॉक् (Leacock)-ह्यूम (Hume)-राबर्ट फिल्मर (Robert filmor)-हेन्री मेन् (Henry Maine)-हॉलजेनडॉर्फ् (Holtzendorff)-वान्मोहल (Von

अत्र तावदर्थशास्त्राङ्गभूतानि शास्त्राणि. पशुशास्त्र-कृषिशास्त्र-वाणिज्यशास्त्र-युद्धशास्त्र-शस्त्रशास्त्र-वास्तुशिल्पशास्त्रादीनि चार्थशास्त्रीय ग्रन्थेषु. स्मृति-महाभारत-महापुराणादिषु च सप्रसङ्गं, सविस्तरं, सपरिकरञ्च विवृतानि, निरूपितानि चाभ्युपगम्यन्ते ।

अर्थशास्त्रीयाः प्रमुखाः ग्रन्थाः

वैशालाक्षग्रन्थः—परमेश्वरशिवः (वि० पू० ३००० व पू०), बाहुदन्तकः[1] आचार्यपुरन्दरः (वि० पू० ३००० व० पू०), बार्हस्पत्यार्थशास्त्रम्[2]-बृहस्पतिः (वि० पू० ३००० व० पू०), अर्थशास्त्रम् (छन्दोबद्धम्[3])–चन्द्रपुत्रोबुधः (वि० पू० ३००० व० पू०), औशनसार्थशास्त्रम्[4] (दण्डनीतिशास्त्रम्), शुक्रनीतिश्च–उशनाशुक्रः (वि० पू० ३००० व० पू०), बृहदर्थशास्त्रम्[5]–पिशुनोनारदः (वि० पू० ३००० व० पू०),

---

Mohal)-सिली (Seeley)-फ्रीमन (Freeman)-मॅकलेनन(Mc Lennan)-जेलिनेक (Jellineck)-कान्ट (Kant)-फिक्टे (Fichte)-हेगेल (Hegel)-जान् स्टुअर्ट मिल् (John Stuart Mill)-लार्ड ब्राइस (Lord Bryce)-डायसी (Dicey)-लिंकन Lincoln)-जेफरसन (Jefferson)-बेन्थम (Benthum)-बार्कर (Barker)-नार्मन् एन्जेल् (Norman Angell)-सी० डी० बर्न्स (C. D Burns)-कार्ल मार्क्स (Carl Marx)-पैलेटर (Pallatour)-सॉरेल् (Sorel)-पेन्टी (Penty)-गॉड्विन् (Godwin)-प्राउधन (Proudhan)-क्रोपाट्किन् (Kropotkin) प्रभृतिपाश्चात्यविपश्चिद्भिः राजनीति-दर्शनविशेषज्ञैः, (Political Thinkers) तैः प्रणीतेषु परः शतेषु राजनीतिग्रन्थेषु समुपस्थापितं सविस्तरं, साङ्गोपाङ्गञ्च विवरणं विवेचनञ्च परिज्ञातुं नितरां समुपयोग्यं प्रतिभाति ।

१. महाभारते, शान्तिपर्वणि (५८।८९) उल्लेखः समुपलभ्यते ।

२. महाभारते, कौटिलीयार्थशास्त्रे चोल्लेखः समुपलभ्यते ।

३. मत्स्यपुराणे, नीतिवाक्यामृतटीकायाञ्चोल्लेख उपलभ्यते ।

४. चरकसंहितायां (वि० ८।५४), विशाखदत्तस्यमुद्राराक्षसनाटके (१।७) चोल्लेख ।

५ वाल्मीकिरामायणे, महाभारते (सभाप० अ० ५), कौटिलीयार्थशास्त्रे-चोल्लेखः ।

अर्थशास्त्रम्[1]-कौणपदन्तोभीष्मः (वि० पू० ३००० व० पू०), राजशास्त्रम्[2] (अर्थशास्त्रम्)-द्रोणभारद्वाजः (वि० पू० ३००० व पू०) अर्थशास्त्रम्[3]-वातव्याधिः (उद्धवः) (वि० पू० ३००० व० पू०), अर्थशास्त्रम्[4]-दीर्घचारायणः (वि० पू० ३००० व० पू०), कृषिशास्त्रम्[5] (अर्थशास्त्रान्तर्गतम्)-पराशरः (वि० पू० ३००० व० पू०) कौटिलीयमर्थशास्त्रम्[6]-विष्णुगुप्तः (कौटिल्य.) (वि० पू० ३ श०), कामन्दकीय नीतिसारः[7]-कामन्दकः (शिखरस्वामी) (वै० ५ श०), राजनीतिग्रन्थः-वररुचि (अपरः) (वै० ७ श०), बृहस्पतिसूत्रम्[8]-बृहस्पतिः (अपरः) (वै० ९ श०), नीतिवाक्यामृतम्-सोमदेवः (वै० १० श०), युक्तिकल्पतरुः, समराङ्गणसूत्रधारश्च-भोजराजः (वै० ११ श०), नीतिकल्पतरुः-क्षेमेन्द्रः (वै० ११-१२ श०), नीतिरत्नाकरः, नीतिप्रकाशिकाच-चण्डेश्वरः (वै० १३-१४ श०), राजनीतिकामधेनुः-अज्ञातः (वै० १४ श० सम्भावितम्), राजनीतिकल्पतरुः-लक्ष्मीधरः (वै० १४ श०), राजनीतिरत्नाकरः-चन्द्रशेखरः (वै० १४ श०), युद्धजयार्णवः-रघुनन्दनः (वै० १६ श०), राजनीतिप्रकाशः (वीरमित्रोदयः)-मित्रमिश्रः (वै० १७ श०), राजनीतिमयूखः-नीलकण्ठदीक्षितः (वै० १७ श०), समयनयः-गागाभट्टः (वै० १७-१८ श०), राजकौस्तुभः-अनन्तदेवः (वै० १८ श०), राजभूषणी-रामानन्दतीर्थः (वै० १८ श०) चेत्येवमादयः ।

राजनीतिविषयकाः केचन प्राचीनाः ग्रन्थाः—

वैशम्पाययननीतिः, काश्यपदण्डनीतिः, विदुरनीतिश्चेत्यादयः ।

---

१. कौटीलीयार्थशास्त्र उल्लेख उपलभ्यते ।

२. महाभारते, कौटिलीयार्थशास्त्रे चोल्लेख उपलभ्यते ।

३. मत्स्यपुराणे (४६।२३) कौटिलीयार्थशास्त्रे चोल्लेख उपलभ्यते ।

४. कौटिलीयार्थशास्त्रे, काशिकावृत्तौचोल्लेख उपलभ्यते ।

५. कौटिलीयार्थशास्त्रस्य गणपतिशास्त्रिकृतायां टीकायामुल्लेखः समुपलभ्यते । एते ग्रन्थाः सम्प्रतिनोपलभ्यन्त इतिभाति ।

६. चाणक्यप्रणीतः राजनीतिसूत्रनामकः द्विसप्तत्युत्तरपञ्चशतसंख्याकेषु सूत्रेषु प्रणिबद्धश्चग्रन्थोऽपि समुपलभ्यते ।

७. अस्यव्याख्याः, आत्माराम-जयराम-शकराचार्य-वरदराजप्रणीता उपलभ्यन्ते ।

८. डॉ० एफ्० डब्ल्यू० थॉमस् महोदयेनायंग्रन्थः सम्पाद्यप्रकाशितोऽस्ति ।

अन्ये कतिपये राजनीतिग्रन्थाः—

राजधर्मसारः-तुलाजीराजः, राजनीतिः-देवीदासः, राजनीतिः-हरिसेनः, राजनीतिप्रकाशः-रामचन्द्रअल्लडीवारः, दण्डनीतिः-केशवपण्डितः, हरिहरचतुरङ्गम्-गोदावरीमिश्रः, युद्धकौशलम्-रुद्रभट्टः, युद्धचिन्तामणिः-रामसेवकत्रिपाठी, युद्धजयप्रकाशः-दुःखभञ्जनः, युद्धजयोत्सवः-गंगारामः, युद्धकुतूहलम्-अज्ञातः, युद्धयात्रा-अज्ञातः युद्धरत्नावली-अज्ञातः, अक्षयनीतिसुधाकरः-अज्ञातश्चेत्यादयः।

वृद्धचाणक्यम्, राजनीतिसमुच्चयः, चाणक्यसूत्राणि, चाणक्यनीतिदर्पणः, चाणक्यसारसंग्रहः, लघुचाणक्यम्, चाणक्यसप्ततिश्चेत्यादिग्रन्थाः चाणक्यप्रणीता अनुश्रूयन्ते।

●

इतिहास-पुराणानि

१. वाल्मीकिरामायणम्
२. व्यासमहाभारतम्
३. पुराणानि

इतिहासः

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति ॥
(महाभारतम् १।१।२६७)

भारतवर्षस्य प्रतनेतिहासः लौकिकसंस्कृतभाषायामुपनिबद्धः पद्यात्मको विशालकलेवरः वेदाध्ययनाधिकारविरहितानां, वैदिक (छान्दस)-संस्कृत-भाषाऽनभिज्ञानां च कृते चतुर्विधवेदानां वास्तविकाऽशयावबोधनार्थं विविधैः सविस्तरैराख्यानोपाख्यानादिभिः समुपबृहणं तेषां विदधाति । अत एवास्य पञ्चमवेदत्वं वाजसनेयी ब्राह्मणोपनिषदि, छान्दोग्योपनिषदि च समाम्नातं[1] नूनं यथार्थं प्रतिभाति । इतिहासेऽस्मिन् ग्रन्थौ परिगण्येते । (१) आदिकविवाल्मीकिमुनिप्रणीतं रामायणं तथा (२) महर्षिवेदव्यास-विरचितं महाभारतम् । एतयोः रामायणमहाभारतयोः, भारतीयपुरातन-राजनीतिक-लौकनीतिक-सामाजिक - भौगोलिक - राष्ट्रिय-धार्मिक - नैतिक-सांस्कृतिक सकलविधवृत्तानां विशदं विवरणं, तेषां क्रमपूर्वकं समुपस्थापनं चेतिहासत्वं निदर्शयति ।

इति–इत्थंप्रकारेण, ह–निश्चयेन, आस–आसीदिति व्युत्पत्त्यनुसारेणापि रामायणमहाभारतयोर्यथार्थपुरावृत्तरूपेतिहासत्वं सुस्पष्टं भवति[2] ।

परिक्रिया पुराकल्प इतिहासगतिर्द्विधा ।
स्यादेकनायका पूर्वा द्वितीया बहुनायका ॥

---

१. अस्य महतोभूतस्य निःश्वसितमेतद् यद् ऋग्वेदोयजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम् ।' वाजसनेयी ब्राह्मणोपनिषद् ४।११।५ ।
'नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थः, इतिहासः पुराणं पञ्चमो वेदानां वेदः' । (छान्दोग्योपनिषद् ७।१।४, ७।१।२, ७।२।१)

२. धर्मार्थकाममोक्षाणां उपदेशसमन्वितम् ।
पूर्ववृत्तकथायुक्तं इतिहासं प्रचक्षते ॥
इति लक्षणानुसारेण इति ह पारम्पर्योपदेशोऽस्मिन्नास्त इति व्युत्पत्त्यनुसारेण च रामायण महाभारतयोरितिहासत्वं सुव्यक्तं भवति ।

इतिकाव्यमीमांसायां राजशेखरस्याभिमतानुसारेण वाल्मीकि-रामायणस्यैकनायकत्वात् परिक्रियारूपत्वं, महाभारतस्य चानेकनाय-कत्वात्पुराकल्परूपत्वं प्रतिभाति ।

वाल्मीकिरामायणम्—

सदूषणाऽपि निर्दोषा, सखराऽपि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ॥

(त्रिविक्रम भट्टः)

धीरोदात्तनायकस्य, मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य सम्पूर्ण चरित्रवर्णनप्रधानमिदं रामायणं न केवलं परिक्रियेतिहासः, अपितु वाल्मीकेरादिकवेर्यथार्थकल्पनासुषमं, नितान्तरमणीयवर्णनारुचिरं चैति-हासिकं महाकाव्यं प्रतिभाति ।

इदानीं भारते प्रमुखाणि प्रामाणिकानि एतस्य रामायणस्य-चत्वारि संस्करणानि[1] समुपलभ्यन्ते ।

१. वङ्गीयसंस्करणम् (कलिकातायां प्रकाशितम्)
२. देवनागरीसंस्करणम् (निर्णयसागरमुद्रणालयद्वारा मुम्बायां प्रकाशितम्)
३. काश्मीरसंस्करणम् (द. म. वि. अनु. कार्यालयद्वारा लाहोरे प्रकाशितम्)
४. दाक्षिणात्यसंस्करणम् (मध्यविलासपुस्तकालयद्वारा कुम्भकोणे प्रकाशितम्)

चतुर्विंशसहस्र (२४०००) श्लोकात्मकेऽस्मिन् रामायणे सप्त काण्डानि[2] वर्तन्ते । तानिचेमानि—

---

१. एषु चतुर्विधसंस्करणेषु सर्गाणां श्लोकादीनां च संख्याविषयको भेदः पाठभेदश्च सन्दृश्येते । अस्मिन् विषये तत्त्वान्वेषकैरनुसन्धित्सुभिर्गवेषितव्यम् ।

२. जर्मनपण्डितः डाक्टर जेकाबी स्वीये 'दास रामायण : गेसिस्ट उन्ड इन्हाल्ट' नामके ग्रन्थे १८९३ ईसवीये वर्षे प्रकाशिते वाल्मीकिरामायणस्योत्तरकाण्डस्य, बालकाण्डस्य कतिपयांशानां च प्रक्षिप्तत्वं प्रतिपादयति ।

(१) बालकाण्डम् (२) अयोध्याकाण्डम् (३) अरण्यकाण्डम्, (४) किष्किन्धाकाण्डम्, (५) सुन्दरकाण्डम्, (६) लङ्काकाण्डम्, (७) उत्तरकाण्डञ्च ।

लौकिक संस्कृतभाषोपनिबद्धेऽस्मिन्नादिकाव्ये वाल्मीकिमुनिना सर्वप्रथमं, प्रामुख्येणानुष्टुप्छन्दः सम्भवतः सम्प्रयुज्यते स्म । अस्य रामायणस्य प्रणयन-समयः, वाल्मीकिमुनि-समयश्च आधुनिक भारतीयेतिहासविदां मतानुसारेण विक्रमपूर्वीयेभ्यः त्रिसहस्रवर्षेभ्यः पूर्वं, वैकल्पिकतया, विक्रमपूर्वीयेभ्यः पञ्चशत वर्षेभ्यः पूर्वं वा परिनिर्णीयते ।

अस्य वाल्मीकिरामायणस्य काश्चन प्रसिद्धाः टीकाः[1] निम्नलिखितास्सन्ति ।

कतक टीका	अज्ञातनामप्रणीता,
रामायणतत्त्वदीपिकाटीका	माहेश्वरीतीर्थविरचिता,
रामायणकूट टीका	रामानन्दतीर्थकृता,
विवेकतिलक टीका	वरदराजप्रणीता,
श्रृंगारतिलक टीका	गोविन्दराजविरचिता,
रामायणतात्पर्य संग्रह टीका	अप्पयदीक्षितकृता,
धर्माकूतटीका	त्र्यम्बकमखिप्रणीता,
लोकनाथी टीका	लोकनाथविरचिता,
अमृतकटक टीका	श्रीरामप्रणीता,
वाल्मीकिहृदय टीका	अहोबलविरचिता,

---

१. वाल्मीकिरामायणस्यानुवादाः विलियमकैरीग्रिफिथमार्शमनाद्यांग्लपण्डितैः आंग्लभाषायां, रसेलपारिसोतफाचेप्रभृतिफ्रेंचविपश्चिद्भिः फ्रेंचभाषायां, मेनराडमहोदयेन जर्मनभाषायां, गोरेशियो महाशयेन च इटेलियनभाषायां कृताः समुपलभ्यन्ते ।

अतिरिक्तेषु पाश्चात्यविपश्चित्सु बोथलिंकग्रियर्सनहाफकिन्सजैकाबिलासेनलेवोलुडविक्मेक्डानेलमोनियरविलियमवेबरविन्टरनिट्झकीथपार्जिटरप्रजिलुस्कीस्मिथवातानावेह्यूबर्टबेलीगार्नरस्काबेलह्वीलरपीटररूबेनकामिल बुल्के प्रभृतिभिः, वाल्मीकिरामायणं समधिकृत्य, तत्सम्बद्धविषयानधिकृत्य च कृतानि विवरणविवेचनादीनि एभिःप्रणीतविविधग्रन्थनिबन्धादिषु समुपलभ्यन्ते ।

तिलक टीका नन्दिग्रामराजरामकृता,
रामीय टीका नागेशभट्टविरचिता
वाल्मीकि तात्पर्यतरङ्गिणीटीका विश्वनाथप्रणीता इत्याद्याः ।

अन्यानि रामायणानि

विविधपुराणान्तर्गतानि कतिपयरामायणानि निम्नलिखितानि परिज्ञायन्ते । तानि चेमानि—

१. अगस्त्यरामायणम्
२. अग्निवेशरामायणम्
३. अद्भुतरामायणम्
४. अध्यात्मरामायणम्
५. आनन्दरामायणम्
६. चान्द्ररामायणम्
७. दुरन्तरामायणम्
८. देवरामायणम्
९. भुशुण्डिरामायणम्
१०. मन्त्ररामायणम्
११. मञ्जुलरामायणम्
१२. मूल रामायणम्
१३. मैन्दरामायणम्
१४. लघुरामायणम्
१५. लोमशरामायणम्
१६. श्रवणरामायणम्
१७. संवृतरामायणम्
१८. संक्षेपरामायणम्
१९. सुब्रह्मरामायणम्
२०. सुवर्चसरामायणम्
२१. स्वायम्भुवरामायणम्
२२. सौपद्मरामायणम्
२३. सौर्यरामायणम्
२४. सौहार्दरामायणम्
२५. रामायण चम्पूः
२६. रामायणमणिरत्नम्
२७. रामायणमहामालाच

महाभारतम्

अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ।
पश्चाद् भारतमाख्यानं चक्रे तदुपबृंहितम् ॥

(महाभारतम्-आदिपर्व)

महर्षिवेदव्यासप्रणीतं, समेषां पुराणानां समुपजीव्यं महाभारतं वेदोपबृंहकत्वेन नितरां समाद्रियते । अनेकनायकमिदं भारतीयप्रतनराजनीति-कूटनीति-युद्धनीति-लोकनीति-व्यक्तिसमाजस्थिति - धर्मनीतिन्यायसंस्कृति-सभ्यताऽदीनां यथार्थं परिचित्रणं करोतीतिकृत्वाऽस्य महाभारतस्य पुराकल्परूपेतिहासत्वं सर्वथाऽसन्दिग्धं प्रतिभाति । विविधपुरातनराजवंशा-

पुरा कल्परूपेतिहासत्वं सर्वथाऽसन्दिग्धं प्रतिभाति। बिबिधपुरातन राज वंशा दीनां, तत्सम्बद्धप्रमुखविषयाणां च पुरातनेतिवृत्तं विशदतयाऽस्मिन् समुपलभ्यते। पृथुकायं ज्ञानराशिरूपं महाभारतं, आध्यात्मिकाऽधिदैविकाऽधिभौतिक समस्त विषयाणां सविस्तरं विवरणं समुपस्थापयति। अतएवेदं संस्कृतज्ञानकोषरूपमस्तीऽत्यत्र न काऽपि संशीतिरस्ति समेषां संस्कृतज्ञानां विदुषाम्।

इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः।

इति महाभारतस्याऽदिपर्वान्तर्गतपद्यानुसारेण महाभारतमिदं प्रतन कालादारभ्याद्यपर्यन्तं सर्वेषां मनीषिणां कवीनाञ्च कृते समुपजीव्यं, प्रातिभ कविकल्पनानां, कथावस्तूनां चाकररूपं वरीवर्तीति महानियानस्य विशेष अभ्युपगम्यते।

अस्य क्रमिकोविकासोजय-भारत-महाभारतरूपैर्बहुकालपर्यन्तं समभूदिति भाति। अतोहीदं महाभारतं विकसितमैतिहासिकं महाकाव्यमपि (एपिक् आफ् ग्रोथ) प्रतिभाति।

महाभारतरूपायामस्यां शतसाहस्र्यां संहितायां लक्षसंख्याकाः[1] श्लोकाः समनुश्रूयन्ते। अस्मिन् प्रयुक्तेषु छन्दस्सु अनुष्टुप्छन्दस एव प्राबल्यं प्रतिपद्यते। अस्मिन्नष्टादश पर्वाणि सन्ति तथा चैकं खिलरूपं पर्व समुपलभ्यते। तानि पर्वाणि चेमानि—

(१) आदिपर्व, (२) सभापर्व, (३) वनपर्व, (४) विराटपर्व, (५) उद्योगपर्व, (६) भीष्मपर्व, (७) द्रोणपर्व, (८) कर्णपर्व, (९) शल्यपर्व, (१०) सौप्तिक पर्व, (११) स्त्रीपर्व, (१२) शान्तिपर्व, (१३) अनुशासनपर्व, (१४) अश्वमेधपर्व, (१५) आश्रमवासिकपर्व, (१६) मौसलपर्व,

---

१. प्राचीनतमसमये महाभारतस्य शत पर्वाणि, षष्टिलक्ष संख्याकाः श्लोका आसन्नितिश्रूयते। तेषु त्रिंशल्लक्ष संख्याकश्लोकात्मकं भारतं देवलोके, पञ्चदश लक्षसंख्याकश्लोकात्मकं भारतं पितृलोके, चतुर्दशलक्षश्लोकात्मकं भारतं गन्धर्वलोके, एकलक्ष संख्याकश्लोकात्मकं भारतं मर्त्यलोके चास्ति। सम्प्रति महाभारतस्याष्टादश पर्वसु, हरिवंशात्मके खिलपर्वणि च न तावल्लक्षसंख्याकाःश्लोकाः, अपितु ९६२४४ संख्याकाः श्लोका उपलभ्यन्त इति वस्तुस्थितिः।

(१७) महाप्रस्थानिकपर्वं, (१८) स्वर्गारोहणपर्वं च । हरिवंशो हि खिलपर्वं महाभारतस्यास्ति ।

निष्काम कर्मयोगप्रतिपादिका भगवद्गीता, अघविनाशकं विष्णुसहस्रनामस्तोत्रं, तत्त्वज्ञानविवारिका अनुगीता, भक्तिज्ञानवैराग्यसमुपदेशको भीष्मस्तवराजः, अनन्यशरणागतिनिदर्शको गजेन्द्रमोक्षश्चेति[1] रत्नपञ्चकं, सर्वैस्समादृतं तावदस्मिन्नेव सन्निहितं समुपलभ्यते ।

महाभारतप्रणेतृ व्याससमयो हि विक्रमपूर्वीयेभ्यः त्रिसहस्रवर्षेभ्यः पूर्वं (वि० पू० षट्शत व० पूर्वं वा) आसीदिति भारतीयेतिहासज्ञैर्निर्णीयते । महाभारतेऽस्मिन् प्रथमोवक्ता वैशम्पायनः श्रोता जनमेजयश्चास्ताम् । द्वितीयोवक्ता सौतिउग्रश्रवाऽसीत् तथा श्रोतारः शौनकादिऋषय आसन् ।

महाभारते चतुर्विधपुरुषार्थविषयकसमस्तज्ञानविज्ञानशाखाप्रशाखानां सन्निवेशनं संविधाय तत्र भगवान् कृष्णद्वैपायनः—

धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित् ॥

इति संव्याहरन्नस्य ग्रन्थस्यानितरकृतानुपमज्ञानकोषत्वं सप्रतिज्ञं प्रतिपादयति ।

महाभारतस्य प्रसिद्धाः कतिपयव्याख्याः[2]

महाभारततात्पर्यनिर्णयः	आनन्दतीर्थः	वै० १३ शतकम्
भारतार्थप्रकाशिका (अपूर्णा)	सर्वज्ञनारायणः	वै० १४ शतकम्
विरोधार्थभञ्जिनी टीका	रामकृष्णः	वै० १६ शतकम्
ज्ञान दीपिका व्याख्या	देवबोधाचार्यः	वै० १६ शतकम्

---

१. वस्तुतस्तु गजेन्द्र मोक्षः न महाभारते. अपितु वामनपुराणे समुपलभ्यते ।

२. लासेन–वेबर-लुडविग्-होल्ट्ज्यमान–मेक्समूलर-सोयेन-बुहलर–डाल्हमान-विंटरनिट्झ-मोनियरविलियम्स्-मेक्डानेल-वाशबर्न हाफ्किन्स-हेल्ड-बार्थ-सिल्वेनलेवी-ग्रियर्सनप्रभृतिः पाश्चात्यविपश्चिद्भिः महाभारतविषयं समधिकृत्यानुशीलनात्मकं विवरणविवेचनादिकं विविधेषु ग्रन्थनिबन्धादिषु विहितमुपलभ्यते ।

दुर्घटार्थप्रकाशिनो टीका	विमलबोधः	वै० १६ शतकम्
महाभारततात्पर्यसंग्रहः	अप्पयदीक्षितः	वै० १७ शतकम्
दीपिका व्याख्या	अर्जुनमिश्रः	वै० १७ शतकम्
भारतभावदीप टीका	चतुर्धर नीलकण्ठः	वै० १७ शतकम्
लक्षाभरणम्	वादिराजतीर्थः	वै० १८ शतकम्
महाभारतटीका	चतुर्भुजमिश्रः	वै० १८ शतकम्
विषमपदविवरणम्	अज्ञातनामा	वै० १९ शतकम्
भारतकौमुदी टीका	हरिदाससिद्धान्तवागीशः	वै० २० शतकम्

पुराणानि

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥

(मत्स्यपुराणं ३।३)

पूर्वं श्वेतवाराहकल्पीयसप्तमवैवस्वतमन्वन्तरान्तर्गतवर्तमानाष्टा-विंशतितमस्य कृतत्रेताद्वापरकलियुगचतुष्टयस्य प्रारम्भे ब्रह्मणा स्मृतं धर्मार्थकामेतित्रिवर्गसाधनप्रतिपादकं शतकोटिसंख्याकश्लोकात्मकं विशाल-तममादिपुराणं तावदेकमेवाऽसीत् । अनन्तरं द्वापरयुगान्ते स्वल्प-बुद्धीनां, परिमिताऽयुषां भाविमनुष्याणां समुपकाराय वैदिकधर्मसंस्थापनाय, विस्ताराय च तत्र भगवान् कृष्णद्वैपायनो नारायणस्वरूपो वेदव्यासः[1] शतकोटिविस्तरस्य बृहत्तमपुराणस्य सारभूतानि चतुर्लक्षश्लोकात्मकानि अष्टादशमहापुराणानि पुराणानि, उपपुराणानि च व्यरीरचत् ।[2]

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति ॥

इति महाभारतान्तर्गतव्यासोक्त्यनुसारेण पुराणानां प्रधानोद्देश्यं, वेदप्रतिपाद्यसिद्धान्तानां सविस्तरं जनसाधारणज्ञानसुलभं व्याख्यानमस्ति। वेदप्रतिपादितानां सूत्रात्मकसिद्धान्तानां विषदतया लोकानुरञ्जकविधया च प्रतिपादनं समेषु पुराणेषु विशिष्यते ।

---

१. विस्ताराय तु वेदानां स्वयं नारायणप्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥ (महाभारतं आदिपर्व)

२. आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहिताञ्चक्रे भगवान् बादरायणः ॥ (पुराणोत्पत्तिप्रसंगः)

श्रुतिस्मृती उभेनेत्रे पुराणं हृदयं स्मृतम् ।
एतत् त्रयोक्त एवस्याद् धर्मो नान्यत्र कुत्रचित् ॥
(देवीभागवतं ११।१।२१)

इत्यादि पद्यैः पुराणानां धर्मरहस्यप्रतिपादकान्यतमानां संस्कृतवाङ्मये भृशं महत्त्वं समवगम्यते ।

पुरा परम्परां वष्टि पुराणं तेन तत्स्मृतम् ।
(पद्मपुराणं ५।२।५३)

यस्मात्पुरा ह्यभूच्चैतत् पुराणं तेन निर्मितम् ।
(ब्रह्माण्डपुराणं १।१।१७३)

पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः ।
(मत्स्यपुराणं ५३।७१)

यस्मात्पुरा ह्यनितीदं पुराणं तेन तत्स्मृतम् ।
(वायुपुराणं १।२०)

इत्यादि पुराणशब्दार्थप्रतिपादिकाभिर्व्युत्पत्तिभिः पुरातनकालिकसर्गप्रतिसर्गादिविषयाणां, तदनुपोषकपुराकथानकादिविषयाणां च विवरणपरायणानि पुराणानि समवगम्यन्ते । पुराऽपिनवं भवतीतियास्कीयव्युत्पत्त्यनुसारं समेषामेषां पुराणानां पुराणत्वेऽपि ज्ञातुं नवीनत्वं सम्भवति ।

वेदविहितधर्मप्रमेयविवरणैः, चतुर्विधपुरुषार्थसाधनविवेचनैः, समस्त दार्शनिकशास्त्रीयाऽगमीयसिद्धान्तानां समाख्यानैः, प्राचीनराजनीतिलोकनीत्यादीनां परिवर्णनैश्च पुराणेषु व्यक्तीभूतं बादरायणस्य वेदव्यासस्य वैदुष्यं तावदनितरसाधारणीं बहुमुखीं प्रातिभधिषणां परिद्योतयति । महापुराणानां चतुर्लक्षसंख्याकानां श्लोकानां, पुराणोपपुराणानां लक्षसंख्यानां श्लोकानां, महाभारतस्य च लक्षसंख्याकानां श्लोकानामित्थं षड्लक्षसंख्याकानां श्लोकानां प्रणयनं कृष्णद्वैपायनस्य तावदनन्यसाधारणप्रणेतृत्वं प्रकटीकरोति । पुराणेषु प्रायशः समेषां विषयाणां समाख्यानं व्यासपद्धतिमवलम्ब्य[1] कृतमस्तीत्यतः पुराणोद्भावकस्य कृष्णद्वैपायनस्याभिधानं 'व्यास' इत्यन्वर्थकं समभूदिति भाति ।

---

१. वस्तुकथनं, वेदेषु रूपकप्रधानं, पुराणेष्वतिशयोक्तिप्रधानं, दर्शनशास्त्रविज्ञानादिषु च तथ्यप्रधानं भवति ।

कृष्णद्वैपायनव्यास-समयः अष्टादशमहापुराणप्रणयनसमयश्च विक्रम-पूर्वीयेभ्यः त्रिसहस्र वर्षेभ्यः पूर्वमासीदिति समनुमीयते ।

पुराणानां पञ्च लक्षणानि[1]—

सर्गश्च[2] **प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**
वंश्यानुचरितं चेति पुराणं पञ्चलक्षणम् ॥

(विष्णुपुराणं ३।६।२४)

१. सर्गः जड़चेतन जगतः सृष्टिः ।

२. प्रतिसर्गः जगतः प्रलयः, नैमित्तिक-प्राकृतिक-नित्य-आत्यन्तिक भेदेन चतुर्विधः ।

३. वंशः ब्रह्मप्रसूतराज्ञां त्रैकालिकसन्तानपरम्पराः ।

४. मन्वन्तराणि मनवः, देवाः, मनुपुत्राः, इन्द्राः, ऋषयः, ईश्वरांशावताराश्चेतिषण्णां समयाः ।

५. वंश्यानुचरितं ब्रह्मप्रसूतराजवंशोद्भूतानां राज्ञां ऋष्यादीनां विशिष्टचरित्रादिवर्णनम् ।

इमानि पञ्च लक्षणानि[3] महापुराणोपपुराणसाधारणानि पुराणप्रधानानि च सन्ति ।

---

१. पुराणानां पञ्चलक्षणान्यधिकृत्य पुराणपञ्चलक्षणग्रन्थस्य जर्मनभाषोपनिबद्धायां भूमिकायां डा० किर्फेलमहोदयः सविवेचनं विवरणं समुपस्थापयति ।

२. सर्गादीनां लक्षणानि श्रीमद्भागवतस्य द्वादशस्कन्धे सप्तमाध्याये ११-१७ संख्याकेषु श्लोकेषु विवृतान्युपलभ्यन्ते ।

३. कौटिलीयार्थशास्त्रस्य (१-५) जयमङ्गलाटीकायां समुद्धृतानि पुराणपञ्चलक्षणानि पुराणानां यथार्थस्वरूपनिदर्शकानि प्रतिभान्ति ।

सृष्टिः प्रवृत्तिः संहारः धर्ममोक्षप्रयोजनम् ।
ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम् ॥

महापुराणानां दश लक्षणानि[1]

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥

(श्रीमद्भागवतं २।१०।१)

(१) सर्गः जडजगतः सृष्टिः, (२) विसर्गः चेतनजीवसृष्टिः, (३) स्थानं कोषलोकादयः, (४) पोषणं भगवदनुग्रहः, (५) ऊतयः ईशानुग्रह-प्रतिबन्धकजीवानांमशुभकर्मवासनाः, (६) मन्वन्तराणि सद्धर्मसाक्षात्कारो भवति येषु तानि, (७) ईशानुकथाः भक्तिजनिका भगवत्कथाः, (८) निरोधः प्रलयः शक्तिभिः सममात्मन अनुशयनम्, (९) मुक्तिः तत्त्वज्ञानेन मोक्षप्राप्तिः, (१०) आश्रयः सर्वाधिष्ठानं परम्ब्रह्म च ।

महापुराणेषु समेषामेषां दश लक्षणानां पूर्णतया समन्वयो भवति ।

अष्टादश महापुराणानि

ब्राह्म पाद्मं वैष्णवं च शैवं वेत्तु चतुर्थकम् ।
देवीभागवतं श्रेष्ठं नारदीय ततः परम् ॥

---

१ अपराणि दशलक्षणानि श्रीमद्भागवते (१२।७।९)—

सर्गश्चाथ विसर्गश्च वृत्ती रक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥

(१) सर्गः जगतः सृष्टिः, (२) विसर्गः जीवसृष्टिः, (३) वृत्तिः जीवनसाधनान्यन्नानि, (४) रक्षा धर्मरक्षणम्, (५) अन्तराणि मन्वन्तराणि, (६) वंशो ब्रह्म-प्रसूतः, (७) वंशानुचरितं ब्रह्मप्रसूत वंशोद्भूतानां चरितम्, (८) संस्था प्रलयः, (९) हेतुः अदृष्टयुतो जीवः सृष्टिप्रलयहेतुः (१०) अपाश्रयः परब्रह्म ।

ब्रह्मवैवर्तपुराणे श्रीकृष्ण जन्मखण्डे १३२ अध्याये प्रतिपादितानि पुराणानां दशलक्षणानि—

सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्मणां वासना वार्ता मनूनान्तुक्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्तनं हरेरेव देवानां च पृथक् पृथक् ॥
दशादिकं लक्षणं च महतां परिकीर्तितम् ॥

मार्कण्डेयपुराणं वै ह्याग्नेयं चाष्टमं स्मृतम् ।
भाविष्यं ब्राह्मवैवर्तं लैङ्गं वाराहकं तथा ।।
स्कान्दं च वामनं कौर्मं मात्स्यं गारुडमेव च ।
ब्राह्माण्डं च पुराणानि स्मृतान्यष्टादशानि च ।।[1]

एषां पुराणानां सांकेतिकाऽद्याक्षरैः परिगणनं देवीभागवते (१।३।२१) इत्थं कृतमस्ति—

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापद्लिङ्गकूस्कानि पुराणानि पृथक् पृथक् ।। इति ।

अष्टादश पुराणानि[2]

(१) सनत्कुमारपुराणं, (२) नृसिंह पुराणं, (३) नन्दिपुराणं, (४) वायुपुराणं, (५) दौर्वाससपुराणं, (६) बृहन्नारदीयपुराणं, (७) कपिलपुराणं, (८) मानवपुराणं, (९) औशनसपुराणं, (१०) वरुणपुराणं, (११) कालिकापुराणं, (१२) वसिष्ठपुराणं, (१३) महेश्वरपुराणं, (१४) साम्बपुराणं, (१५) सौरपुराणं, (१६) पराशरपुराणं, (१७) शिवधर्मपुराणं, (१८) मारीचपुराणं च ।

अष्टादशोपपुराणानि[3]

(१) आदित्यपुराणं (२) मुद्गलपुराणं (३) कौर्मपुराणं (४) कल्किपुराणं, (५) देवीपुराणं (६) बृहद्धर्मपुराणं (७) परानन्दपुराणं (८) सूर्यपुराणं (९) वह्निपुराणं (१०) पशुपतिपुराणं (११) रेणुकापुराणं

---

१. शतकोटिश्लोकात्मकस्याऽदिपुराणस्येमानि महापुराणानि प्रकरणरूपाणि वर्तन्ते । उक्तश्लोकेषु प्रदर्शित एषामनुक्रमः पुराणेष्वङ्गीकृतोऽस्ति ।

२. पुराणान्युपपुराणानि महापुराणोद्भूतानि विद्यन्त इति भाति । अत्रैषां पुराणानां सूतसंहिताऽनुसारेण निर्देशः कृतोऽस्ति ।

३. पुराणोपपुराणान्यधिकृत्य पुराणज्ञेषु विप्रतिपत्तिर्मतभेदश्च वर्तेते । पुराणोपपुराणादिप्रणयनसमयमधिकृत्यापि पुराणेतिहासज्ञेषु चैकमत्यं न प्रतिभाति । इमं विषयमधिकृत्य डा० हाजरा-बूह्लरादिमहोदयैः पुराणिक रिकार्डस् आन् हिन्दू राइट्स एण्ड कस्टम्स इन्डियन कल्चर, न्यू इण्डियन एन्टिक्वेरी आदि ग्रन्थनिबन्धादिषु विवेचनं कृतमुपलभ्यते ।

(१२) भैरवपुराणं (१३) शौक्रपुराणं (१४) गणेशपुराणं (१५) भार्गव-पुराणं (१६) कौमारपुराणं (१७) विष्णुधर्मोत्तरपुराणं (१८) भास्कर-पुराणं च।

महापुराणानां वर्गीकरणम्

ब्रह्मविष्णुशिवदेवीसूर्याग्निदेवताभेदेन महापुराणां इत्थंविधया वर्गीकरणं भवितुमर्हति—

ब्रह्मणः—ब्रह्मपुराणं, पद्मपुराणं, च।
विष्णोः—विष्णुपुराणं, नारदपुराणं, गरुडपुराणं च।
शिवस्य—शिवपुराणं, स्कन्दपुराणं, लिङ्गपुराणं, कूर्मपुराणं, वामनपुराणं, वराहपुराणं, ब्रह्मवैवर्तपुराणं, मत्स्यपुराणं, मार्कण्डेयपुराणं ब्रह्माण्डपुराणं च।
देव्याः—देवीभागवतम्।
सूर्यस्य—भविष्यपुराणं।
अग्नेः—अग्निपुराणं।

अष्टादश पुराणेषु दशभिर्गीयते शिवः।
त्रिभिः पुराणैः श्रीविष्णुर्द्वाभ्यां हि चतुराननः॥
एकैकेन पुराणेन देवी चाग्निस्तथा रविः॥

पद्मपुराणानुसारेण[1] सात्त्विक-राजस-तामसेतिगुणत्रयभेदेनापि महापुराणानि वर्गीकृतानि भवितुमर्हन्ति।

सात्त्विकमहापुराणानि (षट्संख्याकानि)

विष्णु-नारद-भागवत-गरुड-पद्म-वराहपुराणानि सन्ति।
राजसमहापुराणानि (षट्संख्याकानि)

ब्रह्म-ब्रह्माण्ड-ब्रह्मवैवर्त-मार्कण्डेय-भविष्य-वामनपुराणानि वर्तन्ते।
तामसमहापुराणानि (षट्संख्याकानि)

मत्स्य-कूर्म-लिंग-शिव-स्कन्द-अग्निपुराणानि विद्यन्ते।

---

१. अस्मिन् विषये पद्मपुराणे, उत्तरखण्डे (२६३।८१-८४) दृश्यताम्।

महापुराणानां संक्षिप्ततमः परिचयः

१. ब्रह्मपुराणम्

ब्राह्मं सर्वपुराणाग्र्यं धर्मकामार्थमोक्षदम् ।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते ॥

(नारदपुराणम्)

अस्मिन् पुराणे २४५ अध्यायाः १०००० संख्याकाः श्लोकाश्चसन्ति[1] । अस्मिन् सृष्टिवर्णनं, सूर्यसोमवंशादीनां वर्णनं, पार्वत्याख्यानं, मार्कण्डेयाख्यानं, गौतमीगङ्गादिप्राचीनतीर्थमाहात्म्यं, कृष्णचरित्र वर्णनं, मरणोत्तराऽवस्थावर्णनं, कोणार्कमहत्त्वं, सांख्ययोगसिद्धान्तानां विवरणं, परमपुरुषार्थधर्ममहत्त्वप्रतिपादनञ्चविहितानिसन्ति ।

२. पद्मपुराणम्

सर्वभूताश्रयं तच्च पाद्मिमित्युच्यते बुधैः ।
पाद्मं तत् पञ्चपञ्चाशत् सहस्राणीह पठ्यते ॥

(पद्मपुराणम्)

अस्मिन् (१) सृष्टिखण्डं (२) भूमिखण्डं (३) स्वर्गखण्डं (४) पातालखण्डं (५) उत्तरखण्डञ्चेति पञ्च खण्डानि, ५५००० संख्याकाः श्लोकाश्च सन्ति ।

सृष्टिखण्डे—देवमुनिपितृमनुष्याणां नवविधसृष्टिवर्णनं, पर्वतद्वीपसप्तसागरवर्णनं, दानप्रवणानां राज्ञां वर्णनं, राजवंशानुकीर्तनं, मोक्षसाधनवर्णनं च सन्ति ।

भूमिखण्डे–शिववर्मणः पृथोश्च चरित्रवर्णनं, सतीसुकलायाः कथानिरूपणं, ययातिमातलिसंवादस्य, पापपुण्यफलानां, विष्णुभक्तिमहत्त्वस्य, च्यवनऋषिकथायाश्च वर्णनं, विष्णुशिवयोरैक्यप्रतिपादनं च कृतमस्ति ।

---

१. अष्टादश महापुराणानां ग्रन्थ (श्लोक) परिगणनमत्र श्रीमद्भागवतस्य द्वादशस्कन्धीयत्रयोदशध्यायानुसारेणैव कृत मस्ति । यतो हि श्रीमद् भागवतानुसारिसमस्ताष्टादशपुराणग्रन्थपरिगणितसंख्या-योगो हि चतुर्लक्षसंख्यात्मको भवति । अतिरिक्तेषु पुराणेषु नारदमत्स्याग्निदेवीभागवतादिषु महापुराणानां ग्रन्थपरिगणनं चतुर्लक्षेभ्यो न्यूनमधिकं वा प्रतिभाति । श्रीमद्भागवतीय ग्रन्थपरिगणनानुसारेण सम्प्रति सम्भवतो भागवतद्वयं, लिङ्गपुराणं, मत्स्यपुराणं, ब्रह्माण्डपुराणमतिरिक्तानि कतिपयपुराणानि च समुपलभ्यन्ते ।

स्वर्गखण्डे यक्षदेवगन्धर्वाप्सरसां लोकानां वर्णनं, शकुन्तलोपाख्यानं च समुपलभ्येते ।

पातालखण्डे–नागलोकादीनां वर्णनं, रामचरितकथनं, भागवतमाहात्म्यं च सन्ति ।

उत्तरखण्डे–विविधाख्यानवर्णनं, विष्णुभक्तिमाहात्म्यं, नामसङ्कीर्तनविधि-वर्णनं, नामापराधवर्णनं च सन्ति ।

३. विष्णुपुराणम्

यत्प्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः ।
त्रयोविंशति साहस्रं तत्प्रमाणं विदुर्बुधाः ॥

(मत्स्यपुराणम्)

अस्मिन् षडंशाः, १२६ अध्यायाः, २३००० संख्याकाः श्लोकाश्च वर्तन्ते । प्रथमांशे वाराहकल्पीयसृष्टिवर्णनं, ध्रुवप्रह्लादचरित्रकथनं च, द्वितीयांशे भूगोलवर्णनं, तृतीयांशे आश्रमकर्तव्यप्रतिपादनं, वेदशाखा-वर्णनं च, चतुर्थांशे सोमवंशीययाति वर्णनं, यदुतुर्वसुद्रुह्यु-अनुपूरुवंशा-दीनां विवरणं च पञ्चमांशे कृष्ण चरित्र वर्णनं, षष्ठांशे च प्रलयनिरूपणं, भक्तिविवेचनं च विहितानिसन्ति ।

इदं पुराणं विशेषतया वैष्णवदर्शनानां समुपजीव्यत्वेन समालम्बनं परम्प्रमाणं चास्ति । अतस्तावदिदमधिकृत्य वैष्णवदार्शनिकैः टीका-व्याख्याः प्रणीता विद्यन्ते । तासु काश्चन प्रमुखा व्याख्याः–विष्णुपुराण-टीका चित्सुखमुनिविरचिता, विष्णुपुराणव्याख्या नृसिंहभट्टकृता, स्वप्रकाशव्याख्यानम् श्रीधरस्वामिप्रणीतं, विष्णुचित्तीय टीका विष्णुचित्त-कृता, विष्णुपुराणव्याख्या सूर्यकरमिश्रकृता, वैष्णवाकूतचन्द्रिका व्याख्या रत्नगर्भभट्टाचार्यप्रणीता, स्वभावार्थदीपिकाव्याख्या जगन्नाथपाठक कृता च ।

४. शिवपुराणम्

वायुप्रोक्तं पुराणं हि चतुर्थं शिवसंज्ञकम् ।
चतुर्विंशति साहस्रं शिवमाहात्म्यसयुतम् ॥

अस्मिन् (१) विद्येश्वरसंहिता, (२) रुद्रसंहिता, (३) शतरुद्रसंहिता, (४) कोटिरुद्रसंहिता, (५) उमासंहिता, (६) कैलाससंहिता, (७) वायवीय संहिता चेति सप्तसंहितास्सन्ति । रुद्रसंहितायां सृष्टिसतीपार्वतीकुमार-

युद्धखण्डानि पञ्चसंख्याकानि वर्तन्ते। वायवीय संहितायां पूर्वोत्तरेति खण्डद्वयं विद्यते। पुराणेऽस्मिन् ४५७ अध्यायाः २४००० संख्याकाः श्लोकाश्च सन्ति। विद्येश्वर संहितायां सर्वविधशिवलिङ्गानां महत्त्वं, तेषां लक्षणपूजनादीनां महत्त्वं, शिवनाम जपरुद्राक्षत्रिपुण्ड्रादीनां महत्त्वं च प्रतिपादितमस्ति। रुद्रसंहितायां श्वेतकल्पीयसृष्टिवर्णनं, सतीचरित्र-पार्वतीचरित्रस्कन्दगणेशप्रादुर्भावबाणासुरवधादीनां वर्णनं चास्ति। शतरुद्र-संहितायां विश्वेशशिवपञ्चावतारनन्दीश्वरावतारकालभैरवाव-तारैकादशरुद्रावतारविविधरुद्रावतारादीनां वर्णनं वर्तते। कोटिरुद्र-संहितायां द्वादशज्योतिर्लिङ्गानां परिवर्णनमस्ति। उमासंहितायां पापनर-कादीनां वर्णनम्, उमाया विविधावताराणां वर्णनं च स्तः। कैलास संहितायां संन्यासविधेः प्रणवमाहात्म्यस्य च विवरणं वरीवर्ति। वायवीय संहितायां वायुद्वारा पशुपाशपत्यादीनां वर्णनं पाशुपतव्रतनिरूपणं, वर्णा-श्रमधर्मनिरूपणं, शिवपञ्चाक्षरमन्त्रदीक्षाषडध्वादीनां वर्णनम् अष्टाङ्गयोग-वर्णनं च विद्यन्ते। इदं शिवपुराणं[1] शैवदर्शनस्योपजीव्यत्वेन परं प्रामाण्य-मुररीकरोति।

---

१. विष्णुपद्ममार्कण्डेय कूर्मवाराहलिङ्ग ब्रह्मवैवर्त श्रीमद्भागवतस्कन्दपुराणेषु शिवपुराणस्यैवाष्टादशमहापुराणान्यतमत्वेनोल्लेखः समुपलभ्यते। मत्स्यनारद देवीभागवतपुराणेषु तावद् वायुपुराणस्योल्लेखः सन्दृश्यते। यद्यपि कतिपयैः पुराणज्ञैः शिवपुराणस्य वायुपुराणाभिन्नत्वं स्वीक्रियते, तथाऽपि न तथा वस्तु-स्थितिः प्रतिभाति। यतो हि शिवपुराणं सम्प्रति मुम्बापुरीस्थ वेंकटेश्वर-मुद्रणालय द्वारा १९८२ वैक्रमेऽब्दे मुद्रितं समुपलभ्यते। वायुपुराणं भिन्नतया कलिकातास्थ-रायल-एशियाटिक सोसाइटी द्वारा बिब्लिओथिका इण्डिका-ग्रन्थमालायां १८८९ ईसवीयेऽब्दे प्रकाशितं, पुण्यपत्तनस्थानन्दाश्रमद्वारा १९०५ ईसवीये, वर्षे प्रकाशितं च सन्दृश्यते। अनयोः शिववायुपुराणयोः प्रतिपाद्यविषयाकाराध्यायश्लोकसंख्यादिभिर्वैभिन्यं स्पष्टतया प्रतिभाति। अतस्तावदत्र शिवपुराणस्य महापुराणत्वं, वायुपुराणस्य च पुराणत्वं स्वीकृत्य विवरणं समुपस्थापितमस्ति।

शिवपुराणस्य वायवीयसंहितायाः प्रथमाध्याये, विद्येश्वररौद्रविनायक-औमभमातृ-रुद्रैकादशकैलासशतरुद्र कोटिरुद्र सहस्रकोटिवायुप्रोक्त धर्मेति द्वादशसंहितात्मक-स्यापरस्य शिवपुराणस्योल्लेखः समुपलभ्यते।

५. देवीभागवतम्

अष्टादश च साहस्रं देवीमाहात्म्यसंयुतम् ।
देवीभागवतं पुण्यं पुराणं व्यासनिर्मितम् ॥

अस्मिन् द्वादशस्कन्धाः, ३१८ अध्यायाः १८००० श्लोकाश्च सन्ति । अत्र प्रमुखतया, सारस्वतकल्पीयसृष्टिवर्णनं, हयग्रीवावतारोपदेशादीनां विवरणं, जगदम्बाया अवताराणां वर्णनं, महिषासुरशुम्भनिशुम्भचण्ड-मुण्डासुराणां वधवर्णनं वृत्रासुरवधनिरूपणं, महामायामाहात्म्यवर्णनं, नवदुर्गाऽवतारविवरणं, मनुवंशवर्णनं, लोकवर्षभूमण्डलखगोलादीनां, पातालादीनां च वर्णनं, नरकवर्णनं, श्रीदुर्गाया विविधावतारनिरूपणं, मन्वन्तरवर्णनं, गायत्र्या महत्त्वप्रख्यापनं च कृतं विद्यते । अस्य पुराणस्य-प्रारम्भः देवीगायत्र्या भवति । अस्मिन्नपि महापुराणग्रन्थ (श्लोक) परिगणनं कृतमस्ति । देवीभागवतस्य[1] शैवनीलकण्ठ (वै० १८ श०)

---

१. यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥
सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरोत्तमाः ।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमुच्यते ॥
(मत्स्यपुराणं ५३।२०-२१)

हयग्रीव ब्रह्मविद्या यत्र वृत्रवधस्तथा ।
गायऽया च समारम्भः तद्वैभागवतं विदुः ॥
(वामनपुराणम्)

एषु पद्येषु प्रतिपादितानि भागवतमहापुराण लक्षणानि चैतान्यभ्युपगम्यन्ते — (१) गायत्र्या प्रारम्भः, (२) वृत्रासुरवधवर्णनं, (३) सारस्वतकल्पीयराज-वंशादिवर्णनं (४) हयग्रीवब्रह्मविद्यावर्णनं च । अस्येतरव्यावर्तकस्य, भागवतत्व प्रतिपादकस्य लक्षण चतुष्टयस्य समन्वयो देवीभागवते यथा भवति, तथा श्रीमद्भागवते न भवतीति भाति । श्रीमद्भागवतस्य द्वितीयस्कन्धान्तर्गतं 'पाद्मं कल्पमथो शृणु' इति वचनानुसारेण च इतरलक्षणत्रयस्य श्रीमद्भागवते सत्त्वेऽपि सारस्वतकल्पीयराजवंशवृत्तान्तस्य तत्राभावात् देवीभागवते च तस्य सत्त्वात् तेषां चतुर्लक्षणानां पूर्णत्वेन समन्वयः देवीभागवते भवतीति-कृत्वाऽस्य महापुराणत्वं निश्चीयते । श्रीमद्भागवतं हि महापुराणोत्तमं प्रस्थान चतुष्टयान्यतमं पुराणसारसर्वस्वं अध्यात्म-शास्त्रं स्वीक्रियते ।

कृता व्याख्या समुपलभ्यते। इदं महापुराणं शाक्तदार्शनिकैः शाक्तसम्प्रदायस्योपजीव्यत्वेन परं प्रमाणमूरीक्रियते।

६. नारदपुराणम्

यत्राह नारदो धर्मान् बृहत्कल्पाश्रयान् बहून्।
पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते॥

(मत्स्यपुराणम्)

अस्मिन् खण्डद्वयं, २०७ अध्यायाः, २५००० संख्याकाः श्लोकाश्च सन्ति। अत्र विशेषतया वर्णाश्रमाचारवर्णनं, श्राद्धप्रायश्चित्तादीनां विवरणं, वेदषडङ्गानां वर्णनं विष्णुकृष्णमहेशादीनां मन्त्रनिरूपणं मुक्तिसाधनविष्णुभक्तिमहत्त्ववर्णनं, अष्टादशमहापुराणानां विस्तृता विषयानुक्रमणिका च सन्ति। अनयाऽनुक्रमणिकया महापुराणानां मूलस्वरूपं ज्ञातुं शक्यते।

७. मार्कण्डेयपुराणम्[1]

मार्कण्डेयेन कथितं तत्सर्वं विस्तरेण तु।
पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते॥

(मत्स्यपुराणम्)

अस्मिन् १३४ अध्यायाः, ९००० संख्याकाः श्लोकाश्च[2] सन्ति। अत्रहि ब्रह्मवादिनीमदालसायाश्चरित्रवर्णनं, नरिष्यन्तस्य, राज्ञः इष्वाकोः, श्रीकृष्णस्य, रामचन्द्रस्य, सोमवंशस्य पुरूरवोनहुषययातीनां राज्ञां च चरित्रनिरूपणं, सांख्यकथायाः परिवर्णनं च सन्ति। शाक्तसम्प्रदायस्य नितान्तसमादरणीया सकवचार्गलाकीलकाद्या श्रीदुर्गासप्तशती अस्मिन् सन्निहिता समुपलभ्यते।

---

१. अस्य पुराणस्यांग्लभाषायामनुवादः पार्जिटर महोदेन कृतः, बिब्लिओथिका इन्डिका, कलिकाता द्वारा १९०५ ईसवीयेऽब्दे प्रकाशित उपलभ्यते।

२. मुंबय्यां वेंकटेश्वरमुद्रणालयेन मुद्रिते मार्कण्डेयपुराणस्य संस्करणे, इतरेषु संस्करणेषु च १३४ अध्यायाः, ६९०० श्लोकाश्च सम्प्रति समुपलभ्यन्ते।

८. अग्निपुराणम्

वसिष्ठायाग्निना प्रोक्तं आग्नेयं चाष्टमं स्मृतम् ।
नानाविद्याप्रवक्तारं दशपञ्चचतुःशतम् ॥

अस्मिन् सङ्कलिताः ३८३ अध्यायाः १५४०० संख्याकाः श्लोकाश्च सन्ति । अत्र च रामायणमहाभारतीयाः कथा विशेषतया ईशानकल्पीयावतारकथाश्च वर्णिताः सन्ति । 'आग्नेये हि पुराणेऽस्मिन् सर्वाविद्याः प्रदर्शिताः' इत्यग्निपुराणवचनानुसारेणास्मिन्नग्निपुराणे शिल्पशास्त्र-ज्योतिः शास्त्र-धर्मशास्त्र -राजनीतिशास्त्र - आयुर्वेद-अलङ्कारशास्त्र-छन्दः शास्त्र - व्याकरणशास्त्र - कोश - योग-अद्वैतवेदान्तादीनां विवरणमुपन्यस्तं वरीवर्ति । अतो हि पुराणेषु पुराणमिदं विद्यानां ज्ञानकोषरूपं समवगम्यते । अस्मिन्नपि महापुराणानां ग्रन्थ (श्लोक) परिगणनादिकं कृतमस्ति ।

९. भविष्यपुराणम्[1]

भविष्य चरितप्रायं भविष्यं तदिहोच्यते ।
चतुर्दश सहस्राणि तथा पञ्च शतानि च ॥

(मत्स्यपुराणम्)

अस्मिन् ब्राह्मपर्व-वैष्णवपर्व-शैवपर्व-सौरपर्व-प्रतिसर्ग-पर्वेति पञ्च पर्वाणि सन्ति । संकलिताः ६०५ अध्यायाः १४५०० संख्याकाः श्लोकाश्च वर्तन्ते ।

एतस्मिन् सूर्योपासनाया रहस्यस्य भृशं महत्त्वं प्रतिपादितमस्ति । शाकद्वीपीयब्राह्मणवर्णनं, सृष्टिभूगोलादिवर्णनं, मृतसञ्जीवनीलताया वर्णनं, कलियुगोत्पद्यमानराजवंशादीनां निरूपणञ्च समुपलभ्यन्ते । अत्र वनस्पतिविज्ञानस्य सविस्तरं विवरणं ज्ञातुं योग्यं प्रतिभाति ।

---

१. वङ्गीयविश्वकोषकारमतानुसारं पुराणस्यास्य चत्वारि संस्करणानि वर्तन्ते । चतुर्षु संस्करणेषु पारस्परिकं साम्यं सर्वांशेन न प्रतिभाति । समये समयेऽस्मिन् प्रक्षिप्तांशस्य, पाठभेदस्य च सन्निवेशनमभूदिति भाति । अनेनास्य मौलिकत्वं प्रामाणिकत्वं चासन्दिग्धं न प्रतिपद्यते ।

१०. ब्रह्मवैवर्तपुराणम्

यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ।
तदष्टादश साहस्रं ब्रह्मवैवर्तमुच्यते ॥

(मत्स्यपुराणम्)

अस्मिन् ब्रह्म-प्रकृति-गणेश-कृष्णजन्मेति चत्वारि खण्डानि, २७४ अध्यायाः, १८००० संख्याकाः श्लोकाश्च सन्ति । ब्रह्मखण्डे ब्रह्मवर्णनं, रथन्तरकल्पीयसृष्टिवर्णनं, आयुर्वेदस्यविवरणं च सन्ति । प्रकृतिखण्डे ब्रह्मणः शक्तीनां दुर्गालक्ष्मीसरस्वतीसावित्रीराधारूपिणीनां, प्रकृतिरूपिणीनां वर्णनं, सावित्रीतुलस्योः कथानिरूपणं, कवचस्तोत्रमन्त्र पूजनादीनां विधानं, शुभाशुभकर्मविपाकवर्णनं च सन्ति । गणेशखण्डे गणेशजन्म चरित्रवर्णनं, गुप्तस्तोत्रमन्त्रतन्त्रकवचादीनां वर्णनं च कृतं वर्तते । श्रीकृष्णजन्मखण्डे श्रीकृष्ण चरित्र वर्णनं, साधुसंरक्षण-दुष्टदलनादि कार्यवर्णनं, राधातत्त्व-वर्णनं, महापुराणानां लक्षण-श्लोकपरिगणनादिविषयाणां विवरणं च समुपलभ्यन्ते । इदं पुराणं गौडीयवैष्णवानां कृते परं प्रमाणमस्ति । श्रेष्ठपुरुषार्थमोक्षसाधनकाशीक्षेत्रस्य महत्त्वप्रतिपादकं काशीरहस्यमस्य तृतीयखण्डस्य परिशिष्टमस्ति ।

११. लिङ्गपुराणम्

कल्पान्तं लिङ्गमित्युक्तं पुराणं ब्रह्मणास्वयम् ।
तदेकादश साहस्रं फाल्गुन्यां यः प्रयच्छति ॥

(मत्स्यपुराणम्)

अस्मिन् पूर्वोत्तरभागौ, १६३ अध्यायाः ११००० संख्याकाः श्लोकाश्च सन्ति । अत्रतावल्लिङ्गविषयकं विवरणं वैस्तर्येणोपस्थापितमस्तीत्यतः 'लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यत' इति शिवपुराणोक्त-दिशाऽस्य लिङ्गपुराणमित्यभिधानं प्रसिद्धमस्ति । अत्र शंकरकृताऽग्नेय-कल्पीयसृष्टिवर्णनं, शंकरस्याष्टाविंशत्यवतारवर्णनं, शैवव्रततीर्थादीनां माहात्म्यनिरूपणं, पशुपाशपशुपतिव्याख्यानं, शिवतत्त्वविवेचनं, लिङ्गो-पासनायाः प्राधान्यप्रख्यापनं च समुपलभ्यन्ते । अतो हीदं पुराणं शैव-दार्शनिकानां, शैवतान्त्रिकाणां च कृते समुपजीव्यप्रमाणं वरीवर्ति ।

१२. वराहपुराणम्

महावराहस्यपुनर्माहात्म्यमधिकृत्यच ।
चतुर्विंश सहस्राणि तत्पुराणमिहोच्यते ॥

(मत्स्यपुराणम्)

अस्मिन् २१८ अध्यायाः, २४००० संख्याकाः श्लोकाश्च सन्ति । सम्प्रति, अस्मिन् १०७०० संख्याकाः श्लोका एवोपलभ्यन्ते । अस्य गौडीयदाक्षिणात्येति पाठद्वयं वर्तते । अत्र मानवकल्पीयवराहावतार वर्णनं, पृथिव्याद्युद्धारवर्णनं, द्वादशीव्रतस्य, मथुरायाश्चमाहात्म्यनिरूपणं, नाचिकेतोपाख्यानं, स्वर्गनरकादीनां वर्णनं च वरीवृतति ।

१३. स्कन्दपुराणम्

स्कान्दंनाम पुराणं तदेकाशीति निगद्यते ।
सहस्राणि शतञ्चैकमिति मर्त्येषु गीयते ॥

(मत्स्यपुराणम्)

विशालतमेऽस्मिन् महापुराणे षट्संहिताः, सप्त खण्डानि, १६७१ अध्यायाः ८११०० संख्याकाः श्लोकाश्च सन्ति ।

तत्र षट्संहिताः—(१) सनत्कुमारसंहिता, (२) सूतसंहिता, (३) शंकरसंहिता (४) वैष्णवसंहिता (५) ब्राह्मसंहिता (६) सौरसंहिता च ।

सप्त खण्डानि—(१) माहेश्वरखण्डं (२) वैष्णवखण्डं (३) ब्रह्मखण्डं (४) काशीखण्डं (५) रेवा (अवन्ति) खण्डं (६) तापी (नागर) खण्डं (७) प्रभासखण्डं च ।

संहितासु सूतसंहिता[1], वैदिकतान्त्रिकोभयविधशिवोपासना प्रतिपादिकाऽस्तीतिकृत्वाऽस्याः स्कन्दपुराणे भृशं महत्त्वं वरीवर्ति । अस्यां चत्वारि खण्डानि सन्ति । तानि च—शिवमाहात्म्यखण्डं, ज्ञानयोगखण्डं, मुक्तिखण्डं, यज्ञवैभवखण्डं च । अस्यामेव सूतसंहितायां शिवगीता, सूतगीता चाध्यात्मसिद्धान्तप्रतिपादिके समुपलभ्येते ।

शंकरसंहितायां शिवरहस्यप्रतिपादकानि सप्त खण्डानि सन्ति । तानि च—सम्भवखण्डं, आसुरखण्डं, माहेन्द्रखण्डं, युद्धखण्डं, देवखण्डं, दक्षखण्डं, उपदेशखण्डं च ।

---

१. सूतसंहिताया माधवाचार्यप्रणीता तात्पर्यदीपिका व्याख्या, पुण्यपत्तनस्थानन्दाश्रमद्वारा प्रकाशिता समुपलभ्यते ।

माहेश्वरखण्डे केदारखण्डं, कुमारिकाखण्डं च स्तः। अनयोः शिव-पार्वतीचरित्रवर्णनमुपलभ्यते।

वैष्णवखण्डे उत्कलदेशीय पुरीस्थितजगन्नाथमहत्त्वं, पूजनादिविधानं च विवृतमस्ति।

ब्रह्मखण्डे ब्रह्मारण्यखण्डं, ब्रह्मोत्तरखण्डं च विद्येते। अनयोर्धर्मारण्यस्य, अवन्तिकास्थमहाकालस्य च महत्त्वं प्रतिपादितमस्ति।

काशीखण्डे काशीक्षेत्रस्य, तदन्तर्गतसकलदेवतातीर्थशिवलिङ्गादीनां च माहात्म्यं, काश्याः तत्पुरुषकल्पीय प्राचीन भूगोलवर्णनं च वर्तेते।

रेवाखण्डे नर्मदायाः, तत्तीरस्थसमस्तदीर्थक्षेत्रादीनां च महत्त्वम् अवन्तिकाया महत्त्वं च प्रतिपादितमस्ति। अस्मिन्नेव खण्डे श्री सत्य-नारायणस्य प्रसिद्धव्रतकथानिरूपणं समुपलभ्यते।

तापीखण्डे तापीनदीतीरस्थतीर्थादीनां वर्णनं विश्वकर्मोपाख्यानस्य, वंशाख्यानस्य, हाटकेश्वरमाहात्म्यस्य च निरूपणं सन्दृश्येते। प्रभासखण्डे प्रभासक्षेत्रस्य, द्वारावत्याश्च वर्णनं, तस्या भूगोलवर्णनं च समव-गम्येते।

१४. वामनपुराणम्

त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः।
त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्तितम्॥
पुराणं दशसाहस्रं कूर्मकल्पानुगं शिवम्॥

(मत्स्यपुराणम्)

अस्मिन् पूर्वोत्तरेतिभागद्वयं, माहेश्वरी-भागवती-सौरी-गाणेश्वरीति चतस्रः संहिताः, ९५ अध्यायाः, १०००० संख्याकाः[1] श्लोकाश्च सन्ति। अत्र प्राधान्येन कूर्मकल्पीय वामनावतारस्य सविस्तरं विवरणं कृतमुप-लभ्यते। माहेश्वरी संहितायां शिवस्य, भागवती संहितायां देव्याः, सौरीसंहितायां सूर्यस्य, गाणेश्वरी संहितायां गणेशस्य च विशदतया चरित्रवर्णनं कृतमस्ति।

---

१. सम्प्रति वामनपुराणस्योत्तरभागः, चतुःसहस्रश्लोकाश्च नोपलभ्यन्त इतिभाति।

१५. कूर्मपुराणम्

प्रोक्तं त्रिवर्गमाहात्म्यं पुराणे कूर्मरूपिणा ।
अष्टादशसहस्रं तल्लक्ष्मीकल्पानुषङ्गिकम् ॥

अस्मिन् पूर्वोत्तरभागद्वयं, ब्राह्मी-भागवती-सौरी-वैष्णवीतिचतस्रः संहिताः ९९ अध्यायाः १८००० संख्याकाः[1] श्लोकाश्च सन्ति। अत्र लक्ष्मीकल्पीयाख्यानानि वर्णितानि सन्ति। शिवप्राधान्यं, ब्रह्मविष्णु-शिवैक्यं, शक्तिसहस्रनाम्नां महत्त्वं, काशीप्रयागादितीर्थमाहात्म्यं च निरूपितानि वर्तन्ते। अस्मिन् ईश्वरगीता, व्यासगीताचोपलभ्येते।

१६. मत्स्यपुराणम्

अधिकृत्याब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः ।
तन्मात्स्यमिति जानीध्वं सहस्राणि चतुर्दश ॥

(मत्स्यपुराणम्)

अस्मिन् २९० अध्यायाः, १४००० संख्याकाश्च श्लोकास्सन्ति। अत्र विशदतया श्राद्धकल्पस्य विवेचनं, सोमवंशादीनां, प्रयागतीर्थस्य, भूगोलस्य, व्रतमहत्त्वस्य, त्रिपुरतारकासुरादिवधादीनां, काशीमाहात्म्यस्य च वर्णनं कृतमस्ति। अस्मिन् सकलमहापुराणानां विषयानुक्रमणिका, ग्रन्थसंख्या चोपलभ्येते। भृगु-अंगिरा-अत्रि-विश्वामित्र-कश्यप-वसिष्ठ-पराशर-अगस्त्य-आदि ऋषि प्रवराणां वंशवर्णनं, राजधर्मस्य विवरणं, प्रतिमालक्षणादिकञ्चाभ्युपगम्यन्ते।

१७. गरुडपुराणम्

गरुडायाब्रवीत् पृष्टो भगवान् गरुडासनः ।
एकोनविंश साहस्रं तार्क्ष्यकल्पकथाऽचितम् ॥

(नारदपुराणम्)

अस्मिन् पूर्वोत्तरखण्डद्वयं, २८७ अध्यायाः, १९००० संख्याकाः[2] श्लोकाश्च सन्ति। पूर्वखण्डे रत्नशास्त्रायुर्वेदच्छन्दःशास्त्रसांख्ययोगादि

---

१. कूर्मपुराणस्य केवला ब्राह्मीसंहिता, षट्सहस्रश्लोकाश्च समुपलभ्यन्त इति स्थितिः।

२. सम्प्रति गरुडपुराणे एकादशसहस्र संख्याका एव श्लोका उपलभ्यन्ते।

दर्मनानां विस्तृतं विवरणं कृतमस्ति। उत्तरखण्डं प्रेतकल्पेतिनाम्ना व्यपदिश्यते। अस्मिन् प्रेतयोनिपरजन्मादिविषयकं वर्णनमुपलभ्यते।

१८. ब्रह्माण्डपुराणम्[1]

शृणुवत्स ! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम्।
यच्च द्वादश साहस्रं भाविकल्पकथायुतम्॥

(नारदपुराणम्)

अस्मिन् प्रक्रियापादः, अनुषङ्गपादः, उपोद्घातपादः, उपसंहार-पादश्चेति चत्वारः[2] पादाः, १६१ अध्यायाः, १२००० संख्याकाः श्लोकाश्च सन्ति। अत्र ब्रह्माण्डस्य, विश्वस्य च विशदं वर्णनं कृतमस्ति। द्वीप पर्वतनदीनां, ग्रहनक्षत्रमण्डलादीनां विवरणं, प्रमुखक्षत्रियवंशादीनां वर्णनं चोपलभ्येते। प्रसिद्धमध्यात्मरामायणं अस्मिन्नेव समुपलभ्यते।

श्रीमद्भागवतम्

श्रीमद्भागवतं पुण्यं पुराणेषूत्तमं स्मृतम्।
अष्टादश च साहस्रं पाद्मकल्पकथायुतम्॥

अस्मिन् महापुराणोत्तमे श्रीमद्भागवते द्वादश स्कन्धाः, ३३५ अध्यायाः, १८००० संख्याकाः श्लोकाश्च सन्ति।

लौकिकसस्कृतभाषायां समुपनिबद्धेषु महापुराणेषु, ब्रह्मानन्दनिमग्नेन कृष्णद्वैपायनभगवद्वेदव्यासेन समाधिभाषायां विरचितं श्रीमद्भागवतं विशिष्टं समनुभूयते। महापुराणस्य दशलक्षणैस्समन्वितमपि श्रीमद्-भागवतं न केवलं महापुराणम्, अपितु—

सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित्॥

इति व्यासवचनानुसारणे, तत्त्वज्ञानप्रतिपादकं, वेदान्तसारभूतं, निगमकल्पतरुगलितममृतपूर्णं फलमस्ति। निखिलपुराणानां महाभारतस्य

---

१. वैक्रम पञ्चमशतके भारतीयैर्नीतस्य ब्रह्माण्डपुराणस्य यवद्वीपे कविभाषायां तावदनुवादः समुपलभ्यते।

२. इदानीं प्रकाशिते ब्रह्माण्डपुराणे प्रक्रियापाद उपोद्घातपादश्चोपलभ्येते।

च प्रणयनानन्तरमपि कृष्णद्वैपायनस्य भगवतो वेदव्यासस्य स्वान्तं परितोषं भृशं नालभत, अतो हि तेन भक्तिज्ञानवैराग्यनिरूपण प्रधानस्य श्रीमद्भागवतस्य प्रणयनं संव्यधायि।

श्रीमद्भागवतं शास्त्रं कलौ कृष्णेन भाषितम् ॥
किं श्रुतैर्बहुभिः शास्त्रै पुराणैश्च भ्रमावहैः।
एकं भागवतं शास्त्रं मुक्तिदानेन राजते ॥

इतिपद्मपुराणान्तर्गतपद्यानुसारेण महापुराणेषु समेषु श्रेष्ठतमं श्रीमद्भागवतं सकलशास्त्रसारसर्वस्वं, समस्तदर्शनानां समुपजीव्यं, मुक्तिसिद्धान्तविवरणप्रवणं, विदुषां विद्यानां निकषायमाणं, प्रौढतमं चाभ्युपगम्यते।

पुराणेषु च सर्वेषु श्रीमद्भागवतं परम्।
यत्र प्रतिपदं कृष्णो गीयते बहुदर्शिभिः ॥

इति पद्मपुराणीयपद्यानुसारेण प्रस्थान चतुष्टयान्यतमस्य, परब्रह्मणः सगुणविग्रहरूपस्य, पूर्णावतारस्य श्रीकृष्णस्य नवविधायाः भक्तेस्सारसर्वस्वस्य श्रीमद्भागवतस्य प्रणयन-निरूपण-मननादिभिः कृष्णद्वैपायनो वेदव्यासः निरतिशयाऽनन्दसन्दोहनिस्यन्दरूपां परां शान्ति भृशं समलभत्।

निगमसारं श्रीमद्भागवतदर्शनं समेषां दार्शनिकानां वैष्णवावैष्णवानां कृते परं प्रमाणं, सकलदार्शनिकसम्प्रदायोपजीव्यञ्च विद्वांसः समामनन्ति। अतोहि प्रायशः सकलदार्शनिकप्रतिनिधिभूतैः पण्डितवरेण्यैर्भक्तशिरोमणिभिश्च एनदधिकृत्य प्रणीता विविधा व्याख्याः समुपलभ्यन्ते। ताश्चेमाः—

भावार्थदीपिका (अद्वैतमतावलम्बिनी) श्रीधराचार्यः वै० ११ शतकम्
चित्सुखी टीका (अद्वैतमतावलम्बिनी) चित्सुखाचार्यः वै० १३ शतकम्
शुकपक्षीयाटीका (विशिष्टाद्वैतमतावलम्बिनी सुदर्शनसूरिः वै० १३ शतकम्
भागवततात्पर्यनिर्णय टीका (द्वैतमतावलम्बिनी)
आनन्दतीर्थः वै० १३ शतकम्
पदरत्नावलीटीका (द्वैतमतावलम्बिनी) विजयध्वजः वै० १३ शतकम्
परमहंसप्रियाव्याख्या (अद्वैतमतावलम्बिनी) बोपदेवः वै० १३ शतकम्
भागवतचन्द्रिका (विशिष्टाद्वैतमतावलम्बिनी)
वीरराघवाचार्यः वै० १४ शतकम्

सिद्धान्तप्रदीपिका (द्वैताद्वैतमतावलम्बिनी) शुकदेवः वै० १४-१५ शतके
सुबोधिनी व्याख्या (शुद्धाद्वैतमतावलम्बिनी) वल्लभाचार्यः वै० १६ शतकम्
निबन्धविवृतिप्रकाशव्याख्या (शुद्धाद्वैतमतावलम्बिनी)
विठ्ठल दीक्षितः वै० १६ शतकम्
भावप्रकाशिका (अद्वैतमतावलम्बिनी) नृसिंहाचार्यः वै० १६ शतकम्
आध्यात्मिका (शुद्धाद्वैतमतावलम्बिनी) गिरिधराचार्यः वै० १७ शतकम्
मधुसूदनी (अप्राप्ता) (अद्वैतमतावलम्बिनी)
मधुसूदन सरस्वती वै० १७ शतकम्
भागवतव्याख्या (वि० अद्वै० मतावलम्बिनी)
श्रीनिवासाचार्यः वै० १७ शतकम्
क्रमसन्दर्भव्याख्या (अचिन्त्यभेदाभेदमतावलम्बिनी)
जीवगोस्वामी वै० १७ शतकम्
तात्पर्यदीपिका (द्वैतमतावलम्बिनी) नरहरिः वै० १८ शतकम्
भागवतदीपिनी (गौडीय वैष्णवमतावलम्बिनी)
राधारमणगोस्वामी वै० १८ शतकम्
भागवतव्याख्या (द्वैतमतावलम्बिनी) सत्याभिनवतीर्थः वै० १८ शतकम्
भागवतव्याख्या (द्वैतमतावलम्बिनी)
विष्णुस्वामी वै० १८ शतकम् (सम्भवतः)
बुधरञ्जिनी (अद्वैतमतावलम्बिनी) वासुदेवः
भट्टः वै० १८ शतकम् (सम्भवतः)

तत्त्वदीपिकाव्याख्या कल्याणपण्डितः
सुबोधिनी व्याख्या कृष्णदीक्षितः
भागवतव्याख्या हरिभानुशुक्लः
श्रीमद्भागवतटीका शिवरामपण्डितः
अन्वयबोधिनी (गौडीयमतावलम्बिनी) चूडामणिचक्रवर्ती वै० १९ शतकम्
भागवतव्याख्या (द्वैतमतावलम्बिनी) यदुपतिः वै० १९ शतकम्
सारार्थदर्शिनी (अचि० भेदा० मतावलम्बिनी)
विश्वनाथचक्रवर्ती वै० १९ शतकम्

वंशीधरी व्याख्या वंशीधरः वै० १९ शतकम्
बालप्रबोधिनी गिरिधरायः वै० २० शतकम्
अन्वितार्थप्रकाशिका गंगासहायः वै० २० शतकम्

भावार्थदीपिकास्नेहपुरिणी केशवदासः वै० २० शतकम्
बुधरञ्जिनी व्याख्या राममूर्तिशास्त्री वै० २१ शतकम्

श्रीमद्भागवतांशं समधिकृत्य प्रणीता व्याख्याः—

बृहद्वैष्णवतोषिणी (गौडीयमतावलम्बिनी दशमस्कन्ध व्याख्या)
सनातनगोस्वामी वै० १६ शतकम्
श्रीमद्भागवताद्यपद्यव्याख्या मधुसूदनसरस्वती वै० १७ शतकम्
विशुद्धरसदीपिका (दशमस्कन्धव्याख्या) किशोरीलालः
भावविभाविका (दशमस्कन्धव्याख्या) रामकृष्णः
दशमस्कन्धव्याख्या राधामोहनः
एकादशस्कन्ध सारः ब्रह्मानन्द भारती
भागवतगूढ़ार्थदीपिका धनपतिसूरिः
दशमविषमव्याख्या नारायणभट्टगावलः
हरिभक्तिरसायनम् (पद्यात्मकं) हरिसूरिः वै० १९ शतकम्
दशमव्यञ्जनम् (पद्यात्मकं) अज्ञातनामा
श्रीमद्भागवतचूर्णिका (दशमस्कन्धव्याख्या)

अज्ञातकर्तृका अतिरिक्ताः काश्चनव्याख्याः

अमृततरङ्गिणी, आत्मप्रिया, कृष्णपदी, चैतन्यचन्द्रिका, जयमंगला, तत्त्वप्रदीपिका, तात्पर्यदीपिका, भगवल्लीलाचिन्तामणिः, रसमञ्जरी, गणदीपिकाऽऽद्याः।

श्रीमद्भगवद्गीता

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थोवत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥
(श्रीभगवद्गीतामाहात्म्यम्)

संस्कृत वाङ्मये उपनिषत्सारभूतायाः श्रीमद्भगवदगीतायाः महत्त्वं नूनमनन्यसाधारणं प्रतिभाति। भक्तिज्ञानवैराग्यप्रतिपादिकेयं वेदान्त दर्शनस्य चरमं, परमं च रहस्यं विवृणोतीत्यतो दार्शनिकैरियं गीता विविधव्याख्यानभाष्यादिप्रणयनैर्भृशं समाद्रियते।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ (भ०गी० २/४७)

इति भगवद्गीतायां संव्याहरन् तत्र भगवान् श्रीकृष्णः निष्कामकर्मणः सार्वभौमं महत्त्वं (Cosmic Significance of Karma without Kāmanā) प्रतिपादयति। अस्यां गीतोपनिषदि, प्रावर्ह्येण सांख्ययोग-संन्यासयोग-आत्मसंयमयोग-ज्ञानविज्ञानयोग- अक्षरब्रह्मयोग- राजविद्या राजगुह्ययोग-विभूतियोग-विश्वरूपदर्शनयोग-भक्तियोग - क्षेत्रक्षेत्रज्ञ-गुणत्रय दैवासुरसम्पत्-श्रद्धात्रयविभागयोग- पुरुषोत्तमयोग - मोक्षसंन्यासयोगादयो विवृताः पार्थक्येणाष्टादशाध्यायेष्वभ्युपगम्यन्ते। निष्काम कर्मतत्त्व-संन्यास तत्त्व-भक्तितत्त्व-पुरुषोत्तमतत्त्व मोक्षतत्त्वादीनां रहस्यपरिज्ञानं समेषां मानवानामिह जीवने सकलदुःखनिवृत्ति जनकत्वेन, मनः शान्तिसाधनत्वेन च नितरां समुपादेयं वरीवर्तीतिकृत्वा इमामुपनिषदं सम्प्रति निखिल-विश्वस्याध्यात्मिकग्रन्थरूपां (Sacred book of the universe) सम्मन्वते। अन्ततो हि –

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥

इति भगवद्गीताया उपसंहारपद्येन श्रीमद्भगवद्गीता, सकलशाश्वत-भूतिसम्पत्तिशान्तिनीतिनिदानयोः सुदैवसूद्योगयोरिह जीवने नितरां महत्त्वं प्रतिपादयति।

महाभारतसारसर्वस्वरूपायामस्यां अष्टादशाध्यायाः, सप्तशतसंख्याकाः श्लोकाश्च सन्ति। अस्या माहात्म्यानि वैष्णवीयतन्त्रसारे, स्कन्दपुराणे, वराहपुराणे, महाभारते च विभिन्नानि समुपलभ्यन्ते।

श्रीमद्भगवद्गीतायाः प्रमुखाणि भाष्याणि

शांकरभाष्यम्	शंकराचार्यः	वै० ८ शतकम्
रामानुजभाष्यम्	रामानुजाचार्यः	वै० १२ शतकम्
निम्बार्कभाष्यम्	निम्बार्काचार्यः	वै० १३ शतकम्
मध्वभाष्यम्	आनन्दतीर्थः	वै० १३ शतकम्
आनन्दभाष्यम्	रामानन्दाचार्यः	वै० १४ शतकम्
वल्लभभाष्यम्	वल्लभाचार्यः	वै० १६ शतकम्
पैशाचभाष्यम्	हनुमत्पण्डितः	वै० १७ शतकम्
द्वैतभाष्यम्	विष्णुस्वामी	वै० १८ शतकम्

स्वामिनारायणभाष्यम्	गोपालानन्दस्वामी	वै० १९ शतकम्
भगवद्भाष्यम्	भगवदाचार्यः	वै० २० शतकम्
विज्ञानभाष्यम्	मधुसूदनविद्यावाचस्पतिः	वै० २० शतकम्

श्रीमद्भगवद्गीतायाः प्रमुखाः टीका व्याख्याश्च

वासवीटीका	वसुगुप्तः	वै० ९ शतकम्
गीताव्याख्या	आनन्दवर्धनः	वै० १० शतकम्
गीताटीका	रामकण्ठः	वै० १० शतकम्
लासकीटीका	राजानक लासकः	वै० १० शतकम्
गीताव्याख्या	अभिनवगुप्तः	वै० ११ शतकम्
श्रीधरी व्याख्या	श्रीधराचार्यः	वै० ११ शतकम्
गीतार्थसंग्रहः	यामुनाचार्यः	वै० ११ शतकम्
भगवद्गीताशयः	रामानन्दतीर्थः	वै० ११ शतकम्
तत्त्वार्थसुदर्शिनी	सुदर्शनाचार्यः	वै० १३ शतकम्
शंकरानन्दीटीका	शंकरानन्द.	वै० १४ शतकम्
ब्रह्मानन्दगिरिव्याख्या	वेंकटनाथवेदान्तदेशिकः	वै० १४ शतकम्
तत्त्वप्रकाशिकाव्याख्या	केशवभट्टकाश्मीरी	वै० १५ शतकम्
गीताव्याख्या	जयतीर्थः	वै० १५ शतकम्
भगवद्गीताहेतुनिर्णयः	विठ्ठलदीक्षितः	वै० १६ शतकम्
तात्पर्यचन्द्रिका	महागुरु	वै० १६ शतकम्
परमार्थप्रपाटीका	सूर्यदैवज्ञः	वै० १६ शतकम्
गीताविवृतिटीका	राघवेन्द्रतीर्थः	वै० १७ शतकम्
गूढार्थदीपिका व्याख्या	मधुसूदनसरस्वती	वै० १७ शतकम्
सर्वतोभद्रटीका	रामकविः	वै० १७ शतकम्
नीलकण्ठीव्याख्या	चतुर्धरनीलकण्ठः	वै० १७ शतकम्
गीताव्याख्या	बलदेवविद्याभूषणः	वै० १८ शतकम्
गीताव्याख्या (लक्षाभरणं)	वादिराजः	वै० १८ शतकम्
भावप्रकाशिका	सदानन्दस्वामी	वै० १८ शतकम्
गीताव्याख्या	धनपतिसूरिः	वै० १८ शतकम्
अमृततरङ्गिणी	पुरुषोत्तमाचार्यः	वै० १८ शतकम्
गीताव्याख्या	विश्वनाथ चक्रवर्ती	वै० १९ शतकम्
गीताव्याख्या	पञ्चोलिः	वै० १९ शतकम्

अद्वैताङ्कुराटीका	वासुदेवशास्त्री अभ्यंकरः	वै० २० शतकम्

भाष्यटीकानां व्याख्याः

शांकरभाष्यटीका	आनन्दगिरिः	वै० १४ शतकम्
माध्वभाष्य टीका	श्रीनिवासतीर्थः	वै० १८ शतकम्
मधुसूदनीटीकाया व्याख्या	धर्मदत्त झा (बच्चा झा)	वै० २० शतकम्

अन्या विधपुराणान्तर्गता गीताः

(१) अनुगीता, (२) अमृतगीता, (३) अवधूतगीता, (४) अष्टावक्रगीता, (५) ईश्वरगीता, (६) उत्तरगीता, (७) ऐलगीता, (८) कपिलगीता, (९) गणेशगीता, (१०) गर्भगीता, (११) गुरुगीता, (१२) गोपीगीता, (१३) घनश्यामगीता, (१४) देवीगीता, (१५) धीशगीता, (१६) पञ्चदशगीता, (१७) पाण्डवगीता, (१८) पिंगलागीता, (१९) ब्रह्मगीता, (२०) भिक्षुगीता, (२१) भृगुगीता, (२२) मोक्षगीता, (२३) यमगीता, (२४) रामगीता, (२५) रुद्रगीता, (२६) व्यासगीता, (२७) विष्णुगीता, (२८) शक्तिगीता, (२९) शम्भुगीता, (३०) शिवगीता, (३१) सनत्सुजातीयगीता, (३२) सप्तशतीगीता, (३३) संन्यासगीता, (३४) सूतगीता, (३५) सूर्यगीता, (३६) हंसगीता च।

पुराणेष्ववताररहस्यम्

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

(भगवद्गीता ४।८)

जज्ञे पुनः पुनर्विष्णुः जज्ञे च शिथिलप्रभुः।
कर्तुं धर्मव्यवस्थानमधर्मस्य च नाशनम्॥

(वायुपुराणं ९८।६९)

इत्यादिबहुविधैर्वचनैरवनीले धर्मसंरक्षणं, धर्मसंस्थापनं च श्रीमद्भगवत अवतारप्रयोजनं पुराणेष्वनेकेषु प्रतिपदं प्रतिपादितं प्रतिपद्यते। यद्यपि, समये समये साधुपरित्राणार्थं चासाधुविनाशार्थं भगवदंशावताराः, कलावताराश्च ऋषिमनुमनुपुत्रदेवप्रजापति विशिष्टतमश्रेष्ठपुरुषादयश्चासंख्याता अभूवन्, भवन्ति, भविष्यन्ति च, किन्तु विशिष्टांशावताराः पुराणेषु प्रावर्ह्येण प्रतिपादिता दशसंख्याका एवावगम्यन्ते। ते हि—

मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्किश्चतेदश ॥

(पद्मपुराणं २५७।४०)

श्रीमद्भागवतानुसारेण तु श्रीकृष्णो नांशावतारः,[1] अपितु पूर्णावतार अंशिरूपः साक्षात् भगवानस्ति[2] । तथा हि दशावताराश्चेमे—

वनजौ वनजौ खर्वस्त्रिरामी सकृपोऽकृपः ।
अवतारा दशैवैते कृष्णस्तु भगवान् स्वयम् ॥

वनजौ जलजौ (मत्स्यकच्छपौ), वनजौ, अरण्यजौ (वराह-नृसिंहौ), खर्वः वामनः, त्रिरामी परशुरामः, दाशरथिरामः, बलरामश्च, सकृपोबुद्धः, अकृपः कल्किः इत्थं दशांशावताराः,[3] कृष्णः पूर्णावतारश्च ।

---

१. षोडशकलाभिः पूर्णावतार अंशी, न्यूनाभिः कलाभिः अंशावतारश्च पुराणेषु समाख्यातोऽस्ति ।

२. ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणाः ॥ इति विष्णुपुराणीय वचनानुसारं ऐश्वर्यधर्मयशःश्रीर्ज्ञानवैराग्याणां परिपूर्णत्वं यस्मिन् स भगवानस्ति ।

३. जगदुत्पत्तिविषयमधिकृत्य विवर्तवादप्रतिपादकवेदान्त दर्शनस्य, आरम्भवाद समर्थकाधुनिकतमविज्ञानस्य च सैद्धान्तिकमतसाम्यं सम्प्रतीयते । अद्वैतवेदान्त सिद्धान्तानुसारेण जगत उत्पत्तेरुपादानं कारणं मायोपहितं ब्रह्मास्ति । वैज्ञानिक सिद्धान्तानुसारेण (In accordance with the theory of Quantum-Mechanics) जडविश्वोत्पत्तिनिदानं परमाणु (Atom) गत ऋण-धनात्मक-विद्युत् (Negative and Positive Electricity) वर्तते । विद्युदियं स्वयं चेतननित्याऽऽदिशक्तिस्वरूपाऽस्तीत्यत अस्याः ब्रह्मरूपत्वं भाति । मूलतत्त्वादीनां (Elements, Compounds and Mixtures) सर्वविधं पार्थक्यं वैभिन्यं चोक्तवैद्युतिक-कण (Electrons, Protons etc). संख्याभेदेन सम्भवति । इयं संख्या मायास्वरूपाऽत्र प्रतिभाति । इत्थं प्रकारेणाधुनिकतमविज्ञानस्य जगदुत्पत्तिसिद्धान्तस्तावदद्वैत वेदान्तदर्शनस्य सृष्टिसिद्धान्तानुकूलः समवगम्यते ।

विक्रम पूर्वं, नवावताराः समये समये समभूवन्। द्वापरान्ते भगवान् श्रीकृष्णः स्वयमंशिरूपेण भारतवर्षे प्रादुरभूत्। भविष्यपुराणाद्यनुसारेण कलियुगान्ते लुप्तधर्मायां, पापभाराक्रान्तायां पृथिव्यां वैदिकधर्मस्य पुनः संस्थापनाय दशामांशावतारः कल्किः भारतेऽवतरिष्यति।

•

अथ च पुराणदर्शनादीनि, डार्विनफ्राइडादिभिः समाख्यातं जीव विकास-सिद्धान्तं सर्वथा नाङ्गीकुर्वन्ति। मत्स्यकच्छपादि-दशावताराणां प्रादुर्भावस्य पुराणप्रोक्तानुक्रमः पाश्चात्यजीवविकाससिद्धान्तानुसारं नास्ति। न तथा तेषां प्रादुर्भावस्योद्देश्यमपि। तथाऽपि, एतेषां दशावताराणां समनुक्रमः पाश्चात्य जीवविकाससिद्धान्तानुकूलः प्रतिभातीति चित्रं समनुभूयते।

पाश्चात्य जीवविकाससिद्धान्तानुसारेण प्रथमं जलीयजीवः मत्स्यः, तदनु जलीय-स्थलीय जीवः कूर्मः, ततः स्थलीय पाशवीय जीवः वराहः, ततऊर्ध्वं पाशवीय मानवीय जीवः नृसिंहः, तदनन्तरं मानवीय जीवाश्च वामनादयः प्रादुरभूवन्।

उपसंहार

एतावता संस्कृत वाङ्मयस्य, वेद-वेदाङ्ग-उपवेद-इतिहास-पुराणैः संवलितस्य यथामति विहितेन संस्तवेन (परिचयेन) वैदिक संस्कृत वाङ्मयविषयकजिज्ञासावतां प्रेक्षावताञ्च भारतीयाभारतीयानां संस्कृत-ज्ञानां जनसाधारणानां परितोषं भवितुमर्हतीत्याशास्महे। जगज्जनन्या आदिशक्त्याः शारदायाः संस्कृतसरस्वतीविषयकं गीष्पतेरपि दुःशकमासी-द्यावद्वर्णनं, विवरणं, निरूपणञ्च विहितुं, तत्र तावदस्माकं मितम्प-चमतीनामल्पज्ञानां विवरणमविवरणं भवेदिति वयं जानीमः। सत्यपि-ज्ञातेऽयं स्तोकः प्रयत्नः संस्कृतभाषाया निखिलभाषाजननीत्वेन प्रतनत-मत्वं, सर्वाङ्गीणत्वं, परिष्कृतत्वञ्च समवगम्य संविहितः परिचय प्रदानात्मक अमुष्या विश्वभाषायाः संस्कृतायाः संस्तवनरूपश्चापूर्वपुण्य-जनकत्वेनास्याकं कृते श्लाघनीयत्वं नितरां समावहतीत्यत्र न काऽपि संशीतिर्वरीवर्ति।

भारतीयसंस्कृतेरविकलं, यथार्थञ्च ज्ञानं वैदिक-संस्कृतवाङ्मय-ज्ञानमन्तरा कथमपि भवितुं न शक्यमितिकृत्वाऽस्य संस्कृतवाङ्मयस्य ज्ञानं भारतीयसंस्कृतिविषयक जिज्ञासूनां कृते भृशमावश्यकं प्रतिभाति। संस्कृतेषु, संस्कृतोद्भूतभारतीयाभारतीयभाषोपनिबद्धेषु च वाङ्मयेषु भारतीयसंस्कृतेरनेकविधं प्रत्नमप्रत्नं, विकृतमविकृतं वा स्वरूपं सम्प्रत्यपि भारते, ब्रह्मसिंहल-मलय-यवद्वीपादि पौरस्त्यदेशेषु, पारसीक-मिश्रादि पाश्चात्यदेशेषु च प्रतिबिम्बितं सन्दृश्यते। समस्तसंस्कृतीनामिदानीं जगतीतले समुपलभ्यमानानां साक्षात्परम्परया वाऽनुप्राणनं भारतीयार्य-संस्कृत्यैव समभूदिति वस्तुस्थितिनिरूपणं तत्त्वत आत्मप्रशंसां न संस्पृशति।

इत्थं भारतीयप्रतनतमसंस्कृतेर्गौरवस्य प्रतिपदं प्रतिपादकमिदं वैदिकं संस्कृतं वाङ्मयं वैश्विकवाङ्मयेषु चिरन्तनत्व-सार्वभौमत्व-सम्पूर्णत्वादि-गुणविशेषैरतितरां राराजतेतराम् ।

पुण्यंहि भारतं वर्षं मान्याभारतसंस्कृतिः ।
संस्कृतं वाङ्मयं पूज्यं धन्या संस्कृतभारती ॥

●

APPENDIX (परिशिष्टम्)–1

A Bibliography of
Antique Sanskrit Literature
by
Non-Indian Authors
in
Non-Indian Languages.

PREFACE

Every learned belesprit, eastern or western, can not deny the fact that Sanskrit literature, especially vedic literature is ispo-facto Omnipresent. This Vedic literature and allied antique Sanskrit literature, including Purānās, Darshanās and Shāstrās are indeed literary magnum-opus. So the Sanskrit literature entont, has been taken for facile princeps in India and abroad by the gens de letters, who were and are closely aquainted alongwith it. In posse, the authors and Critics of most of the western countries have written separate volumes on the subjects of antique and modern Sanskrit literature and also contributed a number of articles in special periodicals.

Hereby I display some literary work on Sanskrit literature, composed by the learned authors of the foreign countries in various foreign languages from their own degage und verschieden points of views.

It is, I think most nützliche und nötige for us to see all the sides of coup de maitre in all the spheres of Sanskrit literature.

I therefore endeavour to present a kurz bibliographie of vedās and allied antique branches of sanskrit literature alongwith the bibliological description of the books and publications by only non-Indian schriftstellers in various non-Indian languages.

This small Bibliography is compiled from Bibliographie vedique by Lonis Renou, published in Paris 1931 A. C., Vedic Bibliography by R. N. Dandekar, published in Bombay-Poona 1946-1961 A. C., Bibliography of Rāmāyan by A. N. Gore published in Poona 1943 A. C. and other many Catalogues.

CONTENTS

		Pages
Abbreviations of Journals etc.		**1- 4**
Vedas		**5-12**
Ṛgveda	5	
Yajurveda	8	
Samaveda	10	
Atharvaveda	11	
General study		**13-25**
Vedas	13	
Literature	16	
Linguistics	22	
Chronology	24	
Vedangas		**26-35**
Shiksha-Pratishakhya	26	
Kalpa Sūtras	26	
Nirukta-Nighantu	27	
Jyotisham (Astronomy etc.)	27	
Vyakaranam (Snkt. Grammer)	28	
Chhandas	34	
Ancient History & Mythology		**36-42**
Ramayana-Valmiki	36	
Mahabharata-Vyāsa	38	
Puranas	38	
Religion (Vedic Rites, Ethics etc.)		**43-48**
Indian Medicine		**49-50**
Hindu Polity, Economics etc. (Arthashastra)		**51-52**
Indian Music		**53-54**

Indian Philosophy **55-68**

Nyaya-Vaisheshik Philosophy 55
Sankhya-Yoga Philosophy 55
Vedantic Philosophy 57
Metaphysics (Cosmology, Psychology, Epistemology Eschatology etc.) 64
Buddhist Philosophy 67
Jaina Philosophy 68

The Tantras **69-70**
Lexicons **71-73**
Sanskrlt Literature, Rhetorics, History etc. **74-75**
Translation of Sanskrit Poetry, Prose, Drama etc. **76-77**
Sexology (Kama Shastra) **78**
Indian Architecture. **78**

ABBREVIATIONS OF JOURNALS ETC.

ABORI Annals of the Bhandarkar Oriental Research Institute, Poona.

AIOC All Indian Oriental Conference. Poona,

AJPH American Journal of Philology, Baltimore.

AL Arts and Letters, Royal India, Pakistan and Ceylon Society London.

ALB Adyar Library Bulletin, Adyar.

AM Advien Maisouneuve, Paris.

AO Acta orientalia, heiden/copenhagen (includes he Monde-Oriental).

AO (Hung) Acta Orientalia Academias Scientiarum Hungaricae. Budapest

AOS American Oriental Society.

AP The Aryan Path, Bombay.

Arch. Or. Archiv Orientalni, Prague.

Arch. Rel. Archiv fuer Religionswissenschaff, Leipzig.

BDCRI Bulletin of the Deccan College Research Institute, Poona.

BEFEO Bulletin del'Ecole Trancaise d'Extreme-Orient, Paris.

BFV Belwalkar Telicitation volume.

Bh. Vid. Bhāraliya Vidyā, Bombay.

BRMIC Bulletin of the Ramakrishna Mission Institute of Culture, Calcutta.

BSL Bulletin de la Societé de Linguistique de Paris.

BSOAS Bulletin of the School of Oriental and African stu dies, London.

BSOS Bulletin of the School of Oriental & African Studies, London.

BULL. SOC. POLON Bulletin de la Sociéte Linguistiqua Polonaise. Krakan.

CO Collectanea Orientalia, Vitna.

CR Calcutta Review, Calcutta University.

CRAP Comptes vendus de l'Academic Polonaise des Sciences et-des lettves, Cracow.

DCRI Deccan College Post-Graduate Research Institute, Poona.

EM Emérita, Madrid

EW East and West, Rome.

FF (FUF) Torschungen und Fortschritta, Berlin.

HOSV Harvard Oriental Series Volume.

IA Indian Antiquary, Bombay.

I-AC The Indo-Asian Culcure, New Delhi.

IAIC International Academy of Indian Culture, Nagpur.

IC Indian Culture, Calcutta.

IF Indogermanische Torschungen, Berlin.

IHQ Indian Historical quarterly, Calcutta.

I-IJ Indo-Iranian Journal, Leiden.

IJHM Indian Journal of the History of Medicine, Madras.

IL Indian Linguistics, Linguistic Society of India, Poona.

Ind. J. Psych. Indian Journal of Psychology.

JA Journal Asiatique, Paris.

JAF Journal of the American Folklove, Menesha. wis., U.S.A.

JAOS Journal of the American Oriental Society, New Haven., U.S.A.

JASB (L) Journal of the Asiatic Society of Bengal (Letters), Calcutta.

JASBOM Journal of the Asiatic Society, Bombay.

JBRS Journal of the Behar Research Society, Patna.

JIBS Journal of Indian and Buddhist Studies, Tokyo.

JISOA (J Ind. Soc. Art.) Journal of Indian Society of Oriental Arts, Calcutta.

JMA Journal of Music Academy, Madras.

JOIB Journal of the Oriental Institute, Baroda.

JORM Journal of Oriental Research, Madras.

JPsy. Journal du Psychologie.

JRAS Journal of the Royal Asiatic Society of Great Britain and Ireland, London.

JUPHS Journal of the United Provinces Historical Society, Lucknow.

JVS Journal of Vedic Studies, Lahore.

KZ Zeitschrift fuer vergleichende sprachforschung be gruendet von A. Kuhm, Gottingen.

Lg Language, Linguistic Society of America.

MAO Monographie Archiva Orient. Prague.

Min I Man in India, Ranchi.

MIO Mitteilungen des Instituts fuer Orient forschung, Berlin.

MKNAW Mededalingen de koninklike nederlandre Akademie vanwetenschappen. Amsterdom

MO Le Monde Oriental

MST Muenchener studien zur Sprachwissenschaft.

NGGW Nachrichten Gottingischer Gesellschaff der wissenschaften.

NIA New Indian Antiquary, Bombay.

NO Novy Orient, Prague.

NR The New Review, Calcutta.

OLZ Orientalistische Litevatingeitung, Berlin.

ON Orientalia Neerlandica, Leiden.

OUP Oxford University Press.

PAPA Proc. American Phil. Associatinn.

PAPHS Proceedings of the American Philosophical Society.

PAUK Polska Akad. Umiejetnosci, Krakow.

PEW Philosophy, East and West, University of Hawaii.

Phil. Guarf Philosophical Guarterly, Amalner.

PO The Poona Orientalist, Poona.

Pr. Bh. Prabuddha Bharata, Almora.

QJMS. The Quarterly Journal of the Mythic Society, Benglore.

RBFACV Rif sumeikan Bungaku Fifteenth Anniversary Comm. Volume.

REL Revue des etudes Latines, Paris.

Rev. Rel. Review of Religion.

Rev. d'hist. des Rel Revue de l'histoire des veligions.

RIGI Rivista indo-greco-italica, Naples.

RO Rocznik Orientalistyczny, Lunow, Poland.

RP Revue of Psychologic, Paris.

RSO Rivista degli Studi Oriental, Rome.

RUFACV Rifsumeikan Univ. Fifteenth Anniversary Comn. volume.

SBBAW Sitzungsbevichte der Bayerischen Akademic des wissenschaften. Munich.

SP Summary of Papers.

UCPC Phil Univ. California Publications in Classical Philology.

VBQ Vishwa Bharati Guarterly, Santiniketan.

Ved-kes Vedanta Kesari, Madras.

WBKL Wiener Beitraege zur Kulturgeschichte Uud Linguistik.

WUS Woerter und sachen, Heidelberg.

WRKM Wiener Zeitschrift fuer die kunde des Morgenlandes.

ZDMG Zeifschrift der deutschen morgenlaendischen Gesellschaff, Wiesbaden.

Z fd A Zeifschriff für dentsches Altertum and deutsche Literature, Berlin.

ZII Zeifschrift für Indologie und Inanistic, Leipzig.

ZMR Zeitscher für Missionswissenschaft und Religionswissenschaft.

ZVSBK Same to KZ.

VEDAS

[Samhita, Brahmana, Āraṅyaka-Upanishad.]

(Text, Trans., Exegesio, Commentaries etc)

ṚGVEDA—

Antoine, R. Religions symbolism in the Kaushitaki-Upanishad. JOIB. (4) 330–337.

Atkins, S. D. A Vedic Hymn to the Sungod sürya. JAOS. 1938.

Aufrecht, Th. Die Hymnen des Rigveda. Wiesbaden. 1955.

Aufrecht, Th. Das Aitareya Brahman. Bonn. 1879.

Brown, W. N. The sources and Nature of Purush in the Purushasüklā. JAOS 51,1931.

Brown, W. N. Some Notes on the-Rain charms, ṚV VII. 101–103. NIA 2, 1–39–40.

Caland, W. Notes on the Kaushitaki Brāhmana. AO 10,1932.

Dezwarf, H. J. Ṛgveda x. 95 : Purūravas and Urvaṣi. ON. 1948.

Esteller, A. Stock-taking of Ṛgveda Text Criticism-Summary SP. (18th AIOC) Annamalai Nagar, 1955.

Esteller, A. The Proper Text-Critical Approach to the Ṛgveda Indica. Bombay, 1953.

Esteller, A. Towards a New Text-Critical edition of the Ṛgveda. SP. (20th AIOC), Bhuvaneshwar 1959. 3–10.

Esteller, A. The root Sī. (To lie down). T.J.V.II IL 1959.

Fowler, M. Ṛgveda 10.27.14 : Bvhannachāyo apataso arvā. JAOS 270–73.

Friś, O. Nadhrobem z Ṛgvedu : No. 1947-48.147.

Friś, O. Z vedskych Hymnu Matka Zemé. No. 1946–47. 28–28.

Geldner, K. F. Der Ṛgveda : (ans dem Sanskrit ins Dentsche-Ubersetzt und mit einem Lanfenden Kommentar-versehen) HOSV 35–36.

Geldner, K. F. Ṛgveda : German Translation.

Gonda, J. The Rigvidhan : English Trans. N. V. A Osthoek's-uitgevers Mij utrecht. 1951. 132.

Gonda, J. The so called secular humorous and satinical hymns of Ṛgveda. ON. 1941. 312-348.

Gonda, J. "Ein neues Lied" WZKM 48, 1941,275-90.

Gonda, J. Epllhets in the Ṛgveda. Monton & Co.'s Gravenhage. 1959,270.

Griffith, R. T. H. Ṛgveda : English Translation.

Griffith, R. T. H. The Hymns of Ṛgveda : English Trans. and Popur Conment. E. J. Lazavus & Com, Benares. 1920-26.

Gustove, H. Choval Hymns from the Ṛgveda. Stainer & Bell. London. 1920.

Hall, F. E The Srī Sūklā. JASBL 28, 1932.

Houschild, R. Das Selbstlob (Ātmastuti) des Somaberouschten Gottes Agni. F. Weller commt. Vol., 1954, 247-88.

Heestermann, J. C. A Propos of Ṛgveda 8.24.30cd, SP. (20th AIOC.) Bhuvaneshwar 1959. 34-35.

Heilmann, L. Linghistica e Fulosofia, Guadarni dell institudi Glottologiai Univ. Degli studi di Bologna 1958, 3-9.

Herold, E. Social significance of a Vedic allegory (ṚV. III 31. 1-2) Arch. or. 26 (1), 1958. 81-87.

Hertal, J. Nachtrag Zu Ṛgveda x. 163 Vendidad VIII. 35-72. Asia Major 1930.

Hertel J. Uber Heimat und Alter des Ṛgveda. Indogermanische Forschungen. Berlin. 41.

Hooven, H. N. Edit. Rigveda. Athens-Ohio. 1933.

Inazn, K. On the Varuna Hymns of the Ṛgveda (Japanese). JIBS (1) 1954. 329-332.

Janert, K. L. Ṛigveda-studies I-1J 2.(2), 1958, 85-109.

Keith, A. B. English Translation of Ṛgveda-Brahman.

Keith, A. B. English Translation of Shānkhyayanāranyaka and Mahavrata.

Keith, A. B. English Translation of Aitareya Araryaka. AO. vol. IV.

Kyceck, F. W. Sprawie Ṛgvedy IV 18.10. RO 1, 1925.

Lommel, H. Eine arische Form magischer Gottesanrufung. AO 10, 1932.

Lommel H. Studies in the Veda. AO 11,1933.

Lommel, H. Auslegung von Vedastellen. AO 11,1933.

Macdonell, A. A. The usas Hymns of the Ṛgveda. JRAS. 1932.

Macnicol, M. Poems by Indian women. Pub. Heritage of India. New york. 1923.

Max Muller, F. Edit. Ṛgveda Samhita vol 1. 1861.

Manning, ch. Hymnes of the Ṛgveda.

Michalski, S. F. Hymnes Philosophigues du Ṛgveda. Scientica. Italy 46, April 1952, 123-29.

Montesi, G. Il valore Cosmico dell' Aurova nel pensievo. mitologico del Rig-veda. Studi e materiali de storia delle religioni, 24-25, 1953, 54. 111-132.

Oertel, H. Zur Indischen Apologetik. W. Kohlhammer. stuttgart. 1970.

Otto, R. Varuna Hymnen des Rig-veda. Röhrscheid. BONN. 1948.

Papesso, V. Inni del Ṛgveda. Pub. Nicola Zamichelli. Bologna. 1931.

Peterson, P. Hymns from Ṛgveda. Edit. by Karmarkar. RD. POONA. 1937.

Pisani, V. On Ṛgveda VII 28.4 and a second roof Pū-"tobeat" J. J. Volume 1. IL. 147-48.

Poleman, H. I. The Ritualistic Continiuty of Ṛgveda X. 14-18. JAOS. 1934.

Poucha, P. Ein vedisches Zeugnis für den Arbeit sgesang. ZII. 1936.

Poncha, P. Schichtung des Ṛgveda. Arch. or. 13 (1942), 15 (1944).

Renou, L. Les Hymnes aux viśve-Devāh. Nobel Comm. Vol. 1959. 133-44.

Renau, L. Kaushitaki upanisad. "Les upanishad". 6 Adrien Meisonneuve. Paris 1941. 72 X 165-175.

Penon, L. & Silburu, L. Consideration on Ṛgveda I 152, Bh. vid. 10.1949.

Ronnowkasten Die verse der Sarprajni Ṛgveda 80,189. MO. 25. 1931.

Sāhoda, T. On the Historical Significance of so-called "Philosophical-Hymns" in the Ṛgveda. (Japanese) RBFACV. Oct. 1949.

Sāhoda, T. Problems Coucering the Philosophical Hymns of Ṛgveda. (Japanese) JIBS 2(2) March 1954. 418-21.

Sāhoda, T. A Declaration of despair made by a vedic Poet. (Japanese) RUFACV. 1951.

Sāhoda T. The Idea of Mysterious in the Ṛgveda (Japanese) JIBS. 3(2). 352-57.

Schayer, St. A Note on the old Russian variant of the Purushasūkta. Arch. or. 7. 1936.

Schayer, St. Staroruski variant wedy irkiego mitu o kosmicznym Pramezu. co. 1934. 32-24.

Schwentner, E. Zu Poncha's Artikal. ZDMG. 90,1936.

Stella, J. B. O Rig-vedd. Sao Paulo. 1958.

Silburn, L. Aitareya Upanishad. "Les Upanishad". 10 Adriew-Meisonneuve. Paris. 1950, 34-7.

